यारिति विश्वः फललाभशरग्रयोरिति विश्वः सपक्षः ससुहृत् केकादि पत्र पुंखमपरेषां भेदनः शत्रुविदारणः वा
णवाणसुरः शरकद्गुणिनां सौर्यादिगुणवतोऽपि जन्यव च तेन चैद्येन कर्मणि भवतीति कार्मुकं कर्मण उकञ् इते
नैन संधानं संधि मच्छतिम्न तो नैकाकीति भावः अत्राप्युपमा भेदस्स्त्रेषा वा वाममेदात् ॥ ८७ ॥ चैत्येति ॥ किंच चैत्ये चान्ये

कालयवनस्याल्परुक्मि ह्युमद्यः राजानः तमस्यभावात् तमोगुणात्मकाः अत एव तेषां प्रदोषप्रकृष्टदोषं तामसमे
वैते चैवमनुयायिनः अनुयास्यते सादृश्यादिति भावः भविष्यति गम्याद्यौणि नि भविष्यद्र्यो अकेनोह्य विष्यदाध
मर्णयोरिति षष्ठी प्रतिषेधाद्वितीया यथाध्वांतरजनीमुखं अनुयाति तद्वदिति वस्तुनाऽलंकारध्वनिः राहोध्वांते गुणो
तमइत्यमरः प्रदोषो दुष्ट राज्ञि कालविशिष्ठे वेजयंती ॥८२॥ ननु बाणद्वयोऽस्माभिरिदानीं हत संधानानविरोत्स्यंती
सत्याह ॥ उपजापतः ॥ तमन्येन कृतमनल्पोपजापोभेदः भेदोपजापा समाविमरः तयि आकोपवतः तान्बाणद्वीनअ
निलः साग्निरिधा निंधनातीनकाष्ठंदावींधनेषधः इध्माभेधा समित्स्त्रियामित्यमरः आशु दीपयिता सद्यः प्रज्वलयि
ष्यतीक्षिपेर्पतालपरुग्रंत वैराः संधितामपि सेति रंध्रे सद्याव [illegible] ष्यतीति भावः ॥८३॥ ततः किमतआह ॥ चह
दितेति ॥ हत्सहायो महासहायवानल्पोद्विया न ह्यू द्रुतरोपि स्थूलदूरतरस्यादिनायणादिपरलोपः पूर्वगुणअ्को
व्यस्यांतपारंग इति तथाहि अर्वांसमूहोऽश्रावंतस्य समूहस्य गोतेनगच्छती सापगा नदीनगस्यापगा गिरि नदीम
हानद्याः गंगादिकया संभूय मिलितां भोधिमभ्येति ह्यद्वौवंता दृष्ट महावीरः अतुलकिमुवक्तव्यमिति शाहृ
यः विशेषेण सामान्यसमर्थनरूपोऽर्थांतरन्यासः ॥८४॥ किं च नकेवलं शत्रोरसाध्यत्वमित्यत्र विरोधकत्वादपि
कोऽनर्थ इत्याह ॥ तस्याहादिनाहृदयेनतस्येति ॥ ये च तस्य स्थैर्यस्यमित्रालिन पाशे च ते तवअमित्रानपायेतेउभयेप्र
याश्रभियुक्तमपियातमे ने स्थैर्यं तारोगमिष्यतीति गमेकर्मणि लुट् अतः परेउक्तोभयव्यतिरिक्तास्तवमित्राणि तस्या
ऽमित्रा शत्रुःसर्वः ह्योगंतारः ॥८५॥ किमतआह ॥ मस्खेति ॥ इत्थमनेनप्रकारेण इदमस्थैर्य मृरितिन्यमुप्रत्ययः मस्वस्य
वि [illegible] च्छायविघातायसकलेराजके राजसमूहे गोत्रोक्षेत्यादिवुञ् उत्पाद्यक्षोभयिता हे तत्प्रजानाशेः प्रजा
तश्च तेर्युपिक्षिरस्य यथाप्रथमेनारिणा जातमजानि नपुंसकेभावे क्तः ॥८६॥ अस्तु सोपि शत्रुः को दोषस्तत्राह ॥

रघु

केनितुभावशाद्बस्यापि रसपरत्वमाश्रित्य यथा संचारिणः प्रसंगाद्गांतु काव्यन्येरसाः स्थायिनःस्पिरस्यैकस्य प्रमुखस्य रस्या
यैप्रवर्तितेय यास्मिन्नेव काव्ये वीरश्रृंगारादयइति व्याख्यातउपमालंकारः ॥८७॥ ज्ञातिपक्षोऽवगुणांतरमाह ॥ तत्रेति
तत्रापापोस्वपरराष्ट्रचिंतनेऽन्यत्र तत्रावापं शास्त्रमौषधप्रयोगं च वेति यत् सोनतंत्रावापविदः तत्रराष्ट्रचिंतायामावा
वः परचिंतनेशास्त्रमौषधं तमुख्येषु तत्रमितिवैजयंतीयोगेः सामान्युपायैः अन्यत्रदेवतायानेव्यायोगःसेहननोपा
यस्यानसंगतियुक्तिष्विसमरः मेरुलानि स्वपरराष्ट्राणि महेद्रादिदेवता यतनाधिष्ठितान्याक्रमतामपि क्षीरस्या
साकमेतिकर्मसुनरेंद्रेणराज्ञाविषवेद्यैननरेंद्रेवार्ति को राज्ञि विषवैद्ये च कथ्यते इति विश्वः अत्रवः फणीन्द्र इवसुक
निग्रहाः सुखेनगम्याः एषसुप्रकृता प्रकृतक्लेवउपमेवेति केचित् ॥८८॥ प्रज्ञोत्साहवतः स्वामी सत्रैव प्रभुशक्तेर्मू
लमिस्युक्ते तदेवव्यनक्ति ॥ करेति ॥ उत्तमो महोत्साहः प्रज्ञाबलमेत्रशक्तिरेवच्छहत्सुधानं मूलं यस्यसः उत्साहएवपादपःक
रेणवलिनाप्रसेयां वर्द्धनीयं हस्तप्रमात्रांचवलिहसांश्रावकराइत्यमरः पृथीयसीपृथुतरीरश्रुतौ हलादेरितिरफा
देशः प्रभुशक्तिः तेजोविशेषस्सप्रतापःप्रभावश्च यत्तेजः कोशदंडजमित्यमरः फलति प्रसूते सर्वःफलनिष्पत्तोमेत्रपू
र्वकएवोत्साहः स्वतः फलतिविपरीतस्तुछिन्नमूलोवृक्षइवशुष्यतीतिभावः रूपालंकारः ॥८९॥ विमृश्यकारिण
सुविश्रममपिविधेयं स्यादितित्रयोणाह ॥ अनल्पत्वादिति ॥ अनल्पत्वात् बहुत्वात्प्रधिकत्वात् तएव प्रधानत्वात्मनउत्स
यवाक्यत्यदुःशइवदेशस्तुकालविहितः स्वरउच्यते तस्मात्तरे स्वराः षड्जादयइवविजिगीषोर्नेपयोऽन्यमध्यमउप
लवर्तिनो राज्ञानः परिवारतांवोष्टातीप्रयोतितत्कार्यमेव साधयंतीसर्वेः तस्माद्विमृश्यकर्तव्यमित्यर्थः ॥९०॥ अपीति
किंचअनारम्भमाणस्यास्यमकिंचित्कुर्वाणस्यापि विभोः प्रभोर्व्यापकस्य च परैरन्यैर्नृपतिभिःशरभमेर्यादिभिश्चोत्पातोत्ताः ८१

स०क०
२८

शत्रुवधादपि प्रियं करोत्ययमेव नाकिनां भुक्तमपि शत्रुवधस्य सुकरत्वादिति भावः ॥१०६॥ तत्याच्यमन्तवशिनां तेषां स०२
देवानां किमभिः पिहमस्स्यणप्रलोभनैः तत्राह ॥ अमृतमिति ॥ अमृतं नाम संतो विद्वांसो मंत्रा एव जिह्वा येषां तेषु मं
त्रजिह्वेष्वग्निषु मंत्रजिह्वः सप्तजिह्वः सप्तजिह्वो हव्यवाहनः इति वैजयंतीयं तु शेषहोमादिकं जुह्वति तदेव देवैस्तृप्तेभ्यः
यत्तदेनावि संबंधात्तदेव रत्नवस्तु अधःप्रेयं नवं तु उद्धृत्यः स्यात् यादिनाऽस्मिन्नर्थे निपातनादनिरुद्धस्त्रिभिः तेन
त्रिभिस्तस्य मथितस्य स्वार्थे सैत्रेऽस्यंभोपेर्व णनाप्रोमेव अलंकारत्वं च भ्रष्टिमथनेनाऽमृतमुत्पादितमिति यतः
कीर्तिमात्रं अतो नु तमेवामृतमिति वाच्यार्थयोर्हेतुहेतुमद्भावो वाक्यार्थहेतुकं काव्यलिंगमलंकारः ॥१०७॥
यात्रायाः कश्चिदवबंधकादुस्मरस्तावासीत्साह ॥ सहिष्णव इति ॥ प्रतीकाराय पूज्यः प्रतीक्ष्य इत्यमरः पितृष्वसेपितृ
भागिन्यै विभाषा स्वसृपत्योरिति विकल्पादलुगभावः मातृ[illegible]पितृभ्यां स्वसा[illegible]तिषत्वे तत्वसुर्नेः शतमागां
सि अपराधान् आगोऽपराधो मंतुश्चेत्यमरः सहिष्यत्सोढा इति यत्तया प्रतिश्रुतं प्रतिज्ञातं तत्प्रतीक्ष्यं प्रतिपाल
नीयं अन्यथामहाद्दोषः श्रवणादिति भावः ॥१०८॥ ससमस्ति प्रतिश्रुतं किं तस्यानमतत्वादेः द्युस्या तदपि जिह्वा
सितव्यमत्राह ॥ तीक्ष्णेति ॥ सतः सतुरस्य वृद्धितीक्ष्णमलिलितास्यादितिस्यायाध्याहारः एवमुत्तरत्रापितथारुसुदसी वृद्धि
ति अरुंतुदाशश्चवत्नमर्मच्छेदिना नवैतस्य हितस्यैव परंपीडुय इत्यर्थः कर्मव्यापारः प्रतायेत ते जस्विमयं दस्यात्तथापिशुनं
स्यात् न तु हितस्यादिवद्धिसामयदि इत्यर्थः मनाक्तितेजो सोऽपि मानो स्यात् तथापि उपतापयतीत्युपतापि अस्यादिवत्स
संतापकारिनस्यात् वाग्मिनेवक्तुः सतोवागेका एकरूपा स्यात् वाग्मी तु सहमेव वदतीत्यर्थः अतः ससंधस्य प्रतिश्रुतिर्वाता
हानिरनर्हा इति भावः अत्र प्रकृतायावान्योऽप्रकृतानां बुद्धिकर्मपनसान्यतुल्यधर्मान्विपस्यात् दीपकालंकारः प्रस्तुताप्रस्तु
नां तु सामग्र्यं तुल्यधर्मतः औपम्यं गम्यते यत्र दीपकं तच्च निगद्यत इति लक्षणात् तु चुरुपादीनां सत्त्वादिव्यतिरेकादय
तो ॥१०९॥ अशान्त्याकालेऽप्यवधइत्याह ॥ स्वयमिति ॥ किंच अहो मानुमानरेवस्यं यं कृतप्रसादोऽनुग्रहं प्रसादस्यायस्यतु २८

शिलावतारस्थले

स्यनैस्यस्यातापस्वयाचर्थिनियतकालावसानमप्राप्यमवानविनालंनशक्यः तथाचवक्ष्याम्योऽपकीर्तिरिव उभाभ्यामन्यम
किंचित्फलंस्यादितिभावः ॥१११॥ तर्हि किमस्तु तोवेक्षौवनेयास्ह ॥ तत्रयेति ॥ किंतु कुरुस्विदिः कार्यज्ञाः विधिज्ञाश्च पणिधियंत इत्
प्रणिधयो गूढचारिणः प्रणिधिर्गूढपुरुषयोरिति हलायुधः तत्रस्येभिरिति तीर्थानि मंत्र्याद्यष्टादशस्थानानि तैर्यो नौ जलावत
च मंत्र्याद्यष्टादशस्वपि पुण्यक्षेत्रे तथा पात्रे तीर्थस्यादिति हलायुधः तेव्यतः पदस्थानेपादप्रक्षेपचक्रेला महतोदुःखगाह
स्य पूज्यस्य च विद्विषः शत्रुरेवाम्भस्यतलस्वरूपप्रमाणमितियावत्त्रयस्वरूपयोरस्थितलमिस्वरः विदांकुर्वेतु विदज्ञाने
विदांकुर्वेत्वित्यन्यतरस्यामितिविकल्पादामप्रत्ययनिपातः अभ्यस इति शत्रोः कृततीर्थस्यासुप्रवेशकत्वात् सांगतः
त्रंस्तूयां नीतिशास्त्रं उक्तेतः उत्सू त्रः नीतिशास्त्रानुसारी उत्सूत्रः नीतिशास्त्रविरुद्धः पदन्यासो एकपदप्रक्षेप[illegible]स्यत्य
व्यवहारो वीत्तियावत् स नास्ति यस्याः सा अनुत्सूत्रपदन्यासा नीतिपूर्वकसर्वव्यवहारेत्यर्थः अन्यत्र अनुत्सूत्रपदो अनु
त्सूत्र सूत्राक्षरेरेकयपसंख्यानैरपेक्षेण सूत्राक्षरैरेवसवार्थप्रतिपादको न्यासोऽवृत्तिव्याख्यानग्रंथविशेषो यस्यां सा
तथोक्ता सतीयथार्थकल्पनयाशोभनावृत्तिः भृत्यामभ्यादिजिविकायस्यां सा सवृत्तिः अन्यत्र वृत्तिः काशिकास्यं सूत्रव्या त्य
ख्यानग्रंथविशेषो यस्यां सा सद्वृत्तिः ग्रंथजीवनयोरिति वैजयंती[illegible]निबंधनान्यवजीव्यादीनांक्रियावसानेषु दत्तानि गोणि
पणादिशास्त्रतिकपारिवकदानानियस्यां सा एतच्चदह्याम्ब्रमिनिबंधने[illegible]रो तद्बच्च न व्याख्यानेमिताक्षरायां दृष्टव्यम् अन्य
त्र सन्निबंधनं भाष्यग्रंथो यस्यां सा एवंभूताविराजनीतिः राजवृत्तिः अपगतः स्पशश्चारो यस्याः सा अपस्पशा चेति यथार्थव
र्णोमं चइः स्पशो हेत्वाः उच्यत इति हलायुधः अन्यत्र अविद्यमानः पस्पशः शास्त्रारंभसमर्थकं पयोद्घातग्रंथसंदर्भो य घा
स्यां सा अपस्पशा शब्दविद्या व्याकरणविद्येव नो भाति न शोभते तस्माच्चारप्रेषणमावश्यकं ततोद्भूहितस्परानुरोधप्रायकता
दिति भावः अयापस्पशो नेतु काद्भुवश्च द्रुयोरिवश्लिष्टत्वादर्थश्लेषः अनुत्सूत्रपदन्यासस्य तूभयसंभवादुभयश्लेषः शब्दवि
विधेयं वेति वर्पमान्यतैवतयोसापेक्षत्वात् संकरः ॥११२॥ केवलेन्द्रारमुखेन परचंतां तज्ज्ञाने किंतु पज्ञापक्ष्यकर्तव्य इत्याह ॥ अज्ञातेति ॥

संत

सं०का०
२८

किं चाश्रुतात्तदोषैः परैरज्ञातस्य मतिभिर्दोषज्ञैः स्वैर्यैः परमर्मज्ञैः अभिव्यक्तानि भेद्यस्याग्रे प्रकटितानि शासनानि तदमात्यान् स०२
ग्राहकराणि कूटलिखितानि येषां तैः अन्यथा चेतनैरभयवचनैर्ध्येयस्वामिनिर्दिष्टैरचेतनवृत्तिर्येषां तैरभयवचनैश्चि ग्राहिभिर्भेद्य
नगरवास्तव्यैश्चारैरित्यर्थः। तयोर्धर्मयोश्चेतनत्वमेव मरः। शत्रोः सर्वेषिनः समवायं समवयंतीति सामवायिकाः सभाप्र
मुख्याः अमात्यादयः समवाया तत्समवेतीति बुञ् दृष्टाद्विषां मतेदततः स्तान अस्माभिरपि येषां लिखितान्येतानि गृहीता
न्युक्तं दूषयितामेद्याः विषयवृत्तीयाः ॥११३॥ उपेयुषामिति ॥ किं च उपायज्ञैः कार्यसाधनकुशलैः तत्रान्तरे तीन्त्राः सैन्यं
उपायिभिः पश्चाद्यन एकार्थानि तथासैन्यके प्रयोजनानि राजन्यानां समूहः राजन्यकानि गोत्रोक्षेत्यादिना बुञ् अस्य जातशत्रो
रिमा मा जातशत्रवी पुरे इन्द्रप्रस्थे उपेयुर्वांसि प्राप्नुवंति उपेयिवाननाश्वाननूचानश्चेति क्वसुप्रत्ययांतो निपातः तः क
र्तारः करिष्यंते कर्तृकर्मणि लृट् इन्द्रप्रस्थस्य अस्माकं तु महद्राजकार्यं भविष्यति तदध्वरजेत्याव्याजेन सम्बन्धं दूराग त
व्यमिति गरुडसंदिश्य ततः सर्वे लिपितव्या इत्यर्थः ॥११४॥ ननु तत्राध्वरकर्मणि को युद्धावकाशो यत्रैवमहत्कल्पते
वीजं संभावयति ॥ सविशेषमिति ॥ पांडोः सुतो युधिष्ठिरो भवति पूज्यत्वाद्यि सविशेषं भक्तिं वितन्वति सति तरलाः चपलाः श्र२
मत्सरिणः द्वेषवन्तः परेश्वरः स्वयमेव वैरायितारः वैरं कर्तारः शब्दवैरकलहप्रकएवभ्रः कण्ड्वादिति क्यङ् ततः कर्तरि
लृट् ॥११५॥ किं ते सर्वे वैरायंते नेत्याह ॥ यदीति ॥ इह विपक्षमध्ये शत्रुमध्ये सहवृद्धियुजोपि त्रैधेन सह स्वर्यंगतास्र
पि सत्सूद्विषेत्यादिना क्विप् ये भूभुजः आत्मविदः स्वामिज्ञं नवेदिनः यद्वास्यात्मस्वरूपवेदिनः स्युः तैर्भूभुग्भिः बलिपुष्ट
कुला तककतुकर्कटारिष्टवलिपुष्टसकृत्प्रजा इत्यमरः अन्यपुष्टैः परभृतैरिव अपिवैरेणसद्भोऽस्मद्विपक्षमध्यात् अ
न्यतरादिसत्रानयशब्दस्यार्थपरत्वात् पृथग्वादियोगेति पंचमी पृथग्भाविता पृथगते भविष्यतेभावे लृट् चिराद्वा
टावृद्धितेष्वपि केचित्स्वामिरसंगच्छंतइत्यर्थः अपपच्छेदसिकेवचतां ॥११६॥ फलितमिति गमयन्नाह ॥ प्रयुक्तेत्यादि ॥ सह
जेति ॥ सहजे स्वाभाविके चापलेदुर्विनीतत्वमनवस्थिततेन च चपलोपारदेशी दुर्विनीतोऽनवस्थितइति वैजयंती २८

सेवाश्चेति ॥ बंधुरेवबांधवः सधर्मराजः अतिभरस्यक्षमः स्कंधो यस्य ते समानस्कंधासमित्यर्थः तां सहायसंपत्यामिधा
यस्याध्वरस्य धुरोऽध्वरधुरः ऋक्पूरब्धूरित्यादिना समासांतोऽप्रत्ययः समासांतानां प्रकृतिलिंगत्वात् तत्पुरुषत्व
रनवलिंगाभ्येटाप् विवक्षितेवोढुमिच्छति वहतेस्सनि ततः सन्नंताल्लट् तथापि विरोधे विश्वासविघातो बंधुदुष्क
स्यात्तामभतिभावः विशेषणसाम्यात् प्रस्तुतयागधुरप्रतीतेः समासोक्तिः ॥११७॥ ननु प्रतिश्रुत्याकरणे दोषः प्रागेवप्र
रिहारे को दोषस्तत्राह ॥ महात्मन इति ॥ महात्मानः भजमानान् शरणागतान् रिपूनप्यनुगृह्णंतीति किमुत बंधूनि
तिभावः अत्रार्थांतरन्यासः सिंधवो महानद्यः समानएकः पतिर्यासां ताभ्यः सपत्नीः नित्यं सपत्न्यादिष्विति ङीप् न
कारश्चान्तादेशः निम्नगाः गिरिनिर्झरिणीः अब्धिं प्रापयंति स्वसौभाग्यं ताभ्यः प्रयच्छंतीत्यर्थः
तिभावः ॥११८॥ तर्हि स प्रत्युपेक्ष्यः स्यादिपक्षस्यापार्थनया प्रार्थमाचर्जनयामिसतमाह ॥ विरोधपीति ॥ अतः परिहारो ज्यनहो इ
प्रबलस्यारिषु विषये बलात्कारोदएवश्चिराच्चिरकालेनापियः सयोमाभूदिति भावः ॥ बलिः स्वयं
सिद्ध्ये भवतीति शेषः अविमनसो विमनसः संपद्यमानाः कृताः विमनीकृताः सततः सौमनस्यं प्रापिता इत्यर्थः अर
मनस्कचक्षुश्चेतो रहोरजसां लोपश्चेति च्विप्रत्यये सलोपो अस्य च्वावितीकारः शोभनं हृदयं येषां सुहृदो मित्राणि
सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः छंदस्याभिप्रायस्यानुवृत्त्या चित्तानुवर्तनापि दुः साध्याः अवर्जयितुमशक्
याः इत्यर्थः अभिप्रायकंधंदः आशयइत्यमरः शत्रुरेव नापि वशगो भवति मित्रं तु वैमनस्येन साम्नापीस
र्पः ॥११९॥ ननु सुहृत्कार्यात् स्वकार्यं बलीय इत्याह ॥ मन्यस इति ॥ नाकिनां देवानां प्रीतये अरिवधः श्रेयान् प्रश
स्यतरः प्रशस्यश्रः इति श्रादेशः इति मन्यसे तर्हि पुरोडाशभुजां हविर्भुजां अतएव नाकिनां इष्टमीप्सितं कर्तुं इत्येकर्म
णिकः इष्टमिष्ट्या गर इतियाचत्र यज्ञेभावे क्तः वचिस्वपीत्यादिना संप्रसारणम् अस्मात्तरां प्रतिपर्यपि अध्यायात्

सं०५० २९

श्रीहरीश्रीरुवाच्छ्लुवचे इति विकल्पादाम्प्रत्ययः आतपत्रांतर्हितस्य द्वयैरपि पादैः स्पृष्टप्रशाख्यत्वादि सर्पः जगत्पूज्यस्य हरेः पादेन स्पर्श सं०३
निषेधादिति ध्वनिः॥२॥ अथ चामरधारणमाह॥ मरालेति॥ मरालस्य त्रामलं विशदं तद्विशदं इषुपमा चलद्धि जनादिति भावः आ
मरयोर्द्वयं मंतरेणस्थितः द्वयस्य मध्ये स्थितः इत्यर्थः अंतरांतरेण युक्त इति द्वितीया सत्परिः अभितः पातु का उभयपातिनी सिद्धसिंधु
राकाशगंगायस्य सः पर्यभिभ्यां चेति तसिप्रत्ययः सर्वोभयार्थे वर्तमानाभ्यामिष्यत इत्युभयार्थं ते सुप्सुपेति समासः पातु केति अभिला
षयते सादिना डकत्र प्रत्ययः तस्यां वुरजोः अभ्रतापूर्वमभ्रतापुर्वां सुप्सुपेति शयेति समासः तांश्रियमेजे तादृशीं श्रियं शोभां भजे इत्यर्थः
अतएव निदर्शनसत्तानुराशेः संभावनमात्रो ता अभितः पातु कसिद्धसिंधु संबंध मूलया असंबंधे संबंधरूपातिशयोक्त्या स्वाज्जीव
वसयोगे सं कीर्यत इति संक्षेपः॥३॥ अथ चाक्षमिरस्य पसाधनविधिं वर्णयन्मुकुटधारणमाह॥ चित्रेति॥ अस्य हरेरुपरि ऊर्ध्वप्रदेशे मौ
लिभागे मौलिभाजां मुकुटानां तानां अणीयसीभिर्महतीभिश्चित्राभिरनेकवर्णाभिः भाभिः प्रभाभिः कर्तृभिः स्पृः प्रभारुक्रुचिस्त्विड्भा
भाश्छविर्द्युतिर्दीप्तय इत्यमरः सांतपत्सोमेषु गोइत्यादिना रोर्यपकारे तस्य रु हि सर्वेषामिति लोपः अनेकैर्धातुभिर्गैरिकादिभिः छुरि
तानां हरितानां अश्मनां मणीनां राशयो यो यस्य तस्य गोवर्द्धनस्याकृतिरन्वकारि अनुकृता तत्सादृश्यं प्रभाजीत्यर्थः पूर्णोपमे
यं॥४॥ कुंडलेत्यध्वंतेनाह॥ तस्येति॥ तस्य हरेरुरो वक्षः उल्लसंस्या कांचनकुंडलयोः प्रसृमरानां स्वच्छितानां गारुत्मतरत्नानां
मरकतमणीनां भासा दीप्त्या उरसि प्रसरं से सर्पः वाल्लभ्रशोभ्रवक्राहेण द्विला स्यपत्रप्रत्ययः तत्रोत्रित मम्पस्तं यत् नीलकंठपिंछं
मयूरवर्हं अभ्यस्तेष्वपि तन्याय्यमितियादवः पिंछवर्हे नपुंसके इत्यमरः तदेवोव चूलामौलिका तस्याः केलनामामोच्चनमवमो
ति॥ तद्धरिं मंदरकूटकोटिव्याघट्टनामंथाच्चलशिखराग्रसंघर्षसे कोतेन घ्राणेन ल्लेखना तया मणीनां च हीयसा बहुतरेण प्रिय
स्थिरे सादिना बहुशः द्रष्टव्य सुनिवं सादेषः दीप्तिविताने केन प्रभापटलेन उल्लसंतीदेदीप्यमाने आच्छिन्ने यो नुमितिनुभागमः अंग
देके पूरे केयूरमंगदे तुल्येइत्यमरः चकासयामास तुः शोभयांचक्रतुः अंगदे धृतवानरूप्यः चकासते एर्यतल्लिटि आमप्रत्यय
सौ रनुप्रयोगः तत्रांगदयोर्द्वयोः प्राग्भावीयांगदमैदोक्तिमपेक्ष्य तयोः मंदरकूटकोटघसंबंधेपि संबंधो तथा द्वयोरतिशयो त्यः संकरः॥५॥
२९

निसर्गेति॥ असौ हरिर्निसर्गैरलैः स्वभावलोहितैः किंच वलये कटकेकरवलयोस्थियामि समरः तयोरवद्ध नां प्रसुतानां अश्मनां प
संरागाणां रश्मि छुरिते रत एवापि सुरारोर्हरणपकशिपोर्वक्षसो विदारणेन जाते आविर्भूतं तत् असृक् तेन अनुषक्त संस्पृष्टैः सितै
उभावितितमालवल्लीं संस्थामुक्ते आसजितमुक्तालते मौक्तिकसरो यस्मिन् ततः अस्य हरेर्वक्षः आकाशगंगायाः पयसः उर्मी प्रवाहे
भावः मुक्ताहारं धृतवानित्यर्थः अत्र व्योम्ना गंगाप्रवाहद्वयासंबंधेपि संभावनया संबंधकथनादतिशयोक्तिः तदुत्प्रेक्षा ता
पतितयदि स्यादिना लोट् तत्र त्योमा उपमीयते समीक्षियेत् नास्योपमाने किंचित्तद्वस्याम इतिय
उभानिति॥ तमालवल्ली ... तदुत्तप्रवालो
इत्यर्थः पयोधरं भसो सारस्य विकारः सारमयः मणिः समुद्रमपनोत्यः कौस्तुभाख्य इत्यर्थः दधे धृतः प्रजधारणे कर्मणि लिट् य च मणे
विगतः प्रतिबिंबगतो लोकचायप्रपंचः तदंगे तस्य हरेः शरीरे साक्षाद्भूतो बहिः प्रतिफलितः कुक्षिस्थ लोक इवालस्पत इवेस्युत्प्रे
क्षा॥९॥ मुक्तेति॥ अस्य हरेः मुक्तामयं मुक्ताप्रचुरं तत प्रकृतवचने मयट् सारसनं कटिसूत्रं चलवत इति सारसनाबलेवी
क्षीबेसारसनं चाथ कटिसूत्रेष्वंसखलंत्रिषु इत्यमरः आप्रपदं प्राप्तौ तीति स्थप्रत्ययः आप्रपदीनं पादौ पर्यंत विदाम मुक्तासारः अंगुष्ठ
ननिस्पृतेव विसष्टमि सर्पः गौरार्थवाज्ञान्यहेयचाद्दरीनिष्यूतो क्रीर्णवो तादिगौणवृत्ति व्यपाश्रयं अतिसुंदरमन्यत्र गम्याय
केसांविगाढ तत इति उर्ध्वेर्ध्वप्रवाहं उत्क्षेरुन्नं तति स्रोतसो मंदाकिन्याः संततधाराः अविछिन्न संपातं अमर्त्य इवभाति स्मेत्युत्प्रेक्षा॥
१०॥ स इति इंद्रनीलस्यशलमिव नीलमूर्तिः शामांगः सहितायां रोरीति रफलोपः ढ्लोपेपूर्वस्य दीर्घः इणः इति दीर्घः कर्पूरहरि तालमिव
पिशंगमासोयस्य सः पीतांबरः हरितालं कर्पूरमिति विजयतीति सहपि विस्तरे विसर्गादेः इण्न प्राजि सतिभ्यः केरप् अंगुरुलाम
वैदुज्ञानां विपूरजोभिः परागैः चित्रवर्णः यमस्य सूर्यमनायाः उदकस्य भारः पूरः उदभारः सइवराजमेधमिदत्तेसादिनावि कल्प्य हादु
दकशब्दस्यो दादेशः॥११॥ प्रसाधितेति॥ प्रसाधितसालंकृत स्याप्यमधुद्विषः हरेरन्यैर्वा सदृशी विभिन्ना वा अन्यो विभिन्ना सदृशौ
इत्तिवेजयंतीलक्ष्मी प्रभाशोभाचशोभा संपत्ति प्रभासुलक्ष्मीः श्रीरवगम्यत इति विश्वः अमहदिसे तत्प्युक्ते कुतः हि यस्मात्तसा

प्रसाधनलक्ष्मीरशेषवपुषि असीतिशेषः किंत्वाखिलकोलस्यकांताप्रियाइ[illegible]ततरानिसा तु अन्यस्यकांताप्रियानभवतीसनन्
न्यकांता किंतु तस्यैव सर्वथा किं चउरस्यैव वसती सर्वाः अत्र हरेः प्रसाधनादसाधारणशोभा समाजायतेति परमार्थिकोवा व्यत्यः
अत्र लक्ष्मीशब्देन श्लेषमहिम्ना वान्यायाः शोभायाः प्रतीयमानया श्रीदेव्याः सहाभेदाध्यवसायाद्वितीयमन्येवलक्ष्मीरिति भेदा
भेदरूपातिशयोक्तिः ॥१२॥ अथैनमेवार्थं भाग्यंतरेणाह ॥ कपाटेति ॥ कपाटवत् विस्तीर्णमनोरमे उरस्यलेपिता श्रीरिति लेलना
कांता यस्य तस्य हरेः हरेरानंदिताशेषजनाः यया सा सर्वांगसंगिनी अत एवापरेव सा अपि साधारणी च श्रीदेव्याः अन्येव लक्ष्मीः
शोभा रमा च बभूव स एवालंकारः प्रायेण कार्यमध्ये नैकश्लोकमुक्तिविशेषलाभात् लिखतिकवयः यथास्त्रेवबधे प्रादावेवति
पीये सादिश्लोकद्वयं तथा स्वकेलिलेशैः स्यादिश्लोकद्वयं ज्ञेयमिति ॥१३॥ अथ पदवीत्सहतस्यैवास्य यात्रेति सूचयन्प्रसाध
विधेः नैःफलमाह ॥ देवेति ॥ भूसत्तामपेयुषां ननु प्रहारेण तामितिभावः देसा पिपसहिरएव कद्विपोः प्राणमुषां प्राणहारिणां व्रजा
पिक कठोराणामिसर्थः नखानां अश्वत्तेतनत्रणेन प्रकाशो व्यक्तः कार्कश्यमेव गुणो ययोस्तौ स्तनौ स्तनान्निसर्थः जातावेको
वचनेप्राप्ते जातिभूयसा स्तनादिषु जातिद्वित्वविशिष्टत्वात् द्विवचनं यथाह वामनः स्तनादीनां द्वित्वविशिष्टा जातिः प्रायेण
तिदधानौ स्तरः एषः युवतयः वयसि प्रथमेइति ङीप् एनं हरिं परिवब्रुः अत्र हरिस्तनानां हरिपिनखमेदेप्यभेदोक्त्या स्तनयोः
तादृक्कारिन्या संबंधेपि संबंधोक्त्या चातिशयोक्तिः स्तनयोः सोपदत्वात् संकरः ॥१४॥ आकर्षतेति ॥ अभुक्ततताद्भुताः ऊर्ध्व
माकर्षेत्वनमत्तमध्यं उन्नयतेवस्थितनेति उत्प्रेक्षा अतिगुरुत्वं अतिवृद्धं च भजतीति तद्भाक्भजोण्विः तं नानानानाकुचमंडलंअपि
कृशीयान् अयंते कृशतरः तनीयानिति गुरुमत्तोत्तलादत्वेवारिति रेफादेशः मध्यमित्तां तेउलूंतैः पीडितस्वनतनानामन्ततः अ
नमं तत्प्रत्यक्षमध्यंकुचमंडलयोर्विशेषणसामान्यादविजिगीषुः राजप्रतीतेः समासोक्तिः तथा च वाच्यवाचकवास्योप्रतीयमा
नाभेदेनाकमणक्रियाकर्मकत्वान्नावयान्नप्राप्तितेयनमनाकमणहेतुत्वाद्वाक्यस्यस्तनयोः संकरः उत्प्रेक्षया स्तनैरपेक्षातत्संस
ष्टिरेवेति विवेकः ॥१५॥ याच्यामिति ॥ धिको हरिः यायां भंगं नालिंगनीससयोरिति विरकार्यद्विभाविःएकपदं चैतत् पेक्षतसापूर्वबद्धिमावका
तराक्षीसाध्वसाचकिततलोचनासती प्रियानन्ममुरलीव भूव अनेन कार्यद्वारा लज्जा साध्वसभावादयउक्तः अन्यासां ईर्ष्याभावोदयमाह

तेनैवदोषेण समुद्धतोदपक्षः सहायोगरुत्पक्षः पार्श्वगरुत्मान्यासहायवलमितिद्वितिवैजयंती चलितोऽस्थिरो
दुर्वलपक्षपरिग्रहो यस्य सः अस्तु हृदरः शत्रुवर्गस्तवदुरासदो वीर्य विभाव सौतितेजोवहौ वीजेशुके प्रभावेत्रतेजो
तोः समर्थ्ययोरपि सत्त्ववह्नीविभावसू इति विश्वामरोगालभतांपतगतंसमोपतंगपालभाविसमरः लभतांगध्वंतु
रूपकालंकारः द्रुतविलंबितवृत्तं ॥ द्रुतविलंबितमाह नभौभरौ वितिलक्षणं ॥११८॥ इतीति ॥ सनरकरिपुरितीस्थं विश
कलिताथी अनुगतनयमार्गांनीतिमार्गानुसारिणीं दुर्नयस्यवलभद्राव्युत्संस्पतिभावः अर्गलां निवारयित्रीमि
तिनैधर्म्येण रूपकालंकारः तद्विधुकुप्त्रोगलितनमाद्समरः अत एव जनितमुदं हरेः कृतानंदामुद्धितेउक्तेतेउरस्य
लेनियतनिषण्णयान्निसविश्रांतयाश्रियापुतानात्वैनेतिमनगुप्तिःउद्धस्यमंत्रोद्धवीणनांपूर्वोक्तां वाचं अशृणुव
न भाषायां वदस प्रकृतइतिक्वसुप्रत्ययः उक्तेरेवउक्तेकेरुक्तेतःसनअव्ययसर्वज्ञामन्त्राप्तेरियकअप्रत्ययः उद्
स्पादासनादुत्थितवान् उदोनूर्ध्वकर्मणीति तस्यप्रयुदाहरणमेतत् रूपकानुप्राणितोलंकारः मालिनीवृत्तं नन
ययुतेमालिनी भोगिलोकैरितिलक्षणात् ॥११२॥ इति श्रीपदवा॰प्र॰वा॰रा॰वा॰प॰वा॰श्रीमहोपाध्यायकोलाचलम
ल्लिनाथसूरिविरचिते माघव्याख्याने सर्वंकषाख्ये द्वितीयः सर्गः ॥२॥ कौवेरेति ॥ अथो द्ववावाक्य[illegible]चरणेनतरमपेतायुर
द्धेः अभिनिशेत्यत्राह यस्य सः श्रांत कोपदसर्थः अत एव सौम्यः प्रसन्नः अत एव कौबेर्या दिशो भागस्तस्यामिसर्थः स्थियापुंवदितादिना
पुंवद्भावः तमपास्य अगस्त्यस्य मत्सं सार्गभवतीर्णो दक्षिणयां सामिसर्थः तद्धर्य उष्णांशुरिव स्थितः अनेन हरेः कोपः कार्यवशा
दाकालमतसंभितोन्ते कांतादिचतरतिसंचितं हरिः श्रीकृष्णः हरिप्रस्थामिन्द्रप्रस्थं इन्द्रोद्धस्यवचनात् हरिरिति हलायुधः समयोपयिकअस्पदस्यान्ने
पदेदेशकालाध्यगतव्याकर्म सज्ज्ञा सुकर्मणामितिगंतव्यकर्मं सुउपमालंकारः ॥१॥ अथास्य प्रस्थानसन्नाहंवर्णयन्नादौ छत्रधारणमाह जगदि
ति ॥ अर्को जगत्सृष्ट्यं तेहरिः अत एव जगतपवित्रैरपिपादैः चरणैरेव अस्पृष्टुनअस्पृष्टशुतनातेतयुजेदिवादिकात्कर्तरिलङ् उतअस्य हरेः चलत्त्वि
पुलेपार्वणचन्द्रचारुपूर्णेन्दुसुंदरंरसुपमालंकारः आतपात्त्रायतइत्यातपत्रेछत्रं सुपीतियोगविभागात्कः विभरांबभूवबिभ्रेभृञःकर्मणि लं८

स्य आपूरः आपूरणं तेन कृते जनिते निध्वाने दध्मानः अप्रधानोऽपि मंदमारुतस्य प्रवेशादेव ध्वनन्निति पाठे वा शङ्ख्योक्तिः ध्वनेः सं
बंधेऽपि संबंधकथनात् पंचजनो नाम कश्चिदसुरस्तस्मिन्नभवः पाञ्चजन्योऽस्य शङ्खः वह्निर्जनिभ्यक्षेति वक्ष्यमिति एष त्रास्य
अश्रूयत श्रूयते स्म पाञ्चजन्योऽपि संनिहितोऽभूदित्यर्थः वीणाश्रूयंते पुष्पाणि प्रियंते इत्यादिवत् धर्मधर्मिणोरभेदोपचारा
त्पाञ्चजन्यश्रवणोक्तिः ॥२०॥ रराजेति ॥ महान् रथो यस्य सः महारथः रथिकविशेषः आत्मानं सारथिं चाश्वान् रक्षन् युध्ये
त योनरः स महारथः संस्मृतः स्यादित्यनुनीतिकोविदाः इति रथांगं चक्रमस्यास्तीति रथांगी हरिः इष्टसिद्धेः संपादकेन
प्रेणत्वात्पुष्यः सर्वथा साधक इति शास्त्रादेवेति भावः सर्वासु दीक्षु अप्रतिविद्धमार्गः अनिरुद्धगमनमित्यर्थः अपिच्छत्र
केनिरंकुशत्वात् पुष्योतत्सोमिव मघाछिन्ने च नहार्यातुः सर्वादिग्द्वारिकाभानीणीति शास्त्रादिति भावः क्षिप्रं क्षिप्रगा
मिनेऽनन्यत्क्षिप्रं क्षिप्रकारिणं क्षिप्रं चाश्विदेव पुष्यमिति शास्त्रात् पुष्यरथं कीडारथं असौ पुष्यरसकीडायनेस्यान्नसमय
रामयदि समरः अधिरूढः सन् पुष्यरथइव तं पुष्यरथमधिरूढः पुष्यनक्षत्रयोगतः स्वपानाध्यक्ष्ये दृढइव रराज ॥२२॥ ध्वजेति
अपरथविरोहानंतरं शौरेः कृष्णस्य ध्वजाग्रधाम यस्य सः मणिमेदिनीषु कुट्टिमेषु संक्रान्तमूर्तिः प्रतिबिंबितांगः सन्
पन्नगारिर्गरुत्मान् फणावतः सर्पान् त्रासयितुमीषयितुं रसायां रसातलं पातालं विविक्षन् प्रवेष्टुमिच्छन्निव स्थितो भ्रान्त्या विशते
संनताल्लटः शत्रादेशः तस्य हरेः सवेपथुः दृदृशे दृष्टः सोऽपि हरेः संनिहितोऽभूदित्यर्थः ॥२३॥ यियासतइति ॥ यातुमिच्छतो यियासतः
सतः यातेः सन्नन्तात् लटः शत्रादेशः तस्य हरेः सवेपथुमहीधरतीति महीधाः पर्वताः मूलविभुजादित्वात्कप्रत्ययः इत्याह वामनः
महीध्रादयो मूलविभुजादिदर्शनात् तेषां रंध्राणि विचार्याति तेषां भिदा भेदनं पक्षिच्छिदादिभ्योऽङ् तस्यां भिदायां पटीयान् समर्थः
तरःप्रकर्षप्रमाणेनानिलाणघोषः महार्णवस्योघः प्रवाहः अन्यानि जलानि जलानि तराणीव स्पृशन्तीति समासः अन्यान् शङ्खान् शङ्खो
तराणि पूर्ववत्समासः अतएवान्यकारस्य हर्षे तानि च कपस्या इष्टदयामास इत्यर्थः अन्तराशङ्खादेतद्विनार्थाततत्करोतीति एषता
लि रन्ध्रेतरमवकाशं अपिपिधानो तद्विभेदता दर्व्याः इत्युभयत्राप्यमरः ॥२४॥ यतइति ॥ जगतां पतां धारयिता कुक्षिस्था
खिललोकः कृतकर्मणोः कृतीति कर्मणि षष्ठी सहरिर्यतो येन भूमौ भागेन जगाम ततस्तस्मिन् भूभागे अधःपतालेषु ३१

रिणाः धर्त्र्याः धारयित्र्या पूर्ववत्षष्ठी फणिना शेषेण महता भारेण आसमंतात् भुग्नस्य कुब्जीभूतस्य शिरःसत्त्वस्य सहायि
के सहायकर्मणि योग्यया तद्गुरुपीतमाड्कुत्रव्यमाक्षेरमाणाः भुजा यस्मिन् कर्मणि यथा भवति तथा प्रसभे प्रसन्तं भावे
लिट् हरिश्च आलइत्यर्थः अत्र शेषस्य विशिष्टप्रस्तुणा संबंधेऽपि संबंधाभिधानादतिशयोक्तिः ॥२५॥ अप्येति अथ हरिस्कन्ध
नानंतरं उन्नैकैरुन्नतेतोरणे द्वारि द्वारदारुणि संसगेन भंगस्त्रस्मादृयेनानन्नमीकृतानि केतनानि ध्वजा यैस्तानि
सैन्यानि सोमस्यान्वयः संतानस्तेसोमान्वयं वंशं वंशस्य रूपं हरिं सुनीतिभाजं सुष्ठु नीतिमन्तं तं क्रीयाः समाप्युपाय
प्रयोगास्तासां फलानि हिरण्यभूमिप्राप्त्यादिलाभाः इवान्वयुः अन्वगच्छन् यातेर्लङ् लटः शाकटायनस्येति सेर्जुसादेः
श्यामेति ॥ श्यामानि च तान्यरुणानि चेतैः श्यामारुणैः कृष्णलोहितैः वर्णैर्वर्णेनेति समासः वारणदानतोयैः गजमदो
दकैरालोडिताः संमेलिताः अतएव क्षितिकंटपद्मसोदाः मयूरवर्हचूर्णा इव व्योततइति श्वेतवो कोः क्षिप्रपुपमालंकारः
कांचनस्येयं कांचनी चासौ भूश्च तस्याः परागाः पांशवः आनेमिभ्यः आनेमिप्रापि सहितं चक्रधाराप्रष्ठिर्नेमीत्यमरः
आरथ्योदाभिविध्योरिति अभिविधावव्ययीभावः भगैर्नरथ्यो वैश्चप्रस्तुदिरेपिसाइत्यर्थः परागाणां विशिष्टपुष्पेण संबंधो
ऽतिशयोक्तिः तथा महतीरथगजसंपत्तिर्व्यज्यत इत्यलंकारेण वस्तुध्वनिः ॥२७॥ अस्रच्छस्तु लोहादिषु पद्मातिष्ठास्य सह्या
पदेसुवर्णेरुक्मकार्तस्वरं जांबूनदमष्टापदोऽस्त्रियामिति सुवर्णपर्यायेष्वमरः तस्य भूमिः तस्याः रेणुः कांचनभूमिरजः पा
दहताविरथ्यास्यादिचरणताडितापि संनिहित इत्यर्थः महाजनानां बहुजनानां पूज्यानां नागरिकानां शिरांसि न लपयामास
नाक्रमतिस्म किं बहुना उद्धतिउद्धतत्वं दर्पं च नैवाजगाम कुतः यस्माद्धरिमेत्रा गुरुत्वगुणस्य महात्म्यस्य प्रियस्थिरे
सादिनागुणोगरादेशः सदृशमनुरूपं यथा तथा अचेष्टत आचलत व्यवहारश्च गुरुत्वस्यैवोद्धत्वप्रतिबंधकत्वादिति
भावः अत्रानौद्धत्यादिप्रस्तुतवर्णपरागविशेषणसाम्यादप्रस्तुतसज्जनप्रतीतेः समासोक्तिरलंकारः ॥२८॥ विरुध्येति ॥ तुरं
गान्वयदुमिरारुद्धैरिति भावः कथंचिद्दत्तप्रयत्नेन निरुध्यमानोऽपि वल्गाकर्षणेन कार्यमाणः आपिपयचस्मादस्मादगाणि

न्तेषां दाक्षतानवादान् तस्मान्महत्त्वाद्यः गुणगुणिनोर्भेदाभेदयोगादिति वा मनःस्थ आत्मसमाना अपि करणसमासस्य
मुकुरस्थित्वा क्षिपुरक्षिप्रवृत्तः ततस्मान्मार्गरूपं तीति मार्गरूपः मंदागमनेन मार्गरोधिनः किंपु गुरून्महतः पुरु
न्यायाः अलंध्यानपीति भावः करीन्द्रान्नु तल्लंघयंतु मीषुः इध्रुं तीस्म धुवमिवं सुखेक्षा गुरवोपि समार्गप्रतिरोधप
कोः परैरुक्तंपश्यत इति अलंकारे एवस्तुध्वनिः॥२२॥ अवेक्षितानामिति॥ आयताम्रा रुणा वल्गामुखरज्जुर्यस्मिं
न्कर्मणि यथा तथा प्रयत्नेन रिनेरुद्धा वा हावाजिनो यैः सैः वाजी वाहार्वगंधर्वसमरः तुरंगिभिरश्वाद्भिरग्रेपुरो
देशे अवेक्षितानाऽऽलोकितान् रेणुभिः प्रक्रीडं तीति प्रक्रीडिता स्तान् पांसुक्रीडाकरान् पृथुकान् शिशून् पृथुकः
शावकः शिशुरित्यमरः जनन्याः स्तूर्णमेव सविधि ऽन्यानि न्युः अपसारयांचक्रुः इति स्वभावोक्तिः॥२५॥ दिदृक्षितेति॥०
नेपदं जनौघाः रथ्यां रथ्या इति प्रति रथ्या प्रथार्थेऽव्ययीभावः आरात्समीपं आराद्दूरसमीपयोरित्यमरः ईयुराजग्मुः
ईक्षणोत्लिरदीर्घः इणः कितीसंप्रसारणदीर्घः ननुनिसपरिचिते कादिदृक्षेति अतआह अनेकशः बहुवारमित्यर्थः
न्ययरत्यमरः अनल्पा अपि का प्रीतिः प्रेमकत्रीं नवे नवे आभीक्ष्ण्ये नवं नवं करोतीति निरुक्तीकृत्याऽरिति द्विभावः अ
लोशब्दपूर्णस्यापिन्नुतन्नुमिसात्कार्यं परमप्रेमा स्यादं वस्तुदृष्टमपि अदृष्टपूर्वमिव पतिक्षणं दिदृक्षतेरसर्थं
भंगीगवानपि तथैवेति सामान्येन विशेषणसमर्थनरूपोऽर्थांतरन्यासः॥२६॥ उपेयुषइति॥ विहिता नमिष्टा अत
एव तस्यां पुरि नागर्याः दत्तचक्षुः निसदृष्टिः असौ हरिः निरंतरं अभिर्निरंगाभिर्नीकीनीभिर्सनाभिः निरुपप्लासमर
तिसकंठं व तोरं उपेयुषः प्राप्तस्य रथ्यस्य शनैर्यातं संधानेन मंदगमनेन विदामास नविवेद उदविद जागृध्योऽऽ
न्यतरस्यामिसाम्प्रत्ययः आसंगात्दसं वदने तद्धनादिति भावः आसंगस्य पदार्थहेतुत्वात्पदार्थहेतुकं काव्यलिंग

चार

अन्यान्यनपेक्षितागतानां आकृतैर्व्याकृतात्क्रमाः सक्रमः परोत्कर्षात्क्रमे व्यस्तादितिलक्षणं तदंतरे तस्मिन्नवसरे अनीक्षणा
वसेकीवेत्तुमध्येकारोता दर्शं वसेरविधाविति वैजयंती निःशंके तदनीक्षणं दृष्ट्वचित्रासंसमं युगपत् कटाक्षैः अमुं हरिं जघ्नुः स
रोषमदाक्षुः॥२७॥ अथपं न्वभिरस्याद्व्यास्य संनिधानमाह॥ तस्येति॥ अतसीसूनेन क्षौमाख्यकुसुमेन समानभासः तुल्यकांतेः स्नि
ग्धश्याम इत्यर्थः अतसी स्यादुमाक्षुमे इत्यमरः तस्य हरेः एकवाहुः भ्रामयदावर्तमानं मयूखमाववलीनां मंडलं चक्रवालं यस्य तेन च
केण सुदर्शनेन स्फुरन् महानावर्तो भ्रमो यस्य सः स्यादावर्तोऽभ्रसां भ्रमइत्यमरः यमुनाजलानां पूरइव रेजे चक्रं दधौ इत्यर्थः
॥१७॥ विरोधिनामिति॥ विरोधिनां वैरिणां विग्रहभेदं शरीरविदारणं दक्षा शरीरं च वर्ष्म विग्रहइत्यमरः क्वचित्का पिअ
स्खलंतीसर्वदाऽप्रतिहतवृत्तिरित्यर्थः संनिहिता अनपायिनी अतएव मूर्तिमती शक्तिः सामर्थ्यमिव स्थिता तस्य कौ
कौमोदकी गदा तस्य हरेः अग्रतः निःकामं मोदयति स्म स्वसंनिधानेनेति भावः॥१९॥ नेति॥ अन्यस्य साधारणः समस्तजनस्य
न भवतीत्यनन्यसाधारणः अतस्य भावस्तत्ता तां दधानः तथापि यो नंदकः स्वतया केवलं गजाद्भवदसाधारणे नैव मु
रारे नैमुरारि सेवधिनां किंतु वैरिणां शत्रूणामसं तमुद्धेजयिता सन् अतएव नान्यापि नंदयतीति नंदकइत्यन्वर्थसंज्ञावा
लोनापि नेदयितृत्वमपीतियावत् तस्यैवयोऽनन्यसाधारणत्वात् तस्यैव स्वपरोद्वेजकत्वात् तस्यैव केवलं नंदकानंदयिता
नेत्यर्थः सनंदको नंदकाख्यः खड्गोऽभूत् संनिहितोऽभूदित्यर्थः संबंधानुबाधेन संविधानामेवात्र विधेयं प्रकरणाद्वा
नन्यसाधारणत्वपरोद्वेजकत्वपदार्थाभ्यां विशेषणगत्या नंदकस्य तदीयतासमर्थनात्पदार्थहेतुकं काव्यलिंगमलंकारः॥१९॥
ननीतिमिति॥ अन्येन पुरुषांतरेण नतिमाकर्णनं मे देनस्यात्कुत्रचित्कदाचिदपि ननीतं न प्रापितं तत्क्रियासुरक्रियासुरण
कर्मसु हिताहितसु चेष्टेषु चकर्णांति के कर्णगोचरं प्राप्तो गुणमौर्वी आत्ममर्मात्मयस्य ततत्विधेयं विधातुं गतं दृष्टीयोदृष्टेत
रपीडासहनपरप्रीतियावत् संगस्य विकल्पश्चार्ङ्गं नाम मित्रमिवास्य हरेरंतिके संनिहितमभूत्॥२०॥ प्रवद्धेति॥ विद
रातीति धीरो मनोहरो मंद्रो गंभीरो वृंदस्येव धीरःश्रेनादः प्रवद्धेयेन सः प्रवद्धमंद्रो बुद्धधीरनादइत्युपमाक्रमेण काणेव
तास्याध्यर्णं चहरेरंतिकं चारित्रपकं दाति कोति का मध्ये इत्यमरः सव्यासावेकहंसश्चेति किलत्वपरंपरीतरूपकं मंदानिल

स०क०
३२ स्यांगभर्त्रैच कुधारायत्हरयेऽभिनवं यथा तथा प्रतिपादितायाः अंकेः समीके उत्संगश्च तत्र जातः अंके समीपउत्स
गे चिन्हे स्थानापराधयोरिति केशवः यस्याः पुरः उपकंठं मतिके अस्ते तसंयोगे द्वितीया अन्यत्र उपकंठे विभक्त्यर्थेऽव्य स०३
यीभावः मुक्तः प्रेम्णा रत्नावली रावणं यया अमुमोच्यत्र श्लेषानुप्राणितेयमुपमा॥३६॥ यस्यामिति॥ चलंतीनां काचिष्प
वारिवीचीनां घटा सुपरंपरासु उच्छलद्भिः रत्नच्छटाद्भिः शंखानां कुलैरा कुलेन संकीर्णेन यस्याः पुरोवप्रेण प्रका
रेण पर्यंतचारः उडुचक्रः समीपवर्तिनक्षत्रमंडलं यस्य सः सुमेरोर्वप्रः सानुः सानुप्राकारयोर्वप्र इत्युभयत्रोऽप्यमरः नि
अहनिशं अन्वहं अव्ययं विभक्ति सादिना यथार्थेऽव्ययीभावः अनश्चान्नपुंसकादन्यतरस्यामिति समासांतः अ
न्वकारि अनुकृतः तत्साम्यं प्रापि ज इत्यर्थः मेरूपमानवप्रस्य तत्तुल्यमौन्नत्यं व्यज्यते॥३७॥ वणिक्पथेति॥ य
त्र यस्यां पुनि काणिजां पथि वणिक्पथे आपणे अपूगाः पूगाः संपद्यमानानि कृतानि पुंजीकृतानि अत्र पूगशब्दे च्व्यर्थ
ताज्ञेया पूगे ईकारनस्यात् कृतः अप्याद्रीनां कृताद्रिभिः सह समासात् इतोरित्यर्थः अप्याद्रयः कृताद्रिभिरिति स
मासः अप्याद्रिषु च्व्यर्थता आलोल चलद्युतिभाञ्जि स्थिरप्रभावंति रत्नानि लोलैः चलैः अत एव भ्रमागतैः जलनिर्गम
मार्गागतैः भ्रमप्राप्तैः जलनिर्गम इत्यमरः अंबुभिर्मुष्णन् अपहरन् अंबुराशिरर्णवः जलमात्रसारोपीतिभावः रत्ना
करतामवापन्नत्प्रागितिभावः अंबुराशेः आकररत्नसंबंधेऽसंबंधोक्तेरतिशयोक्तिः तया च पुर्याः समुद्रातिशयनीर स्तरंतीरं
त्नसमृद्धिर्वस्तु व्यज्यते॥३८॥ अंभ इति॥ अत्र च पुरि अपां निधिः समुद्रः अंभश्च्योतंती तैः अंभश्च्युतः जलस्राविणः
अत एव कृत्नपि नद्धभासः पिहितकांतीनपि पूर्वाह्णे सूर्यकांतमणीन् अर्कः वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरिति अ
ल्लोपः कोमलान् उल्कायान् रत्नराशीन् आतपे दातुं शोषणार्थं निधातुमिव फलोत्प्रेक्षा तल्पे इति अधितल्पं त
ल्पशय्याट्टदारेषु इत्यमरः विभक्त्यर्थेऽव्ययीभावः तरंगैरेव हस्तैर्विस्तार्य प्रसारितवान् अत्रातपदानस्य तरंगहस्त
३२

स्तासाध्यत्वेनोत्प्रेक्षारूपकयोः संकरः॥३९॥ यदुत्तालमिति॥ सागरस्य ऊर्मिभिः कर्तृभिः यस्याः शालेयस्याः प्राकारः प्रका
रो वर्णशालवप्र इत्यमरः उत्तुंगया उन्नतत्वेन गुणेन जेतुमिवेत्यर्थः फलोत्प्रेक्षेयं व्यंजकप्रयोगाद्गम्यत्वं दूरादुदस्थीयत
स्थितं भावे लिट् अभ्यासगतैः समीपगतैः समीपनिकटाभ्यासनिकृष्टनीडवदित्यमरः व्याहतो वांछितः शालत्वं विजेय
रूपोऽर्थो येषां ते विजयाभरित्यर्थः अत एव क्रीडादिवेति हेतूत्प्रेक्षा ऊर्मिभिर्विलिल्ये विलीनं लीयते भावे लिट् अत्रा
शक्तस्यापि अव जिगीषोर्व्रीडोदयात्सापेक्षत्वेनोत्प्रेक्षायाः संकरः॥४०॥ कुतूहलेति॥ अंबुवहतीति अंबुवाहः मेघः
कर्मण्यण् कुतूहलेनातः प्रवेशकौतुकेनेवेति हेतूत्प्रेक्षा जवाद्वेगेन यस्याः प्राकारभित्त्या सहसा निविद्धो निवारितः
अत एव बहिरेव रसन्गर्जन् दुःखात्केंदन्निति श्लेषः अंबुवर्षव्याजेन पक्षशमरोदीत् अश्रूणि मुमोचानूरुदिर
अश्रुविमोचनेलट् रुदश्च पंचभ्य इतीडागमः अत्रांबुवर्षव्याजेन रोदकस्योत्प्रेक्षेति सापेक्षत्वा
त्संकरः॥४१॥ यदंगनेति॥ यस्यां पुर्यां अंगनानां रूपं सौंदर्यं आकारो वा रूपं स्वभावः सौंदर्यमाकार श्लेषयोः
पीतिविश्वः यस्य सरूपतायाः सारूप्यात् द्वेदकव्यावर्तकं किंचिद्गुणं धर्मं मिच्छतीभिः अपेक्षमाणाभिः आच्छिन्नयो
नुमिति विकल्पान्नुमभावः अप्सरोभिः आराधितः प्रार्थितो मनुः मानुषसृष्टिकर्ता स्वाः स्वकीयाः प्रजाः निमेषःप
क्ष्मपातश्चिन्हं व्यावर्तकं तेन सह वर्तते इति सनिमेषश्चिन्हाः तेन सहेति तुल्ययोग इति बहुव्रीहिः चक्रे अद्भु
तमिदं तत्प्रेक्षातलेनाद्वंजसा द्वयोरित्यमरः अत्र स्वाभाविकनिमेषस्याप्सरः प्रार्थनाहेतुकत्वोत्प्रेक्षया द्धरकांग
नानां निमेषमात्रभिन्नमानुषसौंदर्यं वस्तु व्यज्यते॥४२॥ स्फुरद्धिति॥ यस्यां पुरि द्वारकायां सुवर्णदास्वरात्रिषु नार्यः
स्फुरद्भिः तुषाराशोश्चंद्रस्य मरीचिजालेश्चंद्रकांभिर्निरंतरं प्लुताः तदेकरूपतायत्ते अगरंप्रमाणं इत्यर्थः अ
त एव सामान्यालंकारः सामान्यगुणसाम्येन यत्र वस्तेतरैकतेति लक्षणात् स्फटिकानां सौधविकाराणां सौ

स०टी० ३४

धानांपंक्तीरारुह्य नभोगताः देव्यो देवांगना इव देवशब्दस्य पचाद्यचि देवट् इति यावत् टिड्ढाणञित्यादिना ङीप् व्यरा स०३
जन्सौधानां मुख्यत्वात् अभ्रंकषत्वाच्च तत्र लक्ष्मीणाः स्त्रियः स्वैश्वर्यईश्वरेजुरिसर्पैः अत्र नभोगततोत्प्रेक्षा याः
पूर्वोक्तसामान्यासापेक्षत्वात्संकरः ॥४३॥ कांतेदिति ॥ यत्र पुरि क्षपासु रात्रिषु प्रतिक्षपं विभक्त्यर्थेऽव्ययीभावः
कांतानि रम्याणि इंदुकांतोपलानां चंद्रकांतमणीनां कुट्टिमानि बद्धभूमयो येषु तेषु कुट्टिमं बद्धभूमिः स्यादि
ति हलायुधः कुट्टिमोऽस्त्री बद्धभूमिरित्यमरः हर्म्यतलेषु उच्चैरुन्नताः प्रणाल्यः जलमार्गाः द्वयोः प्रणाली पय
सः पद्व्यामित्यमरः अतः पातिनः अधःपातिनः पयोमुचः यास्ताः अधःकृतमेघमंडलत्वाद्दुच्चैरूपात्तादपीत्य
र्थः विरोधालंकारः पयसां समूहं पूरं ऊहुः वहंति स्म चंद्रकांतानि स्यंदंते इति भावः वहिर्लिट् वचिस्वपि इत्यादिना सं
प्रसारणं अत्र सौधानां प्रणालीनां च तादृशौन्नत्ये पयःपूरःसंबंधोक्त्यातिशयोक्तिः ॥४४॥ रत्नेति ॥ यत्र पुरि गे
ह्विति अधिगेहे इति विभक्त्यर्थेऽव्ययीभावः गृहिण्यः कुलांगनाः अत एव रक्ताः रतिकाले कृत्यादीपान्निशाम्य निवार्यशमे
भिलाषात् तद्धस्तायादेशभावात् क्षिपंत्यः जालागतान् गवाक्षमार्गप्रविष्टाम्भः जालं गवाक्ष आनाय इति विश्वः दूरात्प्रभवंति इति
वैदूर्याणि बालवायजमणयः वैदूर्यं बालवायजमित्यमरः विदूरात् प्रभवति वैदूर्यः अत्र विदूरशब्दो वालवायस्यादेशः पर्या
यो वा तत्रोपचरितो वा तेन बालवायाद्रेरसौ प्रभवति न विदूरात् नगराजत्त्र तु संज्ञियते इत्याक्षेपः प्रयुक्तं दुक्तं
बालवायो विदूरस्य प्रकृत्यंतरमेव च नैव तत्रेति वैदूर्याञ्जितारिवदुर्पान्वेरद्दितितेषां कुत्रेषु भितिषु सेकांताभ्याः इति शेषः
अत एव छायादेर्गत्यात् विडालेक्षणे च ज्ञीयंते इति मणिवणम्यः मर्यकराम्यः ददादित्वा कर्तरि ल्यप् प्रत्यये आपश्लिष्टितिम्यः
विम्बुः भीताः मौग्ध्यादिति भावः अत्र लज्जावरणार्थदीपनिर्वापणे केवलतदसिद्धेः प्रस्तुतमर्थं न्यात्पन्नामिति अनेनचो
त्पत्तिरूपो विषयभेदः विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् विरूपघटना चापायस्याद्विषमालंकृतिर्मतेति लक्ष

मा०टी० ३४

अथैकत्रिंशच्छ्लोकैर्द्वारकां वर्णयति ॥ मध्ये इति ॥ मध्ये समुद्रस्य मध्ये इति मध्ये समुद्रं पारे मध्ये षष्ठ्या वा इति विकल्पा
दव्ययीभावः मध्येशब्दस्य तत्संधानादेकारांतत्वं कांचनवप्रः सौहेमप्राकारप्रभया ककुभो दिशः पिशंगीः पिशंगव
र्णाः गौरादित्वात् ङीप् कुर्वती या पूः जलसमुद्रोदकं भित्त्वा उत्थितेति शेषः तुरंगकांतायाः वडवाया मुखे हव्यवहतीं
ति हव्यवाहोऽग्निः कर्मण्युपपदे प्रत्ययः तस्य वाडवाग्नेर्ज्वालेव उल्ललास उद्बभासे अत्र समुद्रांतर्वर्त्तिनीयां वडवान
लज्वालायां कदाचित् उत्थानाव्यमानस्य मध्योल्लसनस्य पुरि दर्शनाभेदाध्यवसायेनात्पीतस्य ज्वालत्वमुत्प्रेक्ष्य
ते इव शब्दाय मुत्प्रेक्षाव्यंजक एव नोपमायां इदृग्ज्वालात्र प्रसिद्धत्वेनोपमानत्वायोगात् मन्ये शंके ध्रुवं नूनं प्राय
परस्य वमादिभिरुत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोपि तादृक् इत्यान्यायदंडी ॥३३॥ कृतास्पदेति ॥ भूमिभर्त्तारां श्री
रीणां च सहस्रैः कृतास्पदा कृताधिवासा आस्पदं प्रतिष्ठायां निपातः उदकं अस्यास्तीति उदन्वान् उदधिः उदन्वा
नुदधावितिनिपातनात्साधुः तस्याम्भसा परिवीता परिवेष्टिता मूर्त्तिः स्वरूपं यस्याः सा पृथ्वी पृथुः वेत्तो गुण एव च नादि
ति ङीप् एवंभूता या पूः न निर्विद्यते न खिद्यते इति निर्विर्त्ता विदेः सत्तार्थान्निरपूर्वात् सूस्रुद्धिषेत्यादिना क्विप् तेन
अनिर्विदा अखिन्नेन अन्यथा शिल्पसौष्ठवासिद्धेरिति भावः विधात्रा सृज्यते इति पृथ्वी भूः पृथ्वीति च अस्रोणादिक
वि कौ रादिभ्यः इति ङीप् तस्याः प्रतियातना प्रतिकृतिरिव विदधे विहिता प्रतियातना प्रतिच्छाया प्रतिकृतिरित्यमरः
भूः प्रतिबिम्बितोत्प्रेक्षा या पुरो वैचित्र्या विस्तारादिवस्तूच्यते ॥३४॥ त्वष्टुरिति ॥ त्वष्टुर्विश्वकर्मणः सदाभ्यासेन गृही
तोल्लंघ्यः शिल्पविद्यायाः एकं संपदः प्रकर्षस्य सीमा अवधिः अप्रतिमा इति यावत् या पूः आदर्शतलामलेषु द
र्पणदलस्पष्टेषु दर्पणे मुकुरादर्शाविद्यमरः छायया प्रतिबिंबितमिव अदृश्यत उत्प्रेक्षा छाया यात्मनातपे कांतौ प्रतिबिंबा
र्कजायवोरिति वैजयंती ॥३५॥ रथ्यांगेति ॥ अंबुधिः पिता इव वरायक्रियाय जामात्रेऽन्यवरो जामातरविंगयोः श्रीरस्य

माघविवृतिः ॥

विचित्रैरालेख्यरहितैरपि सचित्रैस्तत्सहितैरिति विरोधः विचित्रैरद्भुतैरिति परिहारः आश्चर्यालेख्ययोश्चित्रमित्यमरः ॥ त्रुटि

नै०का० ३५

वलीकनीध्रे पटले प्रान्ते पटलं छदिरित्यमरः छादनपर्यायो पटलशब्दः तदन्ते लम्बमानानि वलीकनीध्रे छदेरा स०२
धारो वंशपञ्जरो गोपानसीति विवेकः अत एव हरितमणिनादिगुणानि निमित्तानीन्द्रैरिव वृत्तिस्वरूपोत्प्रेक्षा ॥४९॥ वृह
दिति ॥ यापूर्वहत्सु तुलाः उपरिस्थाप्यदार्वाधारभूतानि स्तम्भाग्रपीठानि येषु तैः वृहत्तुलैः तथाप्यतुलैः तद्रहितैरिति विरोधः अनुपमै
रिति परिहारः तुला साम्ये स्तम्भपीठे इत्यमरः अपि वैजयन्तीविततानामानामुल्लोचानां मालाभिः पिनद्धैरावृतैरपि अवि
तानैः तद्रहितैरपि विरोधाभासस्तैरपि विरोधः समस्तवस्तुसमृद्धैरित्यर्थः अस्यापि वितानमुल्लोचयवितानं त्रिषु तुच्छकमिम
भयत्राप्यमरः विगताः शालाः भद्राणि येषां तानि विशालानि शाला गृहैकदेशः स्याच्छालाशब्दः पेशास्यागारैकदेशयोरिति शाश्वतः तै
र्विशालैरपि सत्यवस्तैस्सहितैरिति विशालत्वप्रत्ययः गृहैः रेजे अपि रयं सर्वत्र विरोधो विरुद्धवदाभासाद्विरोधालंकारः विरो
धः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः इति काव्यप्रकाशलक्षणात् ॥५०॥ चित्रे इत्यादि ॥ यस्यां पुरि निकेतनानां विश्रमसप्रनि
केतनमित्यमरः कपोतान् पक्षिणः पालयन्तीति कपोतपाल्यः विटंका पुरनामानस्तम्भाग्रप्रसारितादारुविशेषाः कपोतपालिकायां
तु विटंकं पुंनपुंसकमित्यमरः कर्मणि अणि ङीप् तासु कृत्रिमपक्षिणां दारुमयपक्षिणां पंक्तेः कर्मणि षष्ठी चित्रेसया आक्रमि
तुमिष्टा या जिघत्सया सेत्यर्थः क्रमेस्सन्नन्तात्ल्लटप्रत्ययादिकारप्रत्ययेऽप् क्रमो रात्मनेपदनिमित्तइतिडागमो न भवति अत्र क्र
मेर्वृत्त्यादिव्यतिरिक्तार्थे वृत्त्यनुपसर्गाद्वेति वैकल्पिकत्वात्मनेपदनिमित्तस्यानुपसर्गत्वस्य वाक्यिकसंभवात् आयत आनतं
वा निश्चलमङ्गं यस्य तं मार्जारं विडालमपि ओतुर्विडालो मार्जार इत्यमरः जनैः कृत्रिमं क्रियया निर्वृत्तमेवमेने न तु वास्त
वमिति भावः द्वितः कृत्रिममिति त्रिमप्रत्ययः अनेन कृत्रिमाकृत्रिमभेदो दुर्गम इति शिल्पज्ञानातिशयोक्तिः अत्र
विकल्पितसादृश्यात् मार्जारजनयोः कृत्रिमाकृत्रिमेषु विपरीतवर्णनात् भ्रान्तिमदलंकारः ॥५१॥ क्षितीति ॥ यस्यां पुरि वधू
जनैः क्षितौ प्रतिष्ठा यस्य सः भूमिप्रतिष्ठोऽपि चन्द्रदिविस्थितमिति भावः अपि मुखैरेव अरविन्दे दधच्चकार इति विरोधः

३५

लावण्यमतीम्ना अधरीचकारेति परिहाराद्विरोधालंकारः अतीतानि नक्षत्रपथमिति अतीतनक्षत्रपथानि अत्यादयः क्रां
ताद्यर्थे द्वितीयेति समासः द्विगुप्राप्तापन्नेत्यादिना परवल्लिंगताप्रतिषेधः प्रासादशृङ्गाणि बलात् अध्यरोहत् मित्यात्र
धिरोहतिस्म अनपिरुह्येव अर्थः कारणादिति भावः रोहतेर्लुङ् शलइगुपधादनिटः क्सइति क्सः अत्र बाधः कारणवाक्यार्थ
स्य श्लेषविरोधानुपजीव्यत्वे वध्याहेतुना तत्संकीर्णः काव्यलिङ्गभेदः ॥५२॥ रम्या इति ॥ यस्यां पुरि युवानः रम्या रमणीया इति है
तोः पताकाः प्राप्तवतीरुच्छ्रितध्वजा इत्यर्थः अन्यत्र रम्या इत्येव पताकाः प्राप्तवतीः प्रसिद्धिं गता इत्यर्थः पताका वैजयन्ती स्याच्चमा
रके ध्वजेऽपि च इति हेतौ प्रकरणे प्रकर्षादिसमासि विशिष्टाः विविक्ता विजिना विमलाश्च इति हेतौः रागं अव
त्ययती विविक्तौ पूतविजनौ विविक्तौ भयत्राप्यमरः नम्रवल्लीकाः नम्रीनीकाः वलीकनीध्रे हमरः अन्यत्र नम्राः वल्यस्त्रिवल्या
ख्यमध्यरेखायासांताः नम्रवलीकाः नद्यृतश्चेति कप्रत्ययः वलिर्मध्यमरेखायां जीर्णत्वक्गृहदारुषु इति वैजयन्ती वध
लभीः कूटागाराणि कूटागारं तु वलभीत्यमरः वधूभिः समं वधूसहिताः अत्र सर्वत्र वधूनां वलभीनां च प्रकृताप्रकृता
नामेव वैधर्म्येण साम्येतौपम्यावगमात् केवलप्रकृतगोचरा तुल्ययोगिता न श्लेषः अत्र केवलं प्रभेदविवक्षो
स्यापि श्लेषस्थलनियमात् यथाहुः प्रकृताप्रकृतोभययुक्ते श्लेषदृष्टमात्र साधर्म्यश्लेषो वाच्यः क्लिष्टे सर्वत्राद्यर्थेनास्य
इति प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः औपम्यं गम्यते यत्र सा मता तुल्ययोगितेति ॥५३॥ सुगन्धितामिति
नागंधो ये जाते बाभावस्ततस्तां प्रतियत्नः संस्कारः पूर्वो यस्यास्तां अप्रतियत्नपूर्वां प्रकृत्रिमां स्वाभाविकीमित्यर्थः प्रतियत्नस्तु संस्कार इति वैजयन्ती शोभ
निकमिलीनां वकुलानि च यूनां प्रमदाय प्रीत्यै आमोदकर्मणा वासनाधानस्य व्यतिहारं परस्परं स्पर्द्धां प्रापुः अन्योन्यगंधेना
न्योन्यं वासयामासुः सुरभिस्पर्धिः इणलिट् अत्रापि मधूनां वकुलानां च प्रकृतत्वात् तत्पूर्वक एव तुल्ययोगिताभेदः तेन पूर्नामम

धु वासितवधूवदनपानं वदनवासितं तं गण्डूषपानं च वसत्युच्यते एतेन निरातङ्कभोगः पौराणां गम्यते॥५४॥ रतान्तरेति॥
यत्र पुरि गृहान्तरेषु वितर्दयः विहारवेदिकाः स्याद्वितर्दिस्तु वेदिकेत्यमरः तासां निर्व्यूहा मत्तवारणाख्या उपाश्रयाः निर्व्यूहे म
त्तवारण इति वैजयन्ती तेषां विटङ्काः उपरितन्यः कपोतपालिकाः तेषु ये नीडाः कुलायाः नियस्पसः कुलायो नीडमस्त्रियामित्य
मरः वयसां शुकसारिकादिपक्षिणां गणाः वयः पक्षिणि बाल्यादाविति विश्वः अङ्गनानां वितर्दिषु रममाणानामिति भावः रतान्त
रितकूजितानि मृदुस्वनमन्ते समीपे वसत इत्यन्तेवासिनः शिष्याः छात्राः अन्तेवासिनः शिष्याश्छात्रा इत्यमरः शयवासवासिष्वकाला
दित्यलुक् तेषां भावस्तत्त्वमापसमीपे प्रतिशब्दं यथा प्रभुतमनुस्मरणादेव मुक्तेष्वतेस्म अत एव स्फुटमिति व्यञ्जकप्रयोगः
॥५५॥ छिन्नेति॥ यत्र पुरि छन्नैः आच्छादिते बुस्रपञ्ची पदान्ते सादिना वैकल्पिको निपातः स्फुटतरेषु स्फुटतरल
क्ष्माणे छविसर्पः नारीकुचमण्डलेषु स्फुरद्भानि स्फटिकादिवदतिरोधापकानि अम्बराणि वस्त्राणि केवलं नामतो वरमि
ति नाम्नैव आकाशसाम्यं न दध्युः अम्बरं व्योम्नि वाससीति विश्वः किन्तु अर्थतो अपश्यञ्ज्ञिय यापितत्वाम्बरं दधुरित्यर्थः उ
पमालंकारः॥५६॥ यस्यामिति॥ यस्यां पुरि अजिह्माः अवक्राः अत एव अकपटाः दंभादिरहिता इत्यर्थः आर्जवे स्वदर्शे वृत्ति
मजिह्मामशठां तथेति स्मरणादिति भावः जिह्मः कपटवक्रयोरिति विश्वः महतीः सीमान्तं राजकल्पितक्षेत्रमानमर्या
दां कुलागतानुल्लङ्घ्य स्थितिं च अप्रत्यञ्जतः अपङ्काः अकर्दमाः निष्पापाश्च पङ्कः कर्दमपापयोरिति विश्वः अतिमात्रा आयाय
तिः आयामउत्तरकालश्च येषां ते आहायतयः आयतीसूत्तरकाले संयमाऽऽयामयोरपीति विश्वः द्वये द्विरूपाः अपि
प्रथमचरमतयेत्यादिना जसि विभाषा सर्वनामसंज्ञा विनीतमार्गाः सुचिरस्थिताः पुरवीथयः सुशिक्षिता आरक्षत्
यश्च अजातस्खलनं पाषाणादिप्रतिघाततो विरहाच्चरणं च येषां ते जनैर्जातु कदाचिदपि नामुच्यत न सन्ता नक
दाचित्स्खलिता इत्यर्थः अत्र मार्गशब्दस्य साधर्म्यादिकतोलावने विफलद्वयवदेकशब्देनापि द्वयप्रतीतेर्द्वयानामप
पि मार्गाणां प्रकृतत्वात् केवलप्रकृतविषयः श्लेषः विशेषस्यापि श्लिष्टत्वात् तत्र तुल्ययोगिता॥५७॥

यस्यामिति॥ यस्यां पुरि गृहेषु अतिश्लक्ष्णतया रत्नभित्तीनामतिस्निग्धतया आलेख्यचित्रं विधातुं निर्मातुं अशक्नुवन्तो यु
वानः प्रतिबिम्बिताङ्गाः स्वयं तासु संक्रान्तमूर्तयः सन्तः रत्नभित्तीः सजीवचित्राः सचेतनचित्रवतीरिव चक्रुः इत्युत्प्रेक्षा
॥५८॥ सावर्ण्येति॥ यस्यां पुरि कलधौतधामस्तम्भेषु हेमाकारस्तम्भेषु कलधौतं रूप्यहेम्नोरिति विश्वः प्रतिमागता
नां प्रतिबिम्बगतानां सावर्ण्यभाजां तत्सावर्ण्यादगृहीतभेदानामित्यर्थः अत एव सामान्यालंकारः सामान्यं गुण
साम्येन यत्र वस्तूनां तैरेकते तिलकश्रीमतामङ्गनानां स्मरपाण्डुतया लब्धेषु विभिन्नवर्णताङ्केन गृह्यमाणैरित्यर्थः क
पोले मणिदर्पणानां स्फटिकमुकुराणां श्रीरिव श्रीर्भेजे प्राप्ता इति निदर्शना सा चोक्तसामान्यप्रसादश्चेति तेना
स्याः संकरः॥५९॥ मुक्तेति॥ यस्यां पुरि मुग्धाङ्गनाः मुक्ताङ्गवन्तीलीलाः उपलाः मणयः मरकतमणय इत्यर्थः उपल
प्रस्तरे मणावित्यमरः तैर्निर्मितानां गृहाणां देहल्यः गृहद्वारदारुणि गृहावग्रहणी देहलीत्यमरः तासां भासा लिप्तेषु अलि
न्देषु द्वारबहिर्जगेषु प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके इत्यमरः गोः पुरीषं गोमयं गोश्च पुरीष इति मयट् तस्य
गोमुखानि विलेपनानि गोमुखं कुटिलाकारे वाद्यभाण्डे विलेपने इति विश्वः नन्वकुर्वन् मरकतप्रभायां विलेप
नभ्रान्त्येति भावः अत एव भ्रान्तिमदलंकारः कविसंमतसादृश्याद्वस्तुनि वस्त्वन्तरमिति संभ्रान्तिमानिति सर्वस्वकार इति ल
क्षणात्॥६०॥ गोपानसीति॥ यत्र पुरि गृहाणि गोपानसीषु वलभीच्छादनाधारेषु वंशपञ्जरेष्वित्यर्थः अत एव गोपा
नसी तु वलभीच्छादने वक्रदारुणी इत्यत्र पटलाधारः वलभीवंशपञ्जरे इत्याह क्षीरस्वामी तेन ग्रीष्मकालं अत्यन्तसं
योगे द्वितीया आस्थितानामासीनानां चन्द्रकाः मेचकाः समौ चन्द्रकमेचकावित्यमरः तद्वतां चन्द्रिकाणां मयूराणाम्
लेखिभिर्लेखायमानैः कलापैः बर्हैः कलापो भूषणे बर्हे इत्यमरः हरिन्मणयो मरकतानि गारुत्मतं मरकतमश्मगर्भो हरि
न्मणिरित्यमरः तद्वतश्यामैः तेजोभिरामाणि हरिततृणमयानीव सप्रान्तैर्नीध्रैः पटलैः पटलान्तैरिव रेजुः॥

वतानहसंमंगेने त्रिभावः जेतार एव जैत्राः जयनशीलाः तज्जेतारमपि तृन्नादित्वादृण् प्रत्ययः ते शराः यस्य तेन मकरध्वजेन कामेन प्रद्यु
म्नरूपेण निःशंकं निर्मितं किंतु युवतिवसतिवासे भावे लिट् चस्मिन्स्य पि सादिना संप्रसारणं शंकारणं शंकांचितकं भयया इति विग्रहः अ
त्र शंभुशंकितिव्याधा तत्पदार्थस्य विशेषणगत्या शंकनिवासहेतुत्वोक्तेः काव्यलिंगभेदः पुरा किल भगवान्त्र्यंबकः कुवसंतलोकपूर्ण
दृष्टिप्रेमणा बाणाभ्यां जितेनहरिमपि युक्त्यनिर्जितं इति पौराणिकः कथयेति ॥६३॥ निषेव्यमाणेति ॥ शिवैर्मरुद्भिर्मंदमारुतैरन्यत्रा
शिवैरुद्रैर्मरुद्भिर्मरुद्गणैः अन्यत्र निषेव्यमाणेन हरिणा श्रीकृष्णेन शक्रेण च अध्यास्यमानाम् अधिष्ठीयमानां उद्यमीनां रत्नां
कुराणां धाम्नि स्थाने एकत्र रत्नाकरत्वादन्यत्र रत्नसानुत्वान्मेरोरिति भावः सिंधोस्थितेति शेषः यापूः मेरोस्थितां अमराः सं
ति अस्यां अमरावती मतौ बहुलं अजिरादीनामिति दीर्घः संज्ञायामिति च तं अनुचकार सदृशीं यामास तत
वती अमरावतीं अनुचकार सदृशीं चकार अनुपूर्वात्कृञ इत्यात्मनेपदे विशेषे नकेवलपरस्मैपदेष्वन्यतरस्यामिति भावप
क्षे भिजादेशः अत्र प्रथमार्धे श्लेषविशिष्टो सरोस्थितेति विंबप्रतिविंबभावेन साधर्म्योक्तेः श्लेषानुप्राणितेयमुपमेति संसे
पः अत्रापि सा दृश्यप्रतिपादकपदाभावात् स्पष्टैव ते इति द्रष्टव्यं इति अनुशासनादिति ॥६४॥ द्विगुर्धेति ॥ द्विगुर्धपदं अनेन तद्धि
तेन अवश्यमात्मन्वियस्य सः स्वयं तत्सदृशः सुसुखं तुल्य त्रयाणां लोकानां समाहारः त्रिलोकी तद्धितार्थे इत्यादि
ना समासः संख्यापूर्वो द्विगुरिति द्विगुसंज्ञा अकारांतोत्तरपदो द्विगुः स्त्रियां भाष्य इति स्त्रीत्वे द्विगोरिति ङीप् तस्याः
लोकभूषणभूतः स हरिरिव विशेषको वा तिलक इवेत्यर्थः इव वद् यथा शब्दा विसर्गानुशासनात् तत्र मालपत्रतिलकश्चित्र
काणि विशेषकाः द्वितीये च तुरीये च नास्त्रियामिति समरः अध्यसिता वर्णानां यासां एणानां कांतिर्यैः ज्वलेयस्याः तस्याः पुरः
अध्यसिता वर्णजौ राद्धि कांतिर्लावण्यं च यस्याः तस्याः च लोको द्विजोदेषु स्मृतेदोरस्य भयं वा व्यमरः वध्वा इव स्त्रियं विशेष
विशेषितवान् अनेकेन शद्धमुपमेयैकेशद्धमाचसादृश्यात् श्लेषरूपेन्यश्लेषोपमा तदेद्दृशोः ॥६५॥ तामिति ॥ अत्र तु जप्र

तापः स हरिः तां पूर्वोक्तां पुरीं इत्यमाणेः सन्पुरस्तात् तत्पूर्वस्यां दिशि सहर्षं सविलम्बं यथा प्रतालीरथ्यां रथ्याप्रतोलीविशिखे समप्र
भैः रः प्राप तत्प्राप्तवान् लुङि पुषादिना अर् रागादेशः वज्राणि तोरणे प्रसादः दधिगतहीरकादि मणीनां प्रभाभिरुड्डासिनी सुराघु
धांभी इह च्यापलक्ष्मीर्यस्यां साइह वज्राग्रहणं मणिमात्रोपलक्षणं अन्यथा इंद्रायुधसाम्यासंभवादिति अन्यत्र वज्रस्य कु
लिशस्य प्रभाभिरुल्लासिनी सुरायुधानामितरेदेवतायुधानां श्रीर्यस्याः सा वज्रो स्त्री हीरके पलाविरसमरः याप्रतोली देव
सेना च मूरिव पदैः शत्रुभिरलंघ्यात् दुर्धर्षा ॥६४॥ प्रजाइति ॥ अरविंदनाभेर्विष्णोरंगात् प्रजा इव यतो या इमानि भूतानि जायंते इति
श्रुतेरिति भावः शोभोर्जितात् उत्तटात् अपरंधगंगाजलानीय विधातुर्मुखाद्धुत यः इव मुरजितो हरेः अंगजन्मः सेना पुरान्निर्गुः नि
र्गताः मालोपमेयं ॥६५॥ क्षिप्तेति ॥ अन्योन्येषां मुखागेषु संगतस्तेन स्खलितः खलीनाः कविकाः यस्मिन् कर्मणि यथा तथा कथ
केतुरूली नौरुली समरः क्षिप्तप्रडिः संक्षिप्तपुद्विर्वितोलेमुर्दुरुस्थला पुंहरिभिस्तुरंगैः करणैः अस्त्रपान वारयंतीति अश्ववाराः अ
श्वरोहाः परस्परेणान्योन्यं इतानुभवाः संतो दुःखेन निःक्रम्य के मुः निर्जग्मुः अत एव अस्या च्यातिशयोक्तेः संकरः ॥६६॥ निरंतरेति ॥ तमसानि
निरंतरं इव प्राणमतां गणेन प्राणिवर्गेण कर्तृ निरंतरशालेपि पूर्वस्यैवान्तिशयोक्तेः संकरः ॥६६॥ संकरेपि प्रथिसंप्रति दूरत एव विमुच्य
माने सति एकत्रदीपभयादन्यत्रश्चीमयासेति तेजो महद्भिः बलाधिकैः प्रभासंपन्नैरप्यतेजस्वलप्रभावैः स इति शास्त्रतः द्विधापि दीपिरवा
संवाधं असंकीर्णाः अपदां बभूवे जगमे न तत्र वैरिव हे प्रादि तिश्रयगतो भावे लिट् पायाश्रेसामसयः स्थतेज सैदूरोत्सारित तमस्के
वक्षिदीपा रवतच्यात्सारि प्राणिके निरस्तुं द्विपाः प्रपयुरित्यर्थः तमसीतिसप्तम्यंतपाठेषु तमसः पप्युपमाने द्विधा गमनात प्रा
प्राणिवर्गेण निरंतराले पक्षांतरे च नसंभवतीत्युपमानोपमेययोर्वैरूप्यस्यात् तृतीयांतपाठे तमसा पापिवर्गोपमाने तेन तत्सारू
प्यसाकल्यात् स एव साधीयान् इत्यलंकारिणां यथा ॥६७॥ शानैरिति ॥ रथास्ते तो धावंतः स्याः सपत्नैः संततसारथिभिः सूतैर्यं
ताच सारथिरित्यमरः अग्नायताग्रा केतवः चैरश्मयः प्रग्रहाः किरणप्रग्रहौ रश्मी इत्यमरः तैर्मुग्नेषु सेषु युग्मीवाणामंतेषु संसक्ताः यु
गाः युग्याः स्कंधवाह्यदारुविशेषाः येषां तैरत एव स्वेदे गम्य मैस्तुरंगैर्हस्ति नरवात् हस्तिनश्च पुर्या इमंत्रूठः क्रूरं पुरा

तत्सहितमक्षि ऊर्ध्व

तस्मात्स्वर्गे नेक्षितिमनीयं तनीतातः इति स्वभावोक्तिः यथावद्वस्तुवर्णनात्॥६९॥ वलनेति॥ उं वलनं निउर्मयस्वं तैर्वलनोर्मिभिः वल
यैः कंकणैरिव तत्क्षणं हरिति क्रामणं क्षणेनैव हीयमानात् रिच्यमानात् त्वरयाभुजाद्वयस्य सा तस्याश्च तदेवास्याः पुरः द्वारवत्याः हरिविर
हे रद्वेहितत्वादिति भावः द्वारवतीशब्दस्य संज्ञात्वात् तयलोर्गुणवत्त्वस्येति न पुंवद्भावः अन्यच्च द्वारवतीशब्दस्य द्वारवत्त्वेन छं तस्य हरिविर
मणे हेतुत्वादिति भयदाप्युपमितमुज्ज्वलयहेतुना तु उपमा संकीर्णा यमनितह्नलो त्प्रेक्षाप्रायेण मनिनव्यज्यते॥ ७१॥ अयं सर्गसमाप्तेस्त्र
द्वेयत्वर्ण्यते॥ पारेति॥ मुरारिः निरन्निधेः समुद्रस्य जलानां पारे परतीरे इति पारेजलं पारावारे परमान्नीसमरः पारे मध्ये षष्ठ्या वेतिरव्य
यीभावः तत्संयोगाद् केरांततले पारे शब्दस्य अस्य संज्ञा लीलाः पलाशाना पत्राणां राशयो यासां ताः हरितवर्णपूर्णा इत्यर्थः पत्रे पलाशच्छ
दनमित्यमरः प्रतत एवं उत्कलिकाउर्मयः ऊर्मिरुत्कलिका लोलाः हरिसा येति हलायुधः तासां सहसा वेग प्रतिह्रतिः मुकुलिकाः कूल
मुकुलिताः कृताः प्रेरिताः कूलप्रापिताः इत्यर्थः उत्कूलशब्दः कोत्तीति एवं तात्कर्मणि ताः ते षां शैवलानां स्त्राभिवा नायासां ताः तेरसरसीरिस
र्थः वनावलीः पश्यत्तत्तत्त्वात् कलिकाशैवलस्य तत्संदेहात् उपमे सख्रयोसंदेहसंकरः॥ ७०॥ लक्ष्मीमिति॥ असौ हरिर्लक्ष्मी
शोभां श्रीदेवीं च बिभ्रतीति लक्ष्मीमतः तान्त्यंभोधितटे अपि वासोयेषां तान् नीरदवल्लीलाभासः नीलवर्णान् बधइवे सुपमितसमा
सः अत्र लता इवबध्वइत्याकपार्थिवत्मध्यमपदलोपी समासः ताभिः संप्रयुज्यन्ते इति संप्रयुज्यः संगतान् अपि वेलावनविम
तपर्वेऽव्ययीभावः द्रुमान् वृक्षकृतान् रमनेकीकृतान् स्यात्स्वकीयविरहानिवेत्यर्थः एवं च पुल्लिंगतानि – तः आस्य परसेन पुंसकल
पातान्स्वद्रुता तान्मनिकृतत्रिल्या स्त्रीये सोऽस्त्रियांध नरः समरः पश्यति स्म श्लेषसंकीर्णयमुत्प्रेक्षा॥ ७१॥ आक्लिष्टेति॥ आक्लिष्ट भू
मिं मालिंगतं भूतलं उत्क्षेप्तारं रसितारं स्कंदितारं लोलतां चलतां इतस्ततः पततां भुजङ्गानां नाकारो येषां ते वहन्तारं गायस्य तं तत्फो
श्रं श्रीकृष्णस्य मुपागमात् अहनूर्ना दोषाव द्वीवापिविशिभवितारः संभवतीति भावः भ्रमरविलसितं वृत्तं म्भोग्नलो गः स्याद्भ्रमरविलसितमिति लक्षणात्॥८॥ भग्न इति॥ रसादौ अस्य नागस्य निवासः आश्रयः सदा पुष्येरानतोनमो यन गच्छतीसगो वृक्षः स्यन्दनतोयैर्मदोदकैः सहवर्तते यः स्तेन स्यन्दनतोयेन मत्तेन सूर्यः येन विषाणेनादंतेन भग्नस्तेन विषाणेनाकोपितः कोपप्रापितोऽसौ नागः सर्पस्तीक्ष्णाणि विषाणि गरलानि उद्गतिवमति परप्रीतिकरः [blot] क्षमस्य क्रोधः स्वाश्रयमेव व्याहंतीति भावः॥९॥ प्रालेयेति॥ रस्य सक्लाकापि किमुतान्य इति भावः सांद्रयदिभचर्म तदेव वसनं तदेवावरणमाच्छादनं यस्य सः तथा सन्नसन्नावरणेनापि शिशिलावरत्य इति भावः प्रालेयमादागते प्रालेयं हिमं तत्र आगत इत्यणि केके यमिसयुप्रलयानां पादपदेरियइति शद्यस्य यादेशः तेन कांतशीतले अत्र चले अपरं हिमवति अधिशेते तस्मिन्नोते इत्यर्थः अपि शीङ्स्याःसां कर्मेति कर्मत्वं सर्वर्तुभिर्निर्वर्तितं करे सदा सुखकरे रहोदो निवसन् पुनर्नास्ति किंचनास्य

द्वचोः प्रसभं मध्ये मण्डलम् उल्ललयां चकार उत्पतिवात यावत् चलत्तस्य न चलतो ऽस्मान् तत्पल्ययनात् विलोलकं चलोनि तं वचिं
वातविस्तस्तं च स्त्रियस्मिन् कर्मणि यथा तथास्त्ररोधवधू पपात स्वभावोक्तिरलंकारः॥७०॥ शैलेति॥ शैलस्य रैवतकोद्रेरुपशल्यं
यद्यपि ग्रामान्तमुपशल्यं स्यादित्यमरः तथापूर्वचाराद्दोषः तत्र निपततां धावतां रथानां नेमयः कान्ताः चक्रे रथांगं तस्यान्ते नेमिः
स्त्रीस्यात् प्रधिः पुमान् तासां धाराभिः करभिः निष्पिष्टानां चूर्णितानां निष्ठुरशिलातलानां चूर्णगर्भेषु जातेषु तयोः तोः नभसि
बद्धानि पयोद चक्राणि पयोदाकार मण्डलानि यैस्तैः कवद्रमतीय स्पालीत्तु च कीवान गदर्भैः चक्रीवं तस्तु वालोया एसमागर्दभाः
खराः इत्यमरः आसंदीव दृष्टीव चक्रीवद्भिस्तद्दिनानि पातनात् साधुः तस्यां गरुहानि लोमानि तद्धूम्ररूचः कृष्णलोहितवर्णे धूमधूमल
कौ कृष्णलोहिते इत्यमरः भूरेणवो विससृपुः प्रसस्ताः॥७१॥ तु यदिति॥ खुराः शफानि शफं क्लीवे खुरः पुमानिति समरः तेषामपि याता दुद्यं
तः कृशानुसकलाः स्फुलिंगाः ये मत्सोषु टंक प्रायाः खुरा इतिभावः भूम्यासमानि समस्तलानि स्थायं तानि च शिलाफलका नीव शि
लाफलकानि ते तत्र चित्रेषु आसते तेषु शैलस्य पर्यन्तवर्त्मसु प्रांतमार्गेषु महाश्वाः दुर्दुराणां वाद्यविशेषाणां पुटान् मुखानि वाद
यंते इव चक्रमिरे जग्मुः पादन्यासैस्तादृशं शब्दमकुर्वन्निसर्थः वैणादिविहरण इत्यात्मनेपदं दर्दुरस्तोयमेदे वाद्यभांडाद्रिभे
दयोरितिविश्वः उत्प्रेक्षालंकारः॥७२॥ तेजइति॥ तेजो नाम दर्प परनामा सत्त्वगुणविकार प्रकाशकोंतःशरीरविशेषः यथाह भोजराजः तेजो
निसर्गजं सत्वं वाजीनां स्फुरणं रजः कोपस्तमइति ज्ञेया स्तयोपि सहजा गुणा इति तस्याद्धिविधं सहोत्थितं भयोत्थितं चेति केयथाह स एव
धारासु योजितानां च निसर्गो स्फुरणं विनाप्रविछिन्नमिवाभाति तत्तेजः सततोत्थितं कशापादादिघातैर्यत्साध्वसं स्फुरितं हितं दिति
अथ तेजः शब्देन तत्कार्यं वेगो लक्ष्यते तथा च तेजसि वेगनिरोधे तन्निवारणैः समतायां वेगसाध्ये ऽवहिते नवलाविभागकुश
लेनेसर्थः कशाताडिनी अश्वाद्य स्ताडिनीके शा इत्यमरः अवधातः कशास्तासां चयपुतमम मध्यमाधमेषु यथासंख्यं मृदु समं विषमं सह
च्छिस्त्रिः कारणं कृपं चितं यं तस्य विज्ञारः एते षु निमित्तेषु अंगे षु एवं तादृश इति विमर्शः तद्विदात ज्ञेन यथाह भोजराजः मृदुनैवेन घा
तेन दंडकाले षु ताडयत् तीक्ष्णमध्यपुनश्चाभ्यां जघन्यं निष्ठुरैः स्थितिः उपवेशयंनिद्रायां स्खलिते दृष्ट्वे क्षिते वाडवालोकनोत्सुक
वडुगर्विते हेषिते संग्रामे स्वदुस्स्थाने विमार्गगमने भये शिक्षाकाले गस्यसपयेसज्ञातविभ्रमे दंडः प्रयुज्यो वाहानां कालेषु

मे१

द्वादशस्वपि स्त्रीवायां भीतमाह स्थार त्रस्त चैव च वाजिनां विभ्रान्तं चित्तमध्यारे हासशिक्षं चताडयेत् स्कन्धेक्षितं मुखे हन्यात् भू
मौ प्रस्थितं यथाजवनेस्खलितं हन्यात् कर्णे मार्गे च दुःस्थितं यच्च कंटप्रकृति वाजिनं सर्वं चैवताडयेदिति एवं भूतेन यंत्रासादिना समग्र
पाशा संनियुक्तो वारितः उन्नैः उच्चतः आरूढो ऽश्वयोनि वे शविशेष तज्ज्ञातः अश्वः विशेषण प्रयोगोविशेषप्रतिपत्तावितिचतुलक्ष
पलोनि शुरः परुषक्रम पादपादप्रक्षेपो यस्मिन्कर्मणि तद्यथा तथा अर्द्धपुलायितेन मंडलगति विशेषेण विश्रमद्रुतं पदं पद
क्रमेण चकार शतार्द्धकर्मादूनैर्मंडलायतवलितैः उत्सुखस्याश्वमुख्यस्य गतिरर्द्धपुलायितामिति लक्षणात् पुल्य नाम
प्लुताद्यनेकापरनामा हयानां गतिविशेषः तदुक्तं हयलीलावत्यां प्लुतं प्लवं सिनामानुर्धारा पुलकाभिधाः पुनेरेनां चवेला
यांपुलमित्यहद्देशिकः तल्लक्षणं तत्रैवोक्तं क्षिवतिसममशेषानुपश्चिप्रसन्नपान प्रसरतिपुरतोऽश्वः सापिधारापुलाख्याचि
लसति समपादो ऽपराग कुन्नानां करणमिह गतिस्तुप्लाद्ध्रु रन्य पुलाख्यामिति वार्ष्णि प्रधानं प्रविधायरीगा च्छला[illegible]
पी कृत्सवेह पुलाख्यामिसाद्धिपुलास्य मवितमनयेगतः पुलायितं स्यगतौ भावे क्तः त ऽर्द्धं ताद्धं सुकरी स्या नुष्ठितमर्थ पुलायित
मित्तलं विस्तरेण॥७३॥ नीहारेति॥ नीहार जालवत् तुहिन व्यूहवत् मलिनः वधूजन[illegible] विलोचनानां पक्ष्ममालाः पुनरुक्त
सांद्राः द्विगुणसांद्राः कुर्वन् स्वभावो ऽपि सोढ्वादित्यभावः मयूरव्यंसकादित्वाद्धिस्य स्वप्रदुवत् समासः क्षणं प दूनां वलैः सम्ये
स्तृस्सः क्षोदितः अद्रेः स्थितः दिवमाकाशं श्राततानि तुभ्यावरितुमिषुः आप्ति तास्सुः तनोतेः सनंतादुप्रत्ययः तन्नावतेर्द्धे स वरतितनि
यतिदन्ताणां उपसंख्यानाद्धिकल्पितः उभावः तनोतेर्विभाषेति दीर्घः कंपशुदिशं मुख्यमतुच्छयदाच्छादयति स्म तुच्छाच्छादने इतिसौत
दिकाल्लर॥७४॥ उष्टियेति॥ इन्द्रानुजस्य उपेन्द्रस्य हरेरनुचराः अनुजीविन एव भूपतयाः योद्धानसिंहान् विद्विषः शत्रूनिव प्रसभं प्रसह्य उष्टि
यहलावन्यभानां मस्तकेषु निसातैः नखाग्रैर्मुक्तानविकीर्णान् मुक्ताफलकान्भजंतीति तयोः कान्तिगुहागलीव गुहाग्रागलीस्थपमितसमासः विद्धि
षइवेतिलिंगात् तमध्यवासस्य अध्युषितवंतः उपान्वध्याङ्वस इति कर्मत्व वसनिवासे लङ् सिञ्चिवद्धि तस्यार्द्धधातुक इतिभावः॥७५॥ विभ्राणे
ति॥ अश्वेषुतपतयः यावक एव यावकः लाक्षा राजतु क्लीवे इत्यमरः यावकपंकैः नपिंगपिंगलविधुरवर्णमेवाव लम्बं अपोलिविकलापं बिभ्राणाः यास्त्र

स्यावचूलावचूलास्यापूर्वी पर्यो मुखचूलकाविति ध्वजाग्रेषु लतायुधाः चेलोच्चेषु स्योदी चेचु स्योदीरूपे स्त्रियामित्यमरः तस्याग्रेण दृष्टा
धताच्चटुलाहि संचलाहि रवपताका यस्यां तथा उरगासनो गरुडः स एव केतुर्यस्य स्तदधिष्ठितो ध्वजदंड इत्यर्थः तयाभिज्ञाताः ति
भावः अनुमाधवधाम हरिशिबिरमनु स्वावासभागं स्वनिकेतदेशं जग्मुः प्रापुः दूरोद वगरुडध्वजेन माधवधाम ज्ञात्वा ते स्वनिकेता
न्निव तदिकान् स्वावासान् निश्चित्य जग्मुरित्यर्थः ॥१३॥ छायामिति ॥ जनानां समूहाः जनताः ग्रामजनबन्धुसहायेभ्यस्तल् इमहतीमपिव
र्तमानां तरूणां छायामपास्य परिहृत्य सेर्ष्य स्पृहयालुत्वादिति भावः आगामिनीं छायां जगृहिरे स्वीचक्रुः वर्द्धिष्णुत्वादिति भावः ननु प्राप्तत्यागेन
दोषात्स्वग्राह्यस्वीकारयोः क्षयवृद्धिप्रसक्तत्वादित्याह सर्व इति तथाहि सर्वो जनः उपगतं प्राप्तमपि अपचीयमानं क्षीयमाणं कर्मकर्तरि प्र
योगः आश्रयं नोपैति न गृह्णाति किंतु अनागतमप्राप्तमपि वर्द्धिष्णुं वर्द्धनशीलं आश्रयमुपैति सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्या
सः ॥१४॥ अग्रगतेनेति ॥ अग्रे गतेन पुरःप्रतियातेन रम्यां वसतिं निवासं वसेर्वसतिरित्यौणादिकोऽतिप्रत्ययः परिगृह्य आपात्य सादायास्य
यमानुकमितु मागघतेः भव्यग्वादिके तरि एवं तेनिपातः तेषां सैनिकानां निराकरणेन निरसनेन आकुलेन व्यग्रेण उद्बाहु नाउद्ध
तेरुस्तेन केनचिदिति शेषः अन्यतोऽपातेऽन्यमार्गेण यातः आत्मवर्ग्याः स्वयूथ्याः प्लुतं त्रिमात्रं यथा तथा कृतस्वरो नादो यस्मिन्कर्मणि
यथा तथा दूराद्धूते चेति दूराद्धूते प्लुत इति विधानादिति भावः आशु दूरान्मुहुः आजुहुविरे आहूताः ह्वयते आङ्पूर्वात्कर्मणि लिट्
अभ्यस्तस्य चेति संप्रसारणं द्विर्वचनं मुहुरुक्तं दृष्टाः ॥१५॥ सितेति ॥ अमतरसेन सितला इव सुखेष्टा मृदुजेनानालत्वाति छिद्र अमहारा
कल्पद्रुमवदनमतसैकाभावेपि तद्बदा लब्धदका इत्यर्थः शाखासु अवसैतेः लग्नैरामरणैः वस्त्रैर्वस्त्रैः अभिरामाः एकत्रैसैन्य
रितिशेषः सहविरजुः तद्बद्धिरेजुरित्यर्थः सोऽहतिसादृश्यस्य सहसा कल्पसादृश्ययौगपद्यसमृद्धिश्चिवति विश्वः तथा चोपमालंकारः ॥
१६॥ यानमिति ॥ परिजनैर्जनानाम्चाह लोन्द्रवतार्यमाणाः स हि र्यं तात्कर्मणि लिङ् नजादेशः सहयोऽन्यतरस्यामपि पकारलोपः नरा
णाम्शोलोकजनानां अपसारणे आकुलाः सौविदल्लाः कंचुकिनो यासां ताः सौविदल्लाः कंचुकिनः स्युरित्यमरः अवरोहणसंक्षो

मुक्तास्फोटाख्यताभिः शुक्तिभिः शुक्तिसंस्थानैः आवर्तविशेषैर्युक्ताः तदुक्तं वक्षस्याः शुक्तयस्तिस्र ऊर्द्धरोमा यथायथा हा इत्यन्ये तु
शुभफलानि तत्प्रकथाः शुक्तयो मुक्तास्फोटास्ताभिर्युक्ताः मुक्तास्फोटहयावर्ते शुक्तिः शंखकपालयोरिति यादवः संपन्नाः सम
क्षाद्देवमणयो निगलावर्ताः कौस्तुभादिदेवमणयश्च येषां ते आवर्ते रोमजो
देश इति वैजयंती भ्रष्टाः पूर्णाः रध्रभागौ पार्श्वदेशाः निम्नदेशाश्च येषां ते आवर्ते रोमजोदर्वे मौलिरव च निगालजः निगालस्तु गलो
देशः किंचिदपि आप ततः आधावंतः पतिकृता नामप्रवालानां नमनोन्नमनक्रियाकृतिः अतिवेगसमायुक्तागतिरूर्मिरुदाहृता इ
ति वैजयंतीरदृशाः स्वाः पयोपयरवत्तूर्णं वसुमतीं व्यपुः छादयति स्म अपिधान तिरोधान पिधान छादनानीत्यमरः अपि
पूर्वाक्तौ तौ लड्वाक्षिमागुरिरल्लोपमवाप्योरुपसर्गयोरिति अकारलोपः एकनालावलंबीफलद्वयपच्चदेकशब्देनोर्थद्वय
प्रतीतेरर्थश्लेषोपप्रकृताप्रकृतगोचरः उपमायोगमिति संकरः ॥१७॥ आरद्धेति ॥ पथि मार्गे रभ्रो ऽत्यंतोऽत्यंतोऽस्मा
द्विमितं भीरुतो भीभयेलड्.मियोऽन्यतरस्यामिति विकल्पयोरविभीरिति विस्मयेवा खेदानुकंपासेतोषविस्मया म एव तस्य
मरः भीतेर्विलिंगमाह एकः इनः आरक्तः कुंभयोरधः प्रदेशः अत्र मगं प्रविष्टं श्रितागतीक्ष्णमुखं स्थाणोः अंकुशाश्रं कुशाग्रौ इत्यमरः
रित्यमरः अवमसावधूयरुतः आर्तनादो येन सम्प्रतिकरुणं क्रंदन्निसर्थः जवेनपलायत पलायितवान्प्रपूर्वपयतेर्लङ् तः
उपसर्गस्यापतावितिरेफस्य लत्वं अन्यः पुनः उद्धस्तस्तु अस्तमात्रं निरस्तमात्रं यथा तथा मुहुः उद्धूय तउल्लसितवान् गतो लय
उत्साहावोति रलिकारः ॥१८॥ आयस्तमिति ॥ जनैः चटुलार्थे यच लपूर्वस्यां पथा तथा गघ तेजी चपलं तमिसर्थः उल्लसिते उ
ल्लासिते आमरैः यात्रुमवंश्यायसं सपत्नं आरूढ तेयथा तथायस्तप्रयत्नं कर्तरि क्तः क्रियाविशेषणं ऐक्षत ईक्षितवान् ईक्षते लङ्
आडजादीनां आदिश्चेति वृद्धिः नागं पुनः नागंतु सलीलं सलीलमीलिते अक्षिणी यस्मिन्कर्मणि तत यथा तथा सदृशः सांगा तन्मय
दुमदंगमृतेत्यायस्तं भोजस्तकचंग्रीघामदयोस्तु ल्यदर्शिरतस्र सर्वः प्राणीअनुरूपचेष्टः स्वजातिस्वित्तव्यापारः सन् प्रीणातीति
प्रियः प्रीतिकरो भवतिखलु इगुपधज्ञाप्रीतिकरः कः सूर्यां तरन्यासः ॥१९॥ तस्तरति ॥ करेणोरिभात्करेणुरिभ्यां स्त्रीनेभद्रसमरः भीत्रा
र्थानां भयहेतुरिसपादानत्वे तस्तोभीतः खरो गर्दभः समस्तजनस्य हासकरोतीति हासकारः सनकृन्नेरविसादिनारुप्रयतः ताव

स०क० धातुरागो गैरिकादिरागो येषां तैः उद्दराणि तारावलीनां शुद्धमुक्तावलीनां विरचनानि येषु तैर्मुक्तासंभूषितैरित्यर्थः तारो मु स०५
५३ क्तादिसंशुद्धौ तरले शुद्धमौक्तिकइति विश्वः दूष्यपक्षे ताराविलसंततिरितिकेचित् तद्धिरेदं दूष्यैः पटमंडपैरिव दूष्यव
स्थैश्च तद्वत्समरः व्यस्यन्तरो यते स्मरुचि दीप्तौ युक्तो लुङिति परस्मैपदं पुषादित्वाच्चिरङादेशः अत्र द्विरदानां दूष्या
णां च प्रकृतत्वेनोपमानापि श्लेषाभेदः विशेष्यस्य विशेषणानां चके षांचिद्श्लिष्टत्वात् केवल प्रकृतत्वात्तास्पदतुल्ययोगि
ते परवशस्तु साहश्यमात्रानुवादक इति संक्षेपः ॥२१॥ उच्छ्रितेति ॥ उच्छ्रितउच्चैस्तोयः कोऽपटकोदूष्याघोत्तविवाय
सेत्यर्थः पटः अधः पटीकाउपटः स्यादितिविजयंती तस्याअंते रंध्रवकाशे लीयमानेन प्रवेशवता मंदानिलेन प्रशमित
श्रमेणाध्वखेदेन यत् धर्मतोयं स्वेदांबु तद्वांतैः राजदारैः राजावरोधैः दूर्वाणां प्रतानः प्रचयः सएव सहजं अ
कृत्रिमं आस्तरणं तल्पं येषु तेषु वेश्मसु पटमंडपेषु निद्रासुखं भेजे ॥२२॥ प्रसेदतुः ॥ अंगे ॥ गात्रे प्रस्वेदवारिणा सविशेषं
यथा तथा निषक्तमिति श्लिष्टं कूर्पासकं चोलकं कंचुकमित्यर्थः चोलः कूर्पासकः स्त्रियामित्यमरः ह्रतानि पुनः विदीर्णानि न
ह्रतानि यस्मिन्कर्मणि यथा तथा उच्छ्रिपंती संमोचयमानात्यती अत एवाभिमेव प्रकाशमानं घनपयोधरबाहुमूलयो
र्नाप पयोधरो बाहुमूले च यस्याः सा तादृशी नास्तिको दूरस्यादिनाकोपि युवद्दर्शनक्षणमुत्सवोऽभूत् तेन यूनां स्मरत्तितादिक
रामिदं वरवालोकनेनिमित्तं का लाक्षमहलक्षणमौत्सुक्यमुत्पद्यते नायिकाया सौधपरिणीप्रगल्भा ॥२३॥ यावदिति ॥ वि
पणे विपणो व्यवहारः सयेषामस्तीति विपणिनो वणिजो यावत् सएव समयः सेनानिवेशक्षणएव यावत् तावत् तस्मिन्
एवसमयेयुगपत् अव्याकुलाः अव्यग्राः संतः पटमयानि पटविकाराणि पटमंडपानि इत्यर्थः अमितो वितत्य उभयतः वि
तत्य क्षणाद्वितत्य सैन्याद्वितत्य विस्तीर्य क्रयेण जीवंतीति क्रयिकाः वस्तु क्रयविकार्यार्थं ट च प्रत्ययः पर्याप्ततत्परितः अथ
वने क्रयिकलोकैः कृतजनो यस्मिन् कर्मणि यथा तथा आरात्पेरसंख्यैः पण्यैः पूर्णपद्व्यैः पूर्णाः आपणाः पण्यप्रसा
रस्थानियासु ताः विपणीः पण्यवीथीः अपण्यस्तु निषद्यायां विपणिः पण्यवीथिकेत्यमरः विरचुः असंकीर्णं निर्म ५३

मुरित्यर्थः स्वभावोक्तिः वृत्तमनुप्रासः ॥२४॥ अल्पेति ॥ अल्पप्रयोजनेन अल्पफलेन निमित्तेन कृतः उरुतरः प्रयासो यैस्ते
उक्षीणाः लोष्टा लकुटाश्च यैस्तैः पुंभिरिति शेषः परितोऽनुविद्धं मवरुद्धं अनसः शकटस्य अंके गतिं धृतीति अनेकल
क्षणाः येषां जालस्य मध्यादुद्यतउत्थितउत्सूयात् ते द्रुतैः कर्मणि लुङ उद्धृतं पलायितं शशेषु गविशेषस्य अन्यैः अप
रैः अवन्तं हन्त्वनिवार्यरक्षितअन्नेसमुद्यता महांतमुत्कर्षं आवापद्यालोरनामिव लोलुपस्य सुकृतकीर्तिः सर्वत्र
सुलभेति भावः अर्थांतरं च तु अन्यो गुणं पाशं अवन प्रयुंजानः शत्रुं आपजयात् तयो हंता तस्यैव महा इति व्याधिस
मयादिति भावः ॥२५॥ आसेति ॥ आसाकुला जनदर्शनात् अविरलाः अत एव निकेतान् निवेशान् परितः अमितः सर्व
तः परितइत्यादिना द्वितीया परिपततन्परिधावन् मृगो हरिणः कैश्चिद्विधून्वविभिः धनुष्पाशिः धन्वीधनुष्मान्
धानुष्कइत्यमरः व्रीह्यादिनिरिति स्वामीपुंभिः नानुवंधिना नुयातः वध्याते कर्मणि लुङ् तथापि गनानामा
कर्णपूर्णाः विस्तीर्णाः आकृष्टा अयेनजनान्य वेदव वः ते हंता इक्षणश्री यस्य सः तयोः सन् कश्चिदपि तत
स्यौ किंतु वीरविशिवपा ताभावेपि अंगनापांग विशिखापांगैतकारः पलायितएवेतिभावः अत्र जनो लोक
लो स्यभयहेतुकस्य मृगानवस्थानस्यांगनापांगे वृत्ति हेतुकत्वोत्प्रेक्षणं द्रुतू त्प्रेक्षा सा च व्यंजकप्रयोगात्
प्रतीयमाना हेतोरन्हेतेक्षणश्रीविति विशेषणगत्यात्तो लोकाव्यलिंगमलंकारः ॥२६॥ आस्तीर्णेति ॥ क्षणेन आ
स्तीर्णतल्पं वेश्मावृते वेश्मप्रधानहालागे वसज्जितशय्यपयात यो रचितावसथः कल्पितनिकेतस्थानावसथावास्तुत्यम
रः कृतेन नवप्रतिकर्मणा नूतनप्रधानेन काम्यः स्पृहणीयः प्रसिन्नमतिः अध्वश्रांतबुद्धिः आगलिताध्वखेदइत्यर्थः वेश्याजनः खि
न्नान् अध्वश्रांतन् आपततः आगतुतमनुष्यान् पुरुषान् चिरविविक्तइवनिभ्रवास्तव्यइवसुत्प्रेक्षाउपचारैः शीतांबुतांबूलद
नादिसत्कारैः प्रसन्नहीतवशीचकारेत्यर्थः ॥२७॥ सहुरिति ॥ सेनायां समवेताः सैन्याः सैनिकजनाः सेनायास्त्रियामिति प्रत्ययः नगनिम्न
गानांयाः श्रियः समृद्धयः तासामनुपभोगउपभोगाभावः क्वचित प्रसज्यप्रतिषेधेपि नञ्समासार्थ्यते यथा अदर्शनमश्रवणमनु

स०का०
५४

आरणमुमनुपलब्धिरभावइत्यादितेनेयतानिरर्थकत्वंनिःफलत्वंतदेवदोषःतेनयःप्रवादोनिंदामपजनअपाजेयनमपजलूषशुद्धैः
आदित्याल्लुङितिशपोलुक्ऌदितोऽङ्जरजादेःसकर्मतिविभाषेषाव्यचित्विधेवेत्येतिविकल्पाद्व्यभावःमार्जनप्रकारमेवाहसस्नुःस्नानेनचकुः
पक्षेःयःपोनीयप्पुःआशौचेपापानेतिस्मृतेश्वरणपनेनिजुःआह्लालयनत्विजदृशोजुहोत्यादित्वाल्लुङिस्नाविकल्पाद्विभावःसजप्यस्ता
विशिष्यश्चत्तिकूर्जेसादृशःनिर्जानांगुणानांत्रयाणांगुणत्वविसध्यासस्वगुणाः८तानिविकाशीनिविशप्रसूनानिविकसन्तुष्ट
रागियैस्तैर्विशप्रसूनराजीवपुष्करांभोरुहाणिअमरःविशंभृणालंजलंहस्पुःमस्यांचकुःधसेलिटिगमगहेनयादिनाउ
पधालोपश्चटःशासीचघसीनांचेतिषत्वंस्नानादिउपभोगेनातनैरर्थक्यंनिरासकुरिस्वर्थःअत्रदोषमार्जनस्यस्नाना
दिवाक्यार्थहेतुकत्वाद्वाक्यार्थहेतुकंकाव्यलिंगमलंकारःस्नानादिक्रियासमुच्चयःसंगम्यसेतिसंकरः॥२२॥नाभिह्रदैरि
तिस्त्रीणांनिम्नैर्गंभीरैर्नाभिह्रदैःपरिगृहीतरयाणिप्रतिबद्धवेगानिवलहिर्जपनैरवेसेतुभिर्निवारितानिप्रतिहतगति
कानीत्यर्थःजलमेवमंडूकवाद्यंवाद्यविशेषःजलसेकेनपाणिनास्फालनपरेणताडनेनमंडूकवध्वनतीतिप्रसिद्धंतेनव
ल्गुसुंदरंयथातथावलाद्भिःचलैःघनैस्तनपटैःस्खलितानिस्खलनेनगतानिगमितानिकाजलानिपूर्वोक्ताःविलासिन्यःता
साललितानिमंदंजगमुःअत्रजलमंडूगमनस्यविशेषणगत्यारयंप्रतिवेधादिपदार्थहेतुकंकाव्यलिंगमलंकारः॥२३॥
आलोलेति॥हस्तिनांसमूहोहास्तिकंअचित्तहस्तिधेनोष्ठक्आलोलानियानिपुष्कराणिहस्ताग्राणिपुष्करंकरिहस्ता
ग्रहत्यमरःतेषांमुखैरग्रैरुल्लसितानिउत्क्षिप्तानितैरंबुवर्षैःरवेदनेनश्रव्यमेमस्प्रापेनद्वितीयसोऽउच्छसितस्याधूपसमाह
तस्यवेगेननिरस्ताःप्रवहिरुत्क्षिप्ताःयमुग्धाःसुंदराःमूर्द्धन्यामूर्द्धनिभवाःमूर्द्धन्याःशरीरावयवाश्चेतियत्सत्यःयेष्याभावकः
र्मणोरितिप्रतिमावातनेतद्धितेइतिटिलोपाभावःरत्नानिकरामुक्ताफलानिकराःस्तैरिवंस्पृश्यमानावपुरभीक्ष्णंउत्सवमूचुः
सिषिचुःउक्षसेचनेइत्यादेश्चगुरुरुतोनवरसप्रत्ययःगजेंद्रजीमूतवराहशंखमत्स्याहिशुक्त्युद्भवेणुजानिमुक्ताफलानि

सं०५
प्रहितानिप्रथितानिलोकेतेषांतुशुक्त्युद्भवमेवभूरि
गजानांमुक्ताकरत्वप्रमाणं॥३०॥
५४

८१

नाद्यस्ताःअवगुंठनपटाःआप्रोषितबस्याश्लिष्यसातातःअतएवस्ख्यणंयथातथालक्ष्यमाणःवक्त्रश्रियोयासांताःतथोक्ताराज्ञीःरा
जस्त्रीःपुंयोगादाख्यायामितिङीपूजनःसभयकौतुकंयथातथाईक्ष्यतेस्मताडनाद्भयंकामात्कौतुकं॥१७॥कंटेति॥तुरंगा
तैराजावरोधनस्त्रीरवतारयंतोऽधिकृताःअंतःपुराधिकारिणःकंटेषुस्वकीयकंटेषुअवसक्ताःमदवोवाऽऽकुलतास्तदीयाःये
षांतेतथोक्ताःस्फुटसस्तआलिंगनाःन्यवापुरासांवधूनांगंडस्थलीस्तमुचितायास्यैमुद्रवतलाद्भगंडानांनैर्मल्याचन
मुनुनुःयावत्कतैःनकोऽरणःशुद्धात्मानोनातिचरंतीतिभावःअन्यत्रनुपापचाराःपापलिंगानिनप्रकाशयंतीतिभावः॥
१८॥रुचेति॥अपस्तातरुतलेनिर्जितःकलापभरोययातांकलापोभूषणेबर्हेइत्यमरःव्याकीर्णेनविश्लिष्टेनकबरीभारेणक
वरःकबुरःशारइतिहलायुधःतरुणाःकवरीकेशपाशाकवरीकेशपाशयोरित्यमरःजानपदसदादिनाङीप्रदेवस्तुस्तुसस्प
दिग्धेद्धकाःअस्पसेतीतिस्पंद्धकानमयूरःद्रुमाग्रान्प्रादुद्रवतप्रादुद्रुतवान्द्रुगतौलुङिणिश्रीत्यादिनाचङ्अभ्यासादेशःअभि
शुश्रिमित्यादिनाउवाङादेशःतथाहिसंपर्विणमत्सरिणाकर्त्रागुणाधिकैःगुणोत्कृष्टैःसहदूरंसंत्रासितुमशक्य
मित्यर्थःअसेरकर्मकादिषुदुरीषदादिनाखलप्रत्ययःतयोरेवकृत्यक्तखलर्थाइतिनियमात्अत्रभयहेतुकस्यपलायन
स्यकवरीदर्शनहेतुकत्वमुत्प्रेक्ष्यतेत्समर्थनार्थोपिमर्थोंतरन्यासःकृतइतिअस्याप्रयोगेनसंकेनहिजितेजेतुरस्यातुमि
त्तमितिभावः॥१९॥रोचिष्णवइति॥रोचिष्णवोरोचनशीलाःअलंकृञित्यादिनाइष्णुच्प्रत्ययःतेषांकाचनचयानांकांचन
रचनराशीनांचांशुभिःपिशंगिताःपिशंगीकृताःआशायाभिस्ताःवशानांतत्तद्गजकुलानांध्वजैर्जलदसंहतिमेघसं
घातउल्लिखंतःपाटयंतःआयतदीर्घैर्निरंध्रेश्चसन्निविष्टाःसंस्थिताःस्थानांवलयोभूमतुःरैवतकाद्रेःपादाःप्रत्यंत
शैलाइवअभिवभुरभितेभांतिस्मआशापिशंगीकरणादितिनिमित्ताज्जातिस्वरूपोत्प्रेक्षा॥२०॥छायेति॥क्षितिभृतारो
नितं ह्रांनिवसंतियेष्वितिनिवासादेशाःछायाविधायिभिःकांतिकौरेरनातपसंपादकैःअन्यछायावितानातपकंतावितमस्त्र
नुष्ठिताःभूतीनांभस्मनांसंपदाचशोभायैसेतुःभूतिर्भस्मनिसंपदीत्यमरःउद्धूयिभिरुन्नमद्भिर्वेणुलःसांद्रपांसुरेणलोरतोऽभ्य

नेमेस नं ताद् प्रत्ययः इकारश्च उपदेशेऽनुदात्त माद्यो निड इत्यतिषेधः असावुपेति पुरे त्तिपाठे पुरायोतीत्यन्वयः उपेष्यतीत्य
र्थः यावत्पुरानिपातयोर्भविष्यद्वर्षे लट् स्विंगे विखैः स्विंगः पल्लविको विट इत्यमरः एकाकाचिदेवं उक्तशीलासमे
भंसस्थ एव अगच्छत॥ ३४॥ कीर्णमिति॥ अनेकपानां द्विपानां विगाढः प्रसूढो या मश्येदेन तापः सः एवरुक् रोगस्तस्या
रुजः पीडायाः शमाय शान्तये दन्तस्तैरनुकपोलं कपोलयोः कीर्णं क्षिप्तं अकीर्णं कर्णपर्यन्तमाड मर्यादाभिध्योरिय
व्ययीभावः उल्लसितमुत्पतितं विकाशियत्काशं काशकुसुमं तेन सदृशं विकाशि काशनीकाशं निसमासवदस्य
द्विगुः अत एव अरसस्तु तरपदेह मीनिभसंकाशनीकाशप्रतिकाशाः पमादयः इत्यमरः अंशुसितत्वाम रस्य सं
मस्य समंतात्सादृश्यमाप तुल्यार्थैर्हादिना षष्ठीउपमालंकारः॥ ३५॥ गण्डूषमिति॥ लब्धः परवारणस्य प्रतिगजस्य मारुतो म
दगन्धवाही येनेतेन अत एव सरुषे यथा तथा पयसः पानीयस्य गण्डूषं मुखपूरणं मुखान्तरगतपय इत्यर्थः गण्डूषो मुखपू
रणमिति हलायुधः द्विलिंगे पुल्लिंग एवास्य प्रयोग इत्यातुः वामनः लिंगाध्याहारावितितत उज्झितवता सतव
तानागेन गजेनामतं गजो गजो नाग इत्यमरः अम्भोधिरोधसि सरितीरे दन्तयोरुभयोर्मध्यं प्रतिमानमित्यस्य त
स्य नाप्रतिमानभागेन रुद्धं उद्दूर्येऽदन्तौ मुशलाविव तयोः प्रसरः प्रवेशो यस्मिन्कर्मणि यथा तथा अयोग्ये
मुशलो स्त्रियामित्यमरः निपेते पतितं भावे लिट् क्रोधवशाद्दलक्ष्यलक्ष्यो बधः प्रहसद लुसपरेवानयत्सत्यत्वा
धोमुखः पपात सर्थः क्रोधांधाः किं न कुर्वंतीति भावः॥ ३६॥ दानमिति॥ दीयते इति दानं धनेगजमदः अस्य दानं ग
जमदे त्यागे इति विश्वः तद्दूदति वितरस्वपिदातर्यपीत्यर्थः शकदृशो सादिना तु मनय यस्मात् तस्मिन्मक्षोमे तृपि
द्योः मजेमंनेताद् प्रत्ययः दन्तिनः कटोंगंडोस एव कटाहः खर्परकः कटाहः केस्तु पश्यन्तिवे जयंती तस्य तटं तत्प्रदेशाय
दलीनां पटलैः परितां मंसद्भाकस पदि दुत इत्यमरः उदपाति उत्पतितं भावे लिट् च्चिणमाव कर्मणि अक्लिन्नालेकृ विशे

अन्तरिति॥ जलौघे अन्तर्जलौघे विभक्त्यर्थे अव्ययीभावः अथवा जलौघेजलपूरेऽस्यं ततः अंतरे इवगाढ वत निमज्ज
तः प्रविश्यवतः इत्यर्थः गाहे निष्ठेति क्तवत् प्रत्ययः उहल्वल्पवलोपः गजस्य कपोलौ हित्वा त्यक्त्वा अंतरिक्षे उपर्या
काशे विततं तपक्षति विस्तृतपक्षमूलं अमूलाद्धितं तपक्ष इत्यर्थः विपक्षतिः पक्षमूलमित्यमरः पक्षात्तिरत्ती
ति प्रत्ययः अलिगणो भ्रमरसंघो गुणेष्वुरुपादिषु दृढव्यामाश्रमं ये कांते षु दृढव्याश्रयं च्चविस्पृश्ये तसिद्ध्वात् द्र
व्यसमवेतहायेकार्यानि सतां कपुसत्स्वपी त्यर्थः उद्ययातः जलमज्जनभयात् त्यागमयपरिहारस्य दाने प्रतिदानेऽस्य
स्थितो नीलो नीलो वर्णो नीलरूपं गजस्य नीलिमाइव रसाजगुणाः शुक्लाद्यः पुंसीत्यमरः अव्राल्लिंगतसाद्दृश्या
त जनीलत्वे स्वाश्रयाद्दन्त्यत्राप लब्धिः निर्वाहप्रत्यकाख्यति विशिष्टमुक्षेक्षा॥ ३७॥ संसर्पिभिरिति॥ सरस्यमन
न्तस्य तो पयसि संसर्पिभिर्गजास्यरिजलेविसृत्वरैः गैरिकरेणवः एव रागाः तैः करवैः करेणघ जप्रत्ययः अ
गविभक्तिणा गजा गसे जिण अजोऽजगर्भरजसा पमातः परागेण च निमित्तेन क्रीडया लीलया उपभोगसंभो
गेअनुभूय अन्या न्यमिथो वस्त्रयोः परिवृत्तिं विनिमयं व्यधस्त अकुर्वतां मिवदधे ते लुङ् परस्मैपदे तत्स्तामा
देशः अत्र सरिन्मतङ्गयोः प्रतीयमाननायिकानायकभेदाध्यवसायेन वस्त्रविनिमयोत्प्रेक्षा॥ ३८॥ यामिति॥ ग
जेन्द्रः विकसंततः समंतात्पयसि विन्दुवत् प्रसरता मदजलस्य च्युदकैः अन्धकारे मण्डले महानदीनां पानेनेत्रक्षि
यविदधुः अकुः तानेत्रक्षिये उपरंतोजलान्निर्गच्छंतो धौतेषु क्षालितेषु अंगेषु सत्तैलः नः नवैर्नीलपयोज
पत्रैर्नीलोत्पलदलैः विलेपितं क्षिप्रमेव प्रत्यवापुः प्रतिमेजिरे अत्र गजानां नदीनां च समाननेत्रश्रीविनिम
योत्परिवृत्तिरलंकारः समपैन्यूनाधिकानां च सदा विनिमयो भवेत् सा केसमाधिकैन्यूनैः परिवृत्तिरसौ म

स०क०
५६

प्रतीति॥ अन्यद्दंतिनं प्रतीति प्रसभं दंति प्रतिगजाभिमुखमपि सर्पः लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभावः प्र- स०५
चालितः धावितः अत एव निशितेनांकुशेन दूरं गच्छति यथा तथा भिन्ना निर्याणः अपांगदेशः अपांगदेशो निर्या-
णमिति अमरः तस्मान्निर्यद्भिः सरद्भिः रक्तस्य तैः मेहं अंतरोऽकुंठं गृहीतुं निषादी यंता परिवृढो प्रभवतीति परिवृढः
प्रभुः वृहतेर्वा कर्तरि क्तप्रत्ययः प्रभौ परिवृढ इति नकारहकारयोर्लोपो निपातः दृहेः निपातेन अन्य-
थाऽलोपस्य पूर्वे आसि इति दंताद्दिषु रुतेर्लोपे दि लघोरिति रफे दृशान्तस्मादिति तस्मादिमेनिरेफादृशः परि-
क्रान्ता तेतो न ग्रसमासः तस्य परिवृढ ग्रमाने सा अमर्षमागात प्राप इणो लुङि इति गादेशः तथा हि महान् बलीयान्
आक्रांति तावलात्कारात् परस्य वृंहति सामान्येन विशेषण समर्थनरूपोऽर्थांतरन्यासः॥४१॥ सव्यतीति॥ यं-
त्रा निपादिना आकलनाय बंधनाय सान्त्वनं ससांत्वनीतेन समीपं प्रापितेन गजेन वन्यकरिद्वानैः कृतोऽपि बा-
सोवासनाय सस्य तः तं अपि सर्पः शाखाः वृक्षः च हा इत्यादिभिः सेव्योऽपि सन् न अभाजि न असेवि भजे सेवायां
कर्मणि लुङि चिणो लुः वृद्धिः किं तु केवलमभाजि सर्पः भंजो आमर्दने भंजेश्च चिणीति विभाषया नलोपः शेषं
पूर्ववत् तथा हि मनुनस्मतोऽकारिणोऽन्यस्याभिमपि न सह ते परं तु किमुताधिवास मिति भावः अत्रोत्तरभं-
जनेन गजस्य युक्तमेव सर्वः पूर्ववदलंकारः॥४२॥ अदीद्रेति॥ अद्रीद्रस्यैवतकस्य कुंजेषु चरतीति यः तस्य कुं-
जरस्य गजस्य गंडकाषेण कपोलकाषेण संक्रांतेन दानपयोमदांबुयस्य तस्य अत एव सनागजेन मधितस्य मा-
नस्य वनपादपस्य निजैः गंधैः प्रसूनैः पुष्पैः निजमात्मीयत्वमिति इयंतीति जयंती मम्लौ म्लानं म्लायते भावे
लिट् आलीनां कुलैः तु यथाऽऽगतं तथा अगामि तथा अगच्छत अगमत् कर्मणि चगते न तु म्लानं तु म्लानामि-
सर्पः आपयातीयानां मीययोरयमेद इति भावः गमेर्ग सर्वस्य कर्मत्वाभावात् लुङ् इह वनपादपादीनां वि-
शेषणसामर्थ्यादपन्नाशोपपन्नतीते कर्थचित्सर्वोत्सर्कीरनैया॥४३॥१००

५६

यदति॥ ये पक्षिणः पक्षवंतः इंद्रेण छिन्नपक्षाः सर्वे संसर्गेरतिप्रसयः ते अद्रिपतयो मैनकाद्यः प्रथमं प्रागंबुनिधिं समुद्रं गताः प्र-
विष्टाः ये पि यति सर्पः इंद्रस्य प्राणिना तुलितेन प्रेरितेन आयुधेन वज्रेण लूनपक्षाः छिन्नगरुत्मंतः तेऽद्रिपतयः आक्षिप्ताः व-
नवनीताः केतबाधवज्राः कुपाः पक्षा स्तरणं निपेयवापवेलाया स्तरणं वर्णाः परिस्तोमः कुथो द्वयोरिति अमरः तेषां सैन्यगजानां छ-
लेन व्याजेन सरसी विगाहितुं गाहितुं सरसि स्वयति धूजदिवि तार्थविकल्पान्विडागमः जग्मुः अत्र गजच्छलेन गजत्वमपह्नु-
त्याद्रित्वारोपणछलादि शब्दैः रसत्यप्रतिपादनरूपोऽपह्नुवालंकारः तेन पक्षवत्ता महिषीणांसागरानगाह दर्शितो
नमस्सरा त्वयमपि सलीलमवगाहमानाः साक्षाल्लूनपक्षाः पर्वता एव ते इति उत्प्रेक्षा व्यज्यते॥४४॥ आत्मनेति॥ महो-
मोर्जलपेर्जलाशयस्य महति ऊर्मौ प्रतिबिंबिते अंगस्य तमभिमुखागतं अत्मानमेव प्रतिबिंबमेव सर्वः नि-
रीक्ष्य अन्यनागेन प्रतिगजेनाभियुक्तः इवाति तूर्णमपभीर्निर्भीकः सन् कोपाद्धावति अहो इति मोढ्येन विस्मयः
एतदुक्तमेहंमस्येति भावः अभियुक्त इवेत्युत्प्रेक्षायाः प्रतिगजभ्रांतिनिबंधनत्वात् भ्रांतिमदुत्प्रेक्षयोरंगांगिभा-
वेन संकरः॥४५॥ दानेति॥ अन्यकारिणा मतिगजेन मुक्तेन मदांबुना तिक्तं सुरभिकटुतिक्तकषायस्तु सौरभ्येति प्रकीर्तिताः इ-
त्यमरः अंभः आदातुं गृहीतुं नैष्ट तावितात्तुमपि नैष्ट तान्यनिष्टता क्रोधविपासाभ्यामिति भावः धूतो कुशेन सरुषा स-
क्रोधेन गजेन सरितोऽवतारे रुद्धस्तत्तिजनो घाःरिका न्निउदपात्राणि येषु ते करायस्मिन्कर्मणि यथा तथा चिरमास्त
आतिष्ठत आसउपवेसने इति धातोर्लङ् एकरूलादौ पुरयि तत्य अन्यतरस्यामिति उदकशब्दस्य विकल्पाद्दुदादेशः॥४६॥
पयानमिति॥ पयानमाद्रु विजहौ हिहि सजम्रीहाक्तहांगे लोट् सरिदादेशः अजाविति चिकल्प्याद्दीकारादेशः पुरोऽग्रे-
सोऽस्तनेपश्यन् प्रतिद्विरदस्य कुंभो विशंकते इति तद्विशंकि तोयस्यः गजकुंभभ्रांतिमदलंकारः स्तवेस्तरणे रमते इति स्त-
वेरमः रमः स्तवेरमः पमी समरः स्तवकर्णयोरपि जयोरिसच्चप्रत्ययः तत्पुरुषे प्रकृतवकुलमिति लकुपरिणिनेसः प्रह-तमिध्यं

सं०२० ५८

यं तानीवादीनि ढूं तन्निरस्तं वीतं पादं घातं कुशानारणे यस्मिन् कर्मणि तत् यथा तथा उल्लसंते उल्लसमानं मविवादं कर्मयुतं प्रोक्तं यात मे
कुशावारणं उभयवीतमास्थाय तमिति हत्वा युधः वालकेऽपि च वर्षगजं वंच वर्षी गलेपालो पोत स्युः दशवर्षकः इति वैजयंती शिक्षा
वशेन स्वकीयेन गजशास्त्राभ्यासवलेन के मण परिपाट्या परिसान्त्वना न्युपलालनानि तजेनाः क्रमं छेना ताभिः शनैः
वशानकैः अव्ययसर्वनाम्नामकच् प्राक् टेरिति स्वार्थेऽकच् प्रत्ययः शामशंतिमानिनाय तथा हि सुष्ठु निक्षिप्ता धीर्येषां ते
षां पुंसामित्यर्थः शा केसिद्धिनैति अति स्वभ्यस्तशास्त्रसर्वे च फलतीत्यर्थः विभक्तस्थ नाभ्यांतरो विजेता इव निक्षिप्ता धी
धीनिक्षिप्तेत्सुपञ्चर्येत अत्र एवा गमप्रमानार्थत्वाद् उत्तरपदस्याप्रयोग लक्षणो लोपस्तथा हुः॥४८॥ स्तंभमिति॥ करेणुः स्त्री
सौराजञ्च करेणू राजा गजः करेणुः स्त्रीनां राजा इति करेणूरा जो गजपतिः राजा च ध्वजेऽपि तेऽभयथा राजा हंसविशेष इव
च्चउज्वलपद्धुरीखवले स्यात्तस्य चूलाच्चारितता मापत देवाङ्ख्या उच्चितं चिरपरिचितं महांतं स्तंभमानमत्रेजा युंच
सहसा मुमोच स्तंभं स्थाणुजउ वयोरिति विश्वः सरसः सांद्रोऽग्रे हस्तः पुष्करं पाणिश्च यस्य स नु दानं मदः दीयते इति
दानं धनं च अतितरां मत्तिमात्रं किमेन मिथ्यादिनाम प्रत्ययः द्वौ वर्षौ यस्यार्थः परितो बद्धापराणि बद्धपश्चिमपादानि व
द्धान्यजलानि च अपरः पश्चिमे पादे इति गजप्रकरणे वैजयंती निगडानि शृंखलानि आयसशृंखला अंदुको निगडो स्त्रियां
मित्यमरः अलावीत लुनाति स्म लूञ् छेदने लङ् अस्तिसिचोऽपृक्त इति इट इति टिलोपः च वकेरेणू राजपदे राजस्य धा
र्मध्वनिः विशेषस्यापि श्लिष्टत्वान्न क्लेष इत्युक्तं॥४९॥ जरीस इति॥ गंभीरं मंद्रं वेत्तीति गंभीरवेदी अग्रे मदो ध्रुवं ततोऽपि ताव
मांसस्पर्शनेन दपि श्रा सात्तयोन जानाति स्या कुंभीरवदीति तिगज पुनी वचिरकाले नयो वेत्ति शिक्षां परिचितामपि गंभी
रवेदी विज्ञेयः स गजो गजावेदिभिरिति मग च र्मीयते तस्मिन् गंभीरवेदिनि करी दूसंरब्धः कुपितः हस्तिनः पातीति हस्ति
पः स एव हस्तिपको निषादी अधोरणा हस्तिपका हस्त्यारोहा निषादिन इत्यमरः तस्य निष्ठुर नोदनाभिः प्रबलतर्जनाभि
रपि मुकुलितापितं निमीलितनेत्रं यथा तथा पुरः कवलेग्रासं अन्नादरादने सति मंदो मृदुः ढिमि दुरोल्प अपटु निभामगामदइत्यम
रः गजभेदोपि भद्रो मंदो मृगश्चेव विज्ञेया स्त्रिविधा गजाइत्यमरः महान् अवलाधिकोऽवगा हृत्यसाध्योन न ना मनाक् स्वल्पितिर्ज

५८

यर

क्षिप्तमिति॥ वारणपतिः करिवरो मुहुः पुनः क्षिप्तं अग्रे न्यस्तं मिक्षुकांडुं न जग्हे नस्वीचकार अंगनिकटोपगतां समी
पस्थां करेणुं करिणीं नापेक्षते स्म न ऐच्छत् स्मभूतार्थे लिट् किंतु परिमीलितास्य यथा चर्यातथेति स्मयत्युत नु भावः इच्छ
या विहरणे षु तेवन वासाः तेएव महोत्सवाः तेषां संस्मरता नेव च्चिंतया मास स पर्थः अधिगतस्यादयेषां कर्मणि वा
शेषत्वविवक्षायां षष्ठी तस्य च्छंद चारिणां निर्विघ्नभोगेषु मनः प्रवर्ततेइति भावः वाक्यार्थहेतुक काव्यलिंगमलं
कारः स्मरणं हेतुः॥५०॥ दुःखेनेति॥ उत्क्षिप्तेउच्यते हस्ततलेदंतो निहितो येो विधानस्य गजग्रासस्य पिंडः विधानेह
स्तिकवलइति वैजयंती तस्य स्वेहस्तु सा घतादि निषेदेन सूपितेवा तुः अपक्षतन्नुजः प्राप्ते एर्यता त्कर्मणि कः अ
अनादरेण नमितं केवलं ग्रहणं च नापि कुर्वाणः इभाधिराजो गतिर्दु द्वीयादिना अपिकर्तुः कर्मत्वं दुःखेन कृच्छ्रेण
भोजयितुं शक्यस्य भावो नेतानंत ग्राह्यन्तकारग्रस्तानां कोन मर्पितेति भावः॥५१॥ शुक्लेति॥ शुक्लां शुक्लैः शुक्ल
पटैः उपचितानि उपकल्पितानि अन्यत्र तल्पांशवो अंशुकाः सूक्ष्मतेजोवयवाः अल्पइत्सा त्वार्थे कन् प्रत्ययः शुक्लैः
रुस्रैः रुपचितानि चंद्रमेउल्लनिभानीत्यर्थः नराधिपानां वेश्मानि दूष्याणि निरंतराभिर्नीरधाराभिः रुस्रैर्नीनमेघ
काभिर्गजपरिधीभिः स्वार्थे क प्रत्ययः कात्पूर्वस्येकारः नीलाभ्रपंक्तिभिः परिवेषः परिधिः परिवेष्टनमिति यावत् परिवेष्ट्य
परिधिरित्यमरः अपि जग्मुः रिवेष्टुलेखा॥५२॥ गत्स्वेनेति॥ गत्वा नाविशिष्टगमनमार्गगतयोऽध्वगमनानि येषां ते त
थापि गतारुमार्गाः पस्थिततदूराध्वन इति विरोधः अविविरोधे गत्वा नमार्गा मृगसंवंधि नी गतिर्येषां इति विरोधपरि
हारः अत एव विरोधाभासो लंकारः दर्पस्य तेजसो तः सारस्यादये नोत्कटयनोल्लसितस्य उद्धतस्य फेनजलस्य फे
नीभूतो अतस्य देहादकस्यानुसारेण प्रसारणेन सलस्थानि पल्लपयनवधूर्णां अप्सनवंधचर्मवरत्राणं पदा
नि तन्नोद्दंडमनीभूतस्य लानि येषां ते तथा तात् तुरंगाः भुवि वेल्लितानां योगपरिवर्तमानाय स्वैरं मंदं समान्य कुर्विरे समाकृताः

ना

अध्वक्रमापनोदार्थमितिभावः वर्द्धते दष्टेर्बंधनाद्दीर्घं भवतीति वर्द्धवर्द्धत्रपुवरत्रयोरित्यमरस्तु न धीर्वर्द्धीवरत्रा
स्यादित्याह वृद्धिवपि सोणादिकेण प्रमृते लघुपधगुणे रपरे सपतत्कार्यस्य कृसैषसत्वे धोर्धोः इतिधत्वषत्वा
स्त्रियां ङीपः ॥५३॥ आजिधृतीति ॥ वाह्लिरश्वयोनिर्देशविशेषः तज्जो वाह्लिजेऽश्ववाह्लिजे देशोपाटविशेषाप्रयोगेण
अप्यमानत्वादिस्तुतेदिगादिभ्यो यदितिभावार्थयस्यसयः तदंतविधिस्तुगम्यः प्रणतमूर्द्धनिनम्रशिरसिकृतप्र
सः तेनोल्लसितमुत्थितं ततमौयस्तन्तु ततरं रजः तस्याक्रम्यस्वांगसंगमेनवेल्लनप्रयुतेन यस्तुरवंतस्यानुभवेतु
त्सुकायाः उत्कंठिताथाः पथिव्याशोमाच्यता जगामे वेसुखेक्षणं साचमूतुरंगयोः प्रतीयमानचेतनानायिकनायिका
भेदाध्यवसायादिसवसयेविरोध्यतेभ्रनेनेतिविलोकनेकरणेघञ्प्रत्ययः चक्रीकृमिणपतरितिकुर्वलिंगमशं
ध्यलोकक्रियलाल्लिंगस्यतिनपुंसकत्वाद्विरोधः अत्र तएव घिद्वंनिर्वसनंरोकमिहमरः लोकोरक्ष्यौविलेह्येयमि
तिवैजयंती लोकोदीसौवलेलोकमितिवैजयंती विश्वः प्रकाशश्चायेतुकेनाप्यप्रायेणविरेकपवनेतिपठंतीतेषां
परोत्सर्गेऽर्कजिविनामितिपावनप्रतीतेरश्लेषास्थौदोषअक्लिष्टेततदमंगलत्वजुगुप्साव्रीडाधिकरणमितिलक्षय
णात् ॥५४॥ हेम्नइति ॥ हेम्नस्य लीघुस्यऍभ्रमिवुजानपदेसादिनाअहे तावेद्वौपप्रसस्तु वरितः परिवर्त्तसवेल्लयितात
पुच्छन्वनधूलिनिर्गमनायकेपयनेतएव मौ प्रविततताविशिष्टाञ्प्रायता केशपंक्तिः केशसंघातो यस्यसः वाजी ज्वालाकु
णाः स्फुलिंगाः तद्वद्दरुण रुच्यारः तवरणेन रेणधिकिरणेन उल्लसत्ताम्रस्तुत्कटतयावहिरुकघ्नताजसौ तः सारस्य
दर्पस्य विशेषणातिरेकेणैव रराजेत्युत्प्रेक्षालंकारः ॥५५॥ दंतालिकेति ॥ पुरुषकोनामाश्वानांस्थानभेदः तद्युक्तेपश्चि
मेनाग्रपादेनभुविस्थितानामग्रपादयोः उर्ध्वप्रेरणमास्या न मश्वानां पुरुषमस्ततः इतिपुरुषएवपुरुषकस्तेन पुरुषकेनोत्स्था
नकेनोन्नमितउर्ध्ववेस्थितोऽग्रकायः पूर्वकायो यस्य सः तथोक्तः अत्रतएवउदयशैलस्यमूर्द्धमस्तकादुद्धउदित

५८

नीराजनेति ॥ इमाः पादाः उन्नतोरुन्नतेषु तरुतलेषुनमनुः लावर्त्तततदानीं अघोरणैयंत्रिभिः रेवमभिहिताः सेतः इमां
दिग्धीस्तुपदिष्टाः पथ्युमूलशाखाः वेधनायस्ववेधनायैवतरसावलेनात्मनास्वयमेवच्छिंद्धिदृः नेच तथ्युम
स्यजनमोमोतरपदात्तस्वप्रत्ययः अत्रात्माधनोस्यइतिप्रकृतिभावात्मनेनतद्धितइतिद्विर्वचनेनाटिलोपः पूर्व
वदर्थांतरन्यासः ॥४४॥ उत्क्षालेति ॥ मनुजाः नराः उत्क्षेपोत्क्षाः उत्क्षप्रकाराः प्रकारेवचनस्यद्वतिद्धितिद्विर्वचनेनके
पानउत्कुल्लेविकचेउत्कुल्लयोरुपसंख्यानमितिसूपसर्गोविकुल्लेनिष्ठायां तस्यनीलनलिनस्यनीलोत्पल
लस्याहरेणतुल्यभासः समानकांतीनकृष्णवर्णानिसर्पाः विशालशिरसोविपुलमस्तकान्नेकानेक
तिसिन्नागानगजानिसर्पाः हरिचंदनेषु चंदनवृक्षेषुतेलेवर्णीकेगोशीर्षहरिचंदनमस्त्रियामित्यर्थः व
वेधुः अपरान्नागानहीनिसर्पाः पुष्पाभ्रांतिगजानागाः इत्युभयत्रापिवैजयंतीचंदनेम्योनिरासुरैतिच्छास
यामासुः अस्यतेलिटः अत्रोभयेषामपिनागानांप्रकृततत्वाकेवलप्रकृतश्लेषः ॥४५॥ कंडूयतइति ॥ कटभुवंगंडु
स्थलंकंडूयतः कर्षतः कंषतः कंडूदिभ्योयकततः शतृप्रत्ययः कंडूयतेऽगिधातुप्रकृतित्वादुभयपदत्वं करिण
मदेनसुगंधिशोभनगंधोगंधस्यैकेत्वेतदेकांतग्रहणान्नाद्धिर्येते कवयः नगस्यवृक्षस्यस्कंधंप्रकांडंअनुर
लीनवतातत्वक्लिष्टेनेसर्पाः लीयतेनिष्ठरूवतुप्रत्ययः ल्वादिभ्योइतिनिष्ठानत्वस्यूलानागंडलीनशाक
लानांआवलिवल्कोमलेनरम्यणअलीनांवलयेनगणेनकेटंगुणलेकेटवलयेमूर्द्धः मस्तकात्सार
गादकमलुकुम्भेजेप्रातकर्मणिलिटअत्रालिवलयेद्दनीलमयकेटकत्वरूपणत्वारोपालंकारः ॥४६॥ निर्द्धूतेति ॥०

लङ्कासमरः ३ उत्खायोत्खाय तूर्णं विद्रुतो धावितेऽन्यमश्वमश्वाः समनुद्रवत्तावडवाइविभ्रोसोऽनुधावता प्रयत्नपरेण
हीनं प्रयतमानेनापि मानुषैर्वै मनुष्यैर्दुर्ग्रहेण तुरङ्गेणैककटकः शिबिरमाकुल्यकारि आकुलीकृतः आकुलशब्दाद
भूततद्भावे च्विः अत्र तावितीकारः करोतेः कर्मणि लुङ् च्चिण् लुक् ॥ ५२ ॥ आकुलमिति ॥ वल्गामुखरज्जुः सा आक्षिप्ता
दिभेदेन पराङ्मुखचतुर्दशविधा तदुक्तं हयलीलावत्यां ॥ उत्क्षिप्तोत्क्षेल्पचला तथोत्तरपदी मंदा लवे हायसी विक्षिप्ते
कराञ्चकंधरसमाकीर्णौ विचलिता तथा अस्तु क्षिप्तते लोद्धृते खलु तथा व्यारूढगोकर्णौ केवाहानां कथिता चतुर्दश
विधा वल्गाप्रभेदा अमीति १ तल्लक्षणानि तु तत्रैव द्रष्टव्यानि विस्तरभयान्नलिख्यते तस्याः विभागः विविच्य प्रयो
गः तत्र कुशलो वल्गाविभागकुशलः इति षड्विधप्रेरणाभिज्ञ इत्यर्थः वल्गाग्रहस्य रागाद्युपलक्षणत्वात्केचित्तद्यथा
रभोजराजः वाहानां प्रति वाहानां षड्विधं प्रेरणं विदुः रागध्वल्गाकशापार्ष्णिप्रतोदतर्जनैः क्रमात् १ कश्चिद्धारुकः अ
व्याकुलं अव्यग्रमत्रस्तमित्यावत् प्रकर्षेण कृतं प्रकृतं सज्जितमित्यर्थः तदुक्तं मुखेषु मुखकर्मणि सिद्धः सिद्धिमतः
अश्वस्य चतुष्कारव्येगतिविशेषे मुखसंस्थानविशेषादिविशेषणविशिष्टमित्यर्थः एवेतोत्तरस्कंधरोध्यसितपेनल
वाभिरामस्फूत्कारवायुपदमुन्नतकंधरागमनि सोपकुंचितमुखं नवलो— सोऽश्वमश्वं च तुष्कसमये मुखसिद्धिमा
हुः १ इति उत्तरध्येयकर्मयुद्धाय्यु तरकाले ध्येयं विधेयं प्रयोज्यं यत्कर्मक्रिया तद्रूपा इत्यर्थः अव्यक्तिकीर्णरूपाः अस
कीर्णस्वरूपाः धारागतिभेदाः अश्वानां तु गतिर्धाराणु विभिन्ना सा चपंचधा आस्कंदितं धौरितं रेचितं वल्गितं प्लुतं इति
वैजयंती गतयोऽमूः पंचधाराः इत्यमरः अश्वशास्त्रे तु संज्ञांतरेण काः गतिं पुलाच तुष्काच तद्वन्मध्यजवाय रापू
र्णवेगा तथा चान्या च धाराः प्रकीर्तिताः हकैकात्रिविधा ज्ञेया हयशिक्षाविधौ मे तामध्वीमध्या तथा ...
ज्ञाहेता योजयेत्क्रमादिति तथा पंचदशविधा भवति ताः पंचधाराः प्रसाधयितु परिचेतुं नवसुवीथिषु संचार
स्थाने तु गमयो बभूवुः वीथ्यो नाम अश्वानां सर्वत्र धारादाढ्यार्थाः प्रमिताः प्रचारदेशाः ताश्च तसइहैकेनवैस
नेत्रत्रोत्तरपक्षमाश्रियोलं च विना नवविधिति तथा भोजराजः विथ्यस्ति स्रोप्यधाराणां लक्ष्मीमध्ये तमाः क्रमात्

तस्याः स्याद्धनुषां मानं मकरीति नवतीं शतं १ क्रमेण मध्योत्तमानां तु वाजीनां तु विविधिकास्मृताः नवानां कथिता वी
थ्यो दृष्टानो क्रमेणक्रमे रप्यन्येषामपि सर्वत्र गतिदाढ्यार्थमीरिताः समोन्नता सा विषमा च चूर्णा शुद्धा नताश्च
स्या तथा वीकदाद्यः स्यात् सुप्रकीर्णविलसत्प्रकीर्णं पार्श्वोन्नता स्यान्नवधेति वीथ्यः १ सर्ववीथिषु यो वाजी दृष्ट
शीघ्रमशंकितः तेन राज्ञा रणे निःसंगयं तु मुदं विजेदिति अन्ये तु रसास्वादयो गतिविशेषा वीथय इत्याहुः उ
रसावलिवरश्याली पद्मुलोमध्यमानकः आलीढशोभनैः रंगैः प्रत्यालीढस्तथा परः उपधेन च मुक्तं च पादचा
री च सर्वगः निर्दिष्टा वीथयस्त्वेता इति ॥ ५३ ॥ मुक्तेति ॥ मुक्ता विहारार्थं उत्सृष्टा अतएव कटकशिबिरपरितः अ
भितः परितः इत्याहिना द्वितीया तृणानि चरंतो भक्षयंतः तरसा तिपुच्छिद्रिरा सुवितानतनिकासुपटमंडपरज्जुषु व्याप
तिसंगमजंतीति तथोक्ताः अतएव सरोषैः परिचारकैः किंकरैर्वीर्यमाणास्तुरंगाः दामांचनानि पादपाशाः पीडां मो
चनेपादपाश इति वैजयंती दूष्यावरत्रावेधनशंकया इति केचित् तेषु स्खलितेन लोलानि पदानि यस्मिन्कर्मणि
यथा तथा ससृजुः ॥ ५४ ॥ उत्तीर्णेति ॥ उत्तीर्णभारं अवरोपितावपनं अतएव लघुस्तेन लघुना तथोत्तेन तथा च लो
पुनाउपलानां वल्वजतृणानां आघेनयस्तोऽत्रि से पूर्तिः पर्याप्तमुपसंपन्ना पूर्तिः सौहित्यमुच्यते इति हलायुधः तेनप
तेन निःसृततरेणप्रतमसे हृणे मंदेन वाह्यभारावतारे यत्तः प्रतिभाजनाद्दुरुभवते ... सेहेनिष्पूर्वास्य च ताच्छ
रप्रत्ययः ३ लपावल्वजाप्रोक्ता इत्यमरः इत्यमरः अश्वस्कंधेण्य साम्नूरेन गोत्रक्षेत्रेत्यादिना हुज्प्रत्ययः तरोरधस्तात्
तरुतलेरोमंथः पश्चनांचर्वितचर्वणं तेन मंथरं मंदं चलं तोगुर्व्याः सा सा ग्लंगलकैवलो यस्मिन्कर्मणि यथा तथा सा
क्षात्सृगालकेवल इत्यमरः किंचिन्निमिलितं मुखानुकुलीभवति अलसानि चक्षूणि नियथा आसांषेक्षे आसिते
आश उपवेशने भावे लिट् वयाय सत्रेसाम्प्रत्ययः कृञ्जचानु प्रयुज्यते लिटि नुचानु प्रयोगः इति प्रकृत्या चतुष्टयः निश्वा
भावोक्तिरलंकारः ॥ ५५ ॥ प्रेतिपि इति ॥ म्लसिहैव प्रकीडालमस्तवं कैः श्रवरितौ संज्ञा तद्रोसराः कोष्टयोऽग्राणि येषां ते
अतएव शिखाग्रगतमुभयकोटयंतरगतलक्ष्मीवमलेयस्यसः एवंभूतश्चेततमर्द्धचंद्रं तसद्भिरिस तिरायोक्तिभेदः

सं०का० ६०

सुतं अभूतोपमेतिमत्तां तरंगैर्गैर्विषाणैः उद्धृंगाः उत्पाटित तरंगाः कृताः उद्धृंगिताः अन्येत्र्यभाः प्रातिवृषभार्थे स्तैरत स०५
एवधीरं गंभीरं नदं तो गर्जितो महांत उक्ताणो महोक्षः अक्षचतुरेत्यादिना निपातनात्साधुः सरितां रोधांसि अवस
स्कंदि [illegible] अभिलिलिख्युः ठषादुरुज्जु रित्यर्थः अवपूर्वात् किरतेः कर्तरि लिट् किरतेर्हर्षात् कलाप करणेष्विति वर्त्तामि
श्री४ ति हर्षे आत्मनेपदी उद्धृतो निमित्तेर्गुणः अवाचयहे षोच्छ कुले खालेन इति सुडागमः ॥६॥ मेदस्विन इति ॥ऊ अ७
र्जो बलमस्यास्तीति ऊर्जस्विलेन बलिना ज्योत्स्नातमिस्रेत्यादिना निपातः उक्षणा वृषभेण मेदस्विनो मांसला
न् अश्रमयामेघा स्रग्ध्याविनिः अतएव सरभसं सत्सरं वेग उपगतान् अभिकान् सतीः अभिकान् कामुकान् कमनः का
मयिता भीकः इत्यमरः अन्वकभीकामीकः कमितोनिपातः परान् ननु दुहोवलिवं [illegible] दर्नान् मुहुरुदहवे नर्मकानि जि
सजयेनोदूरे ररु व्युद्धिररित्यादिना समासांतः विषाले विषाणे यस्मिन् कर्मणि यथा तथा निर्मसपत्नो अ
प्रतिपक्षं सुरभीमनुगवां पश्चात् कर्मप्रवचनीययुक्ते द्वितीया जगमे गते गमेर्भावे लिट् ॥६॥ विभ्राणमिति॥
आयतिमतीमतिदीर्घवतीं नवचर्चाउ अत्र तरुपल्लवग्रहणात्सफलामिव यः शिरोधीयते यस्यामिति शि
रोधिं ग्रीवामश्वपत्नीवा यो शिरोधिः कंधरे इत्यमरः कर्मण्यधिकरणे चेति किप्रत्ययः विभ्राणा दधाने उदग्रमुखपल्
ल्लवग्रहणार्थमूर्ध्वमुत्क्षिप्तं तु उ श्रीवृक्षकमुखसमूहं गोत्रक्षेत्रे त्यादिना वुञ् प्रत्ययः अतिशयितो रसो स्यादाय
स्यास्तामिति रसो प्रसक्तां अभिनवलेदधंति दधानानि वानं पुंके स्पोति वैकल्पिको नुमागमः अभ्रंलिहंतीति
अभ्रंलिहानि उच्चतराणि वा त्रौ भ्रौ तिलिट् प्रत्ययः अरुर्द्विषदजंतस्येति मुमागमः तरूणां नवपल्लवानि पल्लवोस्त्री
किशलयइत्यमरः लोलोल्लोलं यथा तथा आलोलौ वो समासेवा पररूपं वतं व्यंलिलिहे अश्चादयामास जघास इत्यर्थः
॥६॥ सार्द्धमिति ॥ उचितैरम्य [illegible] तन्यात्प्यमिति यावत् पिचुमंदपत्रैर्निंबदलैः सार्द्धं स्थाप्य पिचुमंदश्च
निंबेयोर्धइत्यमरः कुतश्चित्प्रमादात् स्यांतरालागतं मुखांतर्गतं मदीयोमदत्तरं आम्रदलं चूतपल्लवं रसेरकः उच्छ
सपदि पुरानिषादौ म्लेच्छैः संवलितं कच्चिद्धिर्मिश्रं विप्रं पतगराट् गरुत्मानिव निर्जगार उद्गीर्णवान् पुराकिल कुत ६०

ऽर्द्धोदितः हरिस्सूर्यः इव स्थित इत्यर्थः अर्द्धोदितविशेषणात् तु उच्चैरुन्नतः श्रीवत्स एव श्रीवत्सकः आवर्तविशेषः त
ह्यन्तःस्थः श्रीवत्सकी वक्षोजन्मावर्तश्चतुष्टयकं दृभवेयस्य चरोच्यमानः श्रीवत्सकी नाम हयः सभर्तुः पुत्रप्रवोत्र
थ्यविवृद्धये स्यादिति लक्षणात् श्रीवत्सकी वक्षसि चेदावर्त्तामुख्याविचेति वैजयंती दंताल्यवदंतालिका मुख
रज्जुः मुखरज्जुस्तु दंतालिः कलक्षणि रक्षणीति च वैजयंती तस्याः धारणग्रहणे निश्चलस्थितले पालियुग्मं यस्य
पालिभ्यां दृढं गृहीतोभयवल्गामित्यर्थः वल्लभपालं उत्तमाश्वपालं च वल्लभो दयितेऽध्यक्षे कुलिनेऽश्वेपि वल्ल
भइति विश्वः स्तोकेन नताः क्रमत वल्गाग्रहणे दार्ढ्यात् स्तोकेनापि नाभिभवितुं शक्तोऽभूदित्यर्थः इत्थं लघमत
के तुभय एवेतिव्याख्याने निश्चलपाणि युग्मतादिति विशेषणं धिगत वाहकौ शल्य प्रकाशनेता त्पर्यं न्याग प्रसं
बे गात् करणे च स्तोके सादिनात तीयास्यनुसर्गद्धति विकल्पाद्दात्मनेपदं उपमालंकारः ॥५६॥ रजइति॥ सपतेना
भिकेण सांद्रतरमार्द्रो मूर्तियस्य स अनतिमृषदृष्टिभिर्विस्मयादनिमिषात् जनैर्दैवैरिव तादृक्कौनिरीक्ष्यमाणः श्रिय
शोभायाः श्रीदेव्याश्च संनिधानेन रमणीयतरः तत्र सन्निहितालक्ष्मीः ऽस्तिअत्रोत्तरमाहूयादियागमादिति भाव उ
अरुन्नतोऽश्वः जलनिधेः समुद्रात् जात एव जातमात्रः सद्यो जात इत्यर्थः अन्यथा साधर्म्यासंभवादिति भावः मात्र
का र्त्स्न्येवधारणे इत्यमरः उच्चैः रुन्नतं श्रवः कीर्तिः यस्य उन्नतेश्रवसीकर्णौ वा यस्य सः उच्चैःश्रवाः शक्राश्व इव रे
जे उपमालंकारः ॥५७॥ अश्वानीति ॥ पुरोगे हरितके हरितं अस्वन् स्वतएव गीवागे लोलाः चंचलाः कलाः अव्यक्तमधुरा
श्वयाः किंकिणीकाः क्षुद्रघंटिकास्तासांनिनादेन मिश्रितद्रशनानां खुरैः ध्वनिदध तत्र तत एव मुदमादधानः उत्पादयन्नश्र
मि रश्मा विश्रुतः अश्वस्य शिक्षा वीक्ष्य अर्थः वीणाः श्रूयते दुदुभयः किं श्रूयात इत्यादिवत् शिक्षाचर्मः शिक्षिप्रवर्त्तयते स्यमाबो
कि रलंकारः ॥५८॥ उत्स्वायेति ॥ दर्पाश्चलितेनोल्लासितेनातएव रवैर्ज्वापशेन सहैवकीलशंकुशंकौ चापिद्धयाकी

स०२०
६१

स्थिता प्रसवश्रीः पुष्पफलसंपत्तिर्यथा स्यात्तथा तरुप्रसवश्रीः प्रसवस्तु फले पुष्पे इत्यमरः शाकपार्थिवादिषु द्रष्टव्यः।
सा कृता येन कृतयस्य तरुप्रसवश्रिया यथा स्यात्तरुप्रसवश्रियेत्यर्थः। ऋतुगणेन षड्ऋतुसमूहेन युगपद्विप
दमादधे आहितं युगपदृतुगणप्रादुरभूदित्यर्थः। न ह्यवसरे सेवकाः प्रतीक्षन्त इति भावः। अत्र सर्गे सर्वत्र यमकं शब्दा
लंकारः तल्लक्षणं तूक्तं च तुर्थे अर्थालंकारस्तु यथासंभवमह्यः। अस्मिन् सर्गे द्रुतविलंबितं वृत्तं द्रुतविलंबितमाह
नभौ भरौ इति लक्षणात्॥१॥ अथ लोकवेदयोः प्राथम्येन व्यवहाराद्वसंतमादौ वर्णयति॥ नवेति॥ स हरिः पुरो
ऽग्रे प्रथमं नवपलाशानि नूतनपत्राणि पलाशवनानि किंशुकाननानि यस्मिंस्तं नवपलाशपलाशवनं नवद्रु
रिः पलाशः किंशुके पत्रे पलाशमिति विश्वः। स्फुटानि विकचानि परागैः रजोभिः परागतानि व्याप्तानि पंकजानि
यस्मिन् तं स्फुटपरागपरागतपंकजं मृदुलाः कोमलाः अतएव तान्ताः आतपसमये किंचिन्म्लानाः लतास्ताः पल्ल
वा यस्मिंस्तं मृदुलतान्तलतान्तं सुमनोभरः पुष्पसमृद्धिभिः सुरभिः सुगंधिं सुरभिं वसंतमवलोकयत् अपश्यत्
सुरभिश्चंपके स्वर्णे जातीफलवसंतयोः सुगंधौ च मनोज्ञे च वाच्यवदिति विश्वः। इह प्रतिपादं प्रथमाक्षरद्वयात्प
रतोक्षरत्रयावृत्तिरूपयमकं प्रथमाच्च तुर्यपादेपि तदेव यमकमेकस्मादप्यपरिमितिसजातीयोसंसृष्टिः॥२॥
विलुलितेति॥ विलुलितालकसंहतिः विधूतचिकुरनिकरः सन् मृगदृशां ललाटजं श्रमवारि स्वेदमामृशन् प्र
मृजन् मंद इति भावः। सरसां तनुतरंगततीः दलैति विकसंति कुवलयानि यस्मिन् कर्मणि कर्मणि तद्यथा तथा व
लयन् व्यालयन् शीतल इति भावः। मरुत् वसंतवायुराववौ आवाति स्म॥३॥ तुलयतीति॥ कुरबकस्तबकव्य
तिषंगिणि लग्ने अतएव गुणवतः उल्लागुणस्य कुरबकस्तबकस्याश्रयेण आश्रयेण लब्धोत्कर्षगुणोद्यो निजनीलिमगुणस्तैर्योर्य
न तस्मिन् धवले नीलस्य स्फुरणादिति भावः। अलिनि भृंगे मलिनस्य भावो मलिमा माधवयोषितां हरिवधूनां विलोचनानां तार
काः कनीनिकाः तारकाक्ष्णः कनीनिके इत्यमरः तुलयति स्म समीचकार तद्वच्छायां वितर्थः तुल्यशब्दात्सदृशपर्यायात्करोति एपते

स्फुटमिति॥ उज्वलकांचनकांतिभिः शुद्धसुवर्णप्रभैः अंपकैर्युतं चंपकप्रसूनमध्यगतं इत्यर्थः स्फुटं विकचं अशोकपुष्पमि
दामेदः विद्धिदादिम्यो डः तां बिभर्तीति तस्मिन् दाम्नः तो भिन्नस्य विरहिणां हृदयस्य हृदयपिंडं संबंधि मदनाग्निना कपि
शितं कपिशीकृतं पिशितं मांसमिव शोभते स्म इत्युत्प्रेक्षा॥५॥ स्मरेति॥ आम्रवणस्य चूतवनस्य आम्रश्चूतो रसालोऽसाविद्य
त्यमरः प्रनिरंतः शरेक्षादिना वनं नकारस्य णत्वं रजः कणाः परागचूर्णाः स्मरहुताशनः कामाग्निः स एव मुर्मुरः तुषाराग्नि
मुर्मुरस्तु तुषानल इति वैजयंती तस्य चूर्णतां दधुरिवेत्युत्प्रेक्षा अतः मुर्मुरचूर्णत्वादेव परितः उपरि निपतिताः ते रजःकणाः
पथां गच्छंतीति पथिकाः पथः कन्निति कन्प्रत्ययः तेषां व्रजान् सर्वान् परितेपुः परितापयामासुः अतो मुर्मुरचूर्णत्वोत्प्रेक्षण
मिति भावः॥६॥ रतिपतीति॥ प्रियतमे विषये कृतक्रुधः कृतप्रतिघा रुट् क्रुधौ स्त्रियामित्यमरः वधूः नायिकाः कुपिता
रनुनेष्यतीं तमेव वुलोत्सिपयायां क्रियायां अर्थयोमिति भवष्यदर्थे एवुल प्रत्ययः अनेकोऽर्भ विभ्रद्रः धमर्षयोरितिषष्ठी
प्रतिषेधात् वधूरिति द्वितीया रतिपतिना कामेन प्रहिता प्रेरितेव तद्वाणीश्रवणानंतरमेव तासां कोपत्यागदर्शनादियमुत्प्रे
क्षा वकुलपुष्पाणां रसो मकरंदः स एवासवः तेन तत्पानेन पेशलध्वनिः मधुरस्वरा मधुपावलिः कं नीनगदतीवेत्युत्प्रेक्षा
नितरां गानिगताः इणो गालुँ इति गादेशः॥७॥ प्रियसखीति॥ गुरोर्महतो मत्तरस्य हेतवस्य छिद्दुरयोच्छ्यामिदि विदंधि
दः कुरचकाम्यगिरा गाह वात्सा परपुष्ट्या कोकिलया प्रियसख्याः सदृशं यथा तथा किमपि परै दुर्वोधरहस्यं हितं प्रति
वोधिताः उपदिष्टाः अंगनाः प्रियतमायायाचितम मार्थितमेव वपुर्निजांगमद्धः पर्ययामासुः ददति लुङि गातिस्थेत्यादिना
॥८॥ मधुकरैरिति॥ मधुकरैरेकैरपि अपवादे मृगवेचनाय घटादिकुत्सितत्वाच्चेतीसपवादकराः व्याधास्तैरिव पथिकाः हरि
णाइव परिवादिनीस्वररंजिता वीणाविशेषध्वनिना विन्यासमह[illegible]भिः परिवादिनीयमरः जेः क्लिप तुकवचसोगीतस्यकु
मृगसारश्चपाके पञ्चारिके मृगहमुपमेवुपथिकेष्वस्तीति विरोधः स्मृतिभुवः स्मरस्य मृगतपा तद्विता विवयहान्मृगमहण

कि

सर्ग६
हि
६१

तद्देशस्य चवशमायपुः यथाव्याधगानसत्यागते मृगाः पतंति तद्वन्मधुकरहुंकाराकृष्टाः पथाः स्मरपारवश्यंमेजुरित्यर्थः अ
नेकेषामुपमेयानां ॥६९॥ समभिसृत्येति ॥ प्रमदयाकर्त्र्या कुसुमानामवचित्या चीयया अपचयनंकर्तुमिच्छया परिरंसयेतिभावः चिनोतेः स
नेतादृक्प्रत्ययाद्स्तिस्त्रियामकारविधौभाषाचेरितिविकल्पात्कुत्वाभावः रसाद्रागात्समभिसृत्यसमागत्यवलंबिता हस्तेनगृ
हीतः तथापि अविनमन्अतएवदृष्टो अकैतव्यपमुन्नतो वन्यपादपः ननुनागरिकाभावः नन्नताइतिअन्नताइतिअसंबुद्धौ
रसात्तयाअन्नतयानुभोवानतातयात्तत्तयापुंस्त्वेननरराजसुः पुमांसंपचजन्नः पुरुषापुरुषानराइत्यमरः यः कांता
र्थिप्रियामलिपातेनभीवनत्रिभिः कुलकेनाह ॥ इदमित्यादि ॥ स्तनभरेणसाधनेनजितानस्तवकाभ्यामानवंतीनवल
कस्तवकेपरागिणीः परागवतीरितिविरक्तिहेतूक्तिः अंकुरुहाणांततीरपास्यतवाभिमुखंवलतेचलतिविशिष्टलता
भ्रमादितिभावः तथाचभ्रांतिमदलंकारोव्यंजते ॥७१॥ अथालेस्तदभिमुखागमनेकारणमाह ॥ सुरभीणीति ॥ तवसुरभि
णिश्वसितेनिश्वासमरुतेनवसुधावन्मधुरेअधरेसत्तयंतमंदंपानीतस्यालेर्भ्रमरस्यममैवात्मूउपलभ्यमानोसुमन
नाट सौपुष्याणांसंवेष्टिनो सोमनसोगंधरसौ रसमाधुर्यमनसांतः करणस्यमुदनालेनपर्याप्तोअतस्तद्दृढनरसगंधलो
भादागच्छतीत्यर्थः गमः स्त्रतीयादिनाचतुर्थीअत्रकांताकर्तृकस्यगतालिपस्युवार्थिनः प्रियस्यतद्वयहेतो रत्लरेवगा
गमहेतुत्वेनोट्टंक्तेनमुखसौरभरसलोभभरवैराग्यबार्थलेषितुमोचितायमकानुसारेणविप्रकृष्टनोपिममशब्दे
नेवशब्दस्यान्वयः वलतेमभिमुखंतवअलिभयादिवसस्यजेइत्यपक्रमोपसंहाराभ्याममलः प्रकृतेनोपमेयत्वावगमतः अ
नयथामध्येतद्विपरीत्येतद्विरोधाद्विसलभिनुवालक्ष्मीर्ध्वगमनेनअथोपमानुप्रातयमकानंतोवद्विजातीनांसंस्य
छिः स्पष्टैव तथायमकावयाणांचतुर्थपदाद्वेवेकस्मादक्षराद्भाभ्यांत्रिभिश्चपरतोक्षरत्रपावृत्तिलक्षणानास्थितता
त्सजातीयसंसृष्टिरप्यत्र ॥७२॥ इतीति ॥ इतीत्यंगदितेप्रणयिनमनंतरमुजपगस्यान्नमनेनउच्यतएवसन्नतोसनौ
यस्याः सासंगा अोपसर्जनाद्इसंयोगोपधादितिङीप्वलिभयावलयाविद्यतेयस्यास्तयावलिमसातुद्विवलिवदर्मर

दधातेर्

लिर

श्चित्कारणात्तमलेक्षमक्षरीतैः मलांतेप्रविश्यगलेदृहतविंप्रगरुडः सपदिदुत्कागरतिषोरोक्तीकथानुसंधेया ॥६९॥
स्पर्द्धामिति ॥ वरिस्पितवत्ततिअनुकीविजनायराज्ञोवसरकांक्षीणरतिभावः राज्ञांअचपाविशेषतत्कालोचितचरित्र
विशेषस्यकृन्निवेद्यंतेः तज्जकप्रबंधपाठैरितिभावः कलगिरोमधुरवैत्तालिकाः मंगलपाठकाः अवसरेषुत
तेहेलास्फुटैः प्रसिद्धैः पदैः प्रकटः प्रकाशोथोभिधेयंयस्मिनुकर्मणिययाथातथाउच्चैः रुच्यस्तराभोगाव
ल्लीः प्रबंधविशेषानपेठुः पठतिस्मअतएवकलहमध्येनअदेशाल्लिटिसेवाभ्यासलोपो ॥६८॥ उन्नम्रेति ॥ उ
णसंभिन्नेः घनैकैर्धुरितस्यचित्रीकृतस्यांतरिक्षस्यलक्ष्मीविडंबयंतीसनुकुर्वतीतितयाकेतकीचकीर्तस्यमेगल
कीर्तैः हंसस्यतद्विविरचकटकेअवभासेमनोहरमस्त्वादित्यर्थः उपमालंकारः ॥६९॥ धरस्येति ॥ वलैस्तैरांताड
सौतिरिवतिः रैवतकः क्रीडाविहारमार्गो दृष्टिरदैर्मथितानांभग्नानांउवींरुहाणांवृक्षाणांरवैःशब्दैर्निमित्तैनश्री
पतिं हरिंनन्वेगतेकं स्तंधरस्यपर्वतस्याद्धतीधारकोसिइतिसर्वजगतिप्रतीतः प्रसिद्धः ननुगोवर्द्धनोद्धा
रणादितिभावः ततर्हिकिंकिमर्थंप्रतिभरंप्रतिभारवंतेमांअधः प्रापयिषुः प्रापयितुमिच्छुः असिप्रापयितेः सन्नंता
दुप्रत्ययः इत्युरुपालब्धेवउपालंभोक्तेवकृतवानित्यर्थः अत्रकुष्टादिवस्तुत्प्रेक्षाउपाउपूर्वल्लिभेलुङ्गा
कारउपदेशोउदात्तोदिट्प्रतिषेधः तथस्तयोर्धोधइतिटकारथकारः घितिनेतिसिचोवकारस्यलोपः ॥श्रि
खरिणीवृत्तं ॥ रसैः रुद्रैश्छिन्नायमनसभलागेशिखरिणीतिलक्षणात् ॥६९॥ ॥ इतिश्रीपदवाक्यप्रमाणपारा
वारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितेमाघव्याख्यानेसर्वंकषाख्येपंचमः सर्गः ॥५॥ ॥ अथेति ॥
अथकेतुवर्णनप्रस्तौति ॥ अथसेनानिवेशानंतरंगिरौरैवतकेरिरंसुरंतुमिच्छुरमेनसनेतादुप्रत्ययः एतेनतुवर्णनप्रव
तेः प्रभुरमितवत्तिलानपूर्वकंसमुक्तं सतांसाधूनांविपदामंतकरोतीतिविपदंतकृतक्विपतुमागमः तविपदंतकृतंसेव्य
मितिभावः अमुहरिंनिषेवितुंस्यतरूनस्यनियतवृक्षाननतिक्रम्ययथास्यंतरुपदार्थेव्ययीभावः यथास्वंतरु

प्रिंश्च मंगलं चिक्कनिंदती सर्पाः धिक्कु निर्भर्त्सनं निंदयोरित्यमरः धिगुपर्यादिषु त्रिष्विति द्वितीया अतो मारुद इत्यर्थः
॥१७॥ सजतीति॥ प्रियतया इष्टतया अधरपंक्तिभिरनवद्यैस्त्रिभिः प्रेमपशंतिभया न्ययादेपीतिभावः बांधवे त्वयि विषये
गदितावुच्चारिताः कथंवत सौ बाला विरहवेदनया अचिरादसून्प्राणान् सजति वर्तमानसामीप्ये लट् इति
वं विधा गिरः उक्ताः हे सखि विगतयत्यासं यया सा ताः विवितचा अनुताः वितथैवन्नितेवत्व इत्यमरः चतुर्थी हे विशेष लिं
गता बाह्मणादिकृत्स्यः ततो नञ् समासः अवितथाः सत्याः मा वि[illegible]तथाः मा कृथाः ख्याति क्वाकेनमावख्याह इत्यर्थः वौ
पूर्वी तनोतेर्लुङि थास् तनादिभ्यस्तथासोरिति विभाषा सिचो लुक् अनुदात्तोपदेशेत्यादिनानुनासिकलोपः ना
माङ्योगे इत्यडागमप्रतिषेधः ॥१८॥ नेति॥ किंच असौ ते प्रणयी दूरगतो दूरस्थोपि महेव सन्तो सवं महउद्भव उत्सव
इत्यमरः नातिवर्तते नातिक्रामति इति वंधुतया वंधुसमूहेन ग्रामजनवंधुजनसहायेभ्यस्तल्लितितल्प्रत्ययः उदितैः उ
त्तैः वदेकमेणिताः आतैः ससवल्लवैः संदेतच्छमतेत्समृगमूर्तिस्त्रिषु तद्धिदित्यर्थः वहिः प्राणयिनः तदैवदैवादागत
स्य स्वरकंटगतशंकुनिशस्यश्रुवाशमुप्रदर्शनं इति चौरादिकाल्ल्युटपि लाद्भस्यः ल्पपिलघु पूर्वादित्यपादेशः वधू
अमृतैः सुधाभिरिव निर्वृतो निर्ववारवातेर्लिट् निर्वाणं निर्वृतिः सुखं ॥१९॥ मधुरयेति॥ मधुरया मनोहरया मधु
नावसंतेन वोधिताः विकसिता माधव्यः पुष्पिताः सूपचर्यंते तासां माधवीनां अतिमुक्तलतानां अतिमुक्तपुंड्र
कस्याह्वासंती माधवीलतेत्यमरः मधुसम्भ्यामकरंदसंपदा समर्पितमेधया संवर्द्धितप्रतिभया अतएव उन्मदया
तास्तुन्मदो मदकरः पञ्चाद्यच्तं ध्वनिं विभ्रती उन्मदध्वनिमत्तया तद्भूता मधुकरांगनया मुहुर्निर्मिता स्वर
लक्षणया स्वरनादेयया तथेत्यर्थः अप्यवाधाद्वा वर्णात्मक एव व्यंजकविशेषाभावादस्फुट इति मततमात्रिस उक्तः
सर्वपथिनाः केवयइति उज्जगे उच्चैर्गीता गायतेरविवक्षितकर्मकाद्भावे लट् गंधवे वम्पराहिस्मसमतात्पट्गुंफल इति

॥२०॥ [illegible]

सर्गः

अरुणेति॥ अरुणितान्यरुणीकृतानि अखिलानि शैलवनानि यया सा मुहुः पथिकान् अध्वगान् विरहिणः अप
रितापिनः संतापवतो विदधती उच्चैरेवो अकेरुद्धता अव्ययसर्वनाम्नामकच्प्राक्टेरिसक च प्रत्ययः विकच
विकसिताया किंशुकसंहतिः पलाशकुसुमराशिः सा दव हव्यभुजः श्रियं दावाग्निशोभां दुदुवे हत निदर्शनालंका
रः॥ इति वसंतवर्णनम् ॥२१॥ अथ ग्रीष्मवर्णनमारभते॥ रवीत्यादि यत्र शुचौ शिशिरीरजसां रच्यः क्वा तयः रवितुरंग तनू
रुहतुल्यतां स्वयाश्वरोमसावर्ण्यं विदधति हरिवर्णं भवंतीत्यर्थः अथ सो शुचिर्ग्रीष्मः शुचिः शुक्रेनुपहते शृंगारे[illegible]टयो
स्तथा ग्रीष्मे हुतवहेपि स्यादिति विश्वः नवमल्लिकाः पुष्पे जातीप्रभृतयः स्त्रीलिंगा इत्यमरः पुष्पमूलेषु वहुलमिति
लुपितिव हुलग्रहणात् लुप् लपियुक्तवद्व्यक्तिवचने न भवतः चिराच्चिरात्स्यापि नीसौ रभसेपव्यासां ताः स्थिरगंधा
इत्यर्थः विघनं कुर्वन्ननुपययौ प्राप ॥२२॥ दलितेति॥ पाटलया अवयवाः पाटलाः फले लुक् प्रकरणेषु मूलेषु वहुलमितिव
हुलग्रहणाद्दलुक् तेच ते कुमलाश्च दलिता विभिन्नाः कोमलाः पाटलकुमलाः पेन तस्मिन्निजवधूनां श्वसिते निश्वासे अ
नुविधते अनुकरोतीति तयोक्तास्तादृशी इत्यर्थः उन्मदाः भ्रमता अलयो यस्मिन् उन्मदभ्रमदलौ मरुति ग्रीष्मानिले वातिव हु
तिसति वातेर्लट् शत्रादेशः विलासिनिर्वलसनशीलैः कामिभिः वौ केवलशकस्य अभइति घिनुण्प्रत्ययः मदेन चापलैः
ल्पमुपाददे मतेर्जातमित्यर्थः ॥२३॥ निरधरिरइति॥ वरोरुभिः स्त्रीभिः तत्क्षणस्नपनेन सद्यः सेकेन वारि तुषारभृता जलल
सीकरधारिणा इत्यर्थः तुषारो हिमसीकराविति शाश्वतः स्तनाः दयितोरसि निरधरि निहिताः तेषां शीतापसांतये स्त्राना
र्द्रेण वालिलिंगुरित्यर्थः किंच करेणुर्भवाणिनासरसस्रार्द्रयंदनैरेणुः घटघटन्चंदनपंकस्य विवकरे विकीर्णः करोते
कर्मणि लिट् ऋदुपधत ताम्यितिगुणः करेणुकरोरिभिरिति पाठस्तु ऊरूत्तरपादादोहस्य उप्रसंगात्स्थेयः ॥२४॥ अथ वर्षाव
र्षावरणमाह॥ स्फुरदिति॥ सा दिशः स्फुरती अधीरे चंचले तडितो नयनेइव तडिन्नयने यस्याः सा अगलिता स्रारतार उरूपयोधरा

सं०क०

६४

मध्याय स्यां सा अन्यच्च ऊरू च पयोधरौ च ऊरूपयोधरं प्राण्यंगत्वात् द्वंद्वैकवद्भावः तदागलितेन पतितं यस्यां सा ज सं०क०
लधरावलिर्मेघपंक्तिः अथ च जलधरावले मेघवपयोधरान्तौ च आवयवावयवविभावात् पृथक् निर्देशः अप्रतिपालितस्व
समया अनपेक्षितनिजवेला सती एकत्र यौगपद्यादन्यत्र धैर्याच्चेति भावः जगतीधरैरेव तक्रमूर्द्धधर प्रियमिव सम
यान् समागच्छन्त्या तेर्लक्ष्ययोर्जगतीशब्दयोः पर्यायत्वे न धरशब्देन षष्ठीसमासः अथ च विशेषणमहिम्ना जलध
रावलौ नायिकात्वप्रतीतेः समासोक्तिः सति प्रियमिवे सुपन मांग नसंकीर्यते ॥२५॥ गजेति॥ नभसि श्रावणमासे नभः
श्रावणिकश्च सइ समरः अथ वरेण्यौ मिलितगजकदंबकमिव मेचकश्यामलं श्यामं कालश्यामलमेचका इत्यमरः उच्चैरेवो च्चह
कैरुन्नतं नवाम्बुदवीक्ष्यांगनाएकः एकायनः रसो रागो यस्य तमेकरसं रसांतति रसितं तं रसमित्यर्थः केवलं लभं प्रिय
रहः एकांतेन चकमेनकामयते स्म तथा नामिससार च सर्ववल्लभं सर्वापितत् दर्शनाच्चकमे अभिससार चेति नवाम्बुदस्यो
द्दीपकत्वातिशयोक्तिः इतकामनापूर्वत्वादीति सरणस्य तत्कार्य क्रमुवलीय सत्स्यायेनयमकवशाया तक्रमवापेनयोजन
नान्याय्येवा ॥२६॥ अनुययाविति॥ ध्वनुर्वलयस्पर्धते द्व्यापवलयस्पपयो मुत्ये मयस्य सर्वधीशवलस्यभावः शवलि
मा विच्छिवितां अंशवोनिजनीलभासाय स्य ततयोः केशवाद्धिभवति कप्रसय चलिमान मुखेव ल्पसुराहे कारस्य हरवे
एरनुययौ अनुचकार तद्धर्मा विस्पर्थः उपमालंकारः ॥२७॥ द्रुतेति॥ द्रुतसमीरणशीघ्रमारुतेन चलैर्विरिदैः क्षणं लक्षिता
सा व्यवहिता च क्षणं लक्षिताव्यवहिता क्षणिका विर्भावतिरोधानेत्यर्थः स्नाता तुलिसवत् पूर्वकाले केणादिना समासः अचिरं रोचि
र्यस्याः सा अचिररोचिर्विद्युत् द्रुतसमीरचरैर्विटपैः शाखाभिः लक्षितक्षण लक्षितव्यवहिताक्षण लक्षिताव्यवहितानवतमाल
त्रिमस्य नवतमालवत्सदृशस्य तद्वन्नीलस्येत्यर्थः । त्रिसमासः । नभस्तरुरिव तस्य नभस्तरोर्मंजरीगुच्छ इवाराजत इत्युपमाले
कारः ॥ अत्र नभस्तरोः नभस्तरोरपि व्याख्याने तरुशब्दस्य व्याघ्रादिव दृष्टार्थगोचरतास्ते तमालशब्देन विशेषयायिकेनोत
नीतसमन्यंतपोनरू त्यमिति वल्लभः तमालशब्दस्य द्रुनीलादिवन्नोल्पमात्रोपमानत्वात्तरुशब्दस्य स्वार्थप्रच तेहपि नपोनरु

मद्भादिभ्य इतिमतिज्ञाविविधानानावर्णः उपलाभणयोययोस्तयोः कुंडलयोर्द्युतिविताने केन कांतिपुंजेन संवलिता ॥ ६४

उदरश्रियाम ध्यशोभया उपलक्षितात् अंगनात् अलिभयादिव रभसा तत्सृजे आलिलिंग वस्तुतः स्तुरागादेवेति भावः स्वज
परिष्वंग इति धातोः कर्तरि लिट् लक्ष्मं नाथ मध्यस्थामध्योत्ये नार्यकामता ॥ २३॥ वदनेति॥ वदनस्य सौरभे सौगंध्ये
लोभेन परिभ्रमता भ्रमरेण हेतुना यः संभ्रमे स्तेन संभ्रतशोभया संपादितांदृक् क्रिया चलितया अलिसंभ्रमा क्षयितया अ
तरुवालके रलकपातेलोलदृशा वंचलाक्ष्या अन्यया स्त्रीतरेण केलामेखला या कलकलः कोलाहलो विदधे
विहितः अलिभयाद्पसरत्या कांची गुणस्य निरंजनीत्यर्थः एतेन चकितमुक्ते चकितभयसंभ्रमः अनुप्रासयक
रा तद्रूपां परस्तोक्षरत्रया कृतिलक्षणयोः स्थितहा सजातीययोः स संश्लिष्टः ॥ १४॥ अजगणन्निति॥ याः कुकुरस्त्रियो यादर
निरर्थः अभिमानिनीनां भावभिमानिता तयाल तलो गुणवचनस्य पुंवद्भावो वक्तव्यः नाजगणयन्न गणयंति स्म गणे
श्चौरादिकात् णौ चङि ईं चङि ईं च गण इत्यभ्यासस्य पाक्षिकमित्वं ताः कुकुरस्त्रियो मधौ वसंते सति वर्तमाने मधुश्रे
त्रे वसंते चेति विश्वः मदनव्यथया विधूरिताः विह्वलिताः सत्यः धुरि अग्रे प्रभवन्त्य वर्तत स्वयमेव पुरः प्रवृत्ता इत्यर्थः ॥ १५
कुसुमेति॥ गतभर्तृकाः वियोगिन्यः नष्टतश्चेति किं पश्य पराः काश्चिदंगनाः कुसुमकार्मुकस्य कामस्य कार्मुकसंहितैर्द्रु
तैर्जवनैः शिलीमुखैः शरैः स्वं दृष्टं विग्रहाः पाटितशरीराः सत्यो मरणमपि प्रतिपेदिरे मुहुः पुनः पुनर्मुमूर्छुरिति किमुतवा
सु भावो अर्थः शब्दार्थेन यो हस्व इति हृस्वः दीर्घोत्तरपदः च रुद्री हिंस्र अन्यथा गुणः स्यात् रुरुदिषा रोदने च्छा अनुमो च
नमित्यर्थः रुदेः सनेताद्दुप्रसये तपूते तववदना सुरुहस्त्रियोऽलंकरणाय ससंरम्याणो विह्वलतरविक्रियें तनोतीतिमा
वः गम्यमानक्रियापेक्षया च तुर्थीत दपि तथापिसप्रतिमं पौर्वसंतेसंनिहिते सन्निहिता त्सवे सति अप्रभुणाधिगमभा

सं०७०
६५

सं०६

अधिकरणे इति गमेठ प्रसये टिलोपः ननक्कि रेचक्तिरं इत्यर्थः ॥ नञ्ञोप्रकृतमर्थं गमयतः ॥३३॥ द्विरदेति ॥ द्विरददंतवलक्षस्य गजदंतधव-
लेव लक्षो धवलो ऽर्जुन इत्यमरः । भंगो मग इव भंगः मगः तस्य छविः सा स्फुरिता यस्मिन् तत् तथोक्तं । केतक्याः पुष्पं केतकं पुष्पमूलेषु च लु-
लपि सप्राणलुकि नावृद्धिः । लुकतद्धितलुकीति स्त्रीप्रत्ययस्यापि लुक् । घनपत्रौ च विपरीत्यानि विरुमेच संघोपदधानेन द्विचेत
स्त्वात् च्युतं कुशशिरं स्वस्तुस्य मागंशशिरं चुमि बालदर्पते सुत्प्रेक्षा ॥३४॥ दलितेति ॥ दलितमौक्तिकानां निष्पिष्टमुक्ताफलानां
चूर्णमिव विपांडवो ऽतिशुभ्राः स्फुरिता ये निर्झरास्तेषां शीकरास्तत्रासाः पूर्वयावत्क्वः कुरजपुष्पपरागकुराकादधिरेणुचितं यनांदधि
चूर्णानुकारं विदधिरे च क्रिरे तद् दृष्टुरित्यर्थः पुरस्तोपमाद्यानुप्रासितो यमुपमेति संकरः ३५ नवेति नवपपः करावन्नवे
दर्विदुवत्कोमलानां जातिकुसुमानां मालतीपुष्पाणां संततीषु संततसंगिभिः निरंतरासक्तैः सुमना मालती जातिरित्यमरः अत एव
प्रचलितो द्विभिः परागभूषणात् संचरन्त्यस्य वकत्येरिवसुत्प्रेक्षा । अलिभिः भ्रमाद् जौभरास्य रागपुंजात कांतः भुवरजो भरजे
परिपांडिमाधवलिमान्त्रादे दस्वी कृतः ॥३६॥ निजरजेति ॥ प्रियवियुतवधूजनस्य चेतसां कर्मणि षष्ठी अनवनीनरक्षणीकिं तु हेते
सर्थः अतएव कर्तरि लुङ् । नवनीपवनावलिः नवकदंबकाननपंक्तिः ध्वतापटोपमापटकल्पवारिमुचोमेघायाभिस्तामेघप
टाध्वताइत्यर्थः तासां दिशां निजरजः स्वपरागं पटवासं पिष्टातामिस्सुत्प्रेक्षापि स्यातः पटवासकइत्यमरः अवभिरदक्षिपतसवी
वचदितिभावः ॥३७॥ प्रणयकोपेति ॥ प्रणयकोपभृतः अतएवपराङ्मुखाविमुखापि । स्वांगाचोपसर्जनाद संयोगोपधादितिविकल्पादनीका
रः सपदि वारिधराणां मेघानां गर्जितेभ्यो भीरवो भीतास्त्रिय इति शेषः । अनेनतरं गर्भिंगताकर्णोन्नीत रमेव प्रणयिनः प्रियान्परिरब्धुमालिंग
ितुं चलितास्ते चलितरि चित्तानि व लिरिति कृतानि मध्यमान्यवलग्नानि यासां ताः सहसा नवलिरे विहते । वलते वकाराद
स्वान्नरसदेर्घवादिनादिगुणमिते वाभ्यासलोपप्रतिषेधः ॥३८॥ विगतेति ॥ पयोदेन भस्थतिमेघ मोरुतेवातिव हतितस ति । वातेतर्थ
टः शाखेदृशः विगतरागगुणोपि विरक्तोपि कोननरोजलति संबेधपिचलेऽवेसर्थः ऋवमालिमिकं गुकेसरं आशान्त तमससंनभवति
सनन्तेतस्मिन्ननन्तेसहवन्नेमभिहितेसति नवपल्लवैर्नन्तेरवन्हः कृतमिवे सुत्प्रेक्षा नसेतभावे लिङ् ॥३९॥

६५

अरमयन्निति ॥ अथानिरव्युतः विद्युतो भयात् किलभयादिगन्ततया किं तु रागादेवेतिभावः । किलेसलीकेभवनाद्रुमणरहादपयांतुवि
र्गं तु मनिद्रुवः । भयव्याजात् तथैवस्थिता इतिभावः । विद्युरित्युत्प्रसयांतो निपातः । मन्मथेनमंदरमलसंभावरतिमन्मथमंदरभाविषणः
कामपरवशा इत्यर्थः । तरुणिगणस्ते प्रकृतयद्धवएवनरैर्दूराः तेषां गणमरमयन्नरमयंतिस्म । अन्तसयेनरागनिगूहनेनाली लकालंकारः
मीलनेवस्तुनोयवचस्वत्तरनिगूहनेनमिति लक्षणात् सोप्यागंतुकेनभयेनसहजरागतिरोधानादागंतुकेनसहजतिरोधानरूप
॥४०॥ अथशरद्गुणानारभते ॥ दधतमिति ॥ रथाववयवायुधोऽस्यास्त्वायुधोहरिरंतरितातिमदीधितिं तिरोहितोस्मांशुं तथाखगकु
लायपक्षिसंपदाकुलायेषुनीडेषुनिलीयतइतिकुलायनिलायिनः । कुलायोनीडमस्त्रीयामित्यमरः तेषांभावस्तातांदधतंप्रयध्वेर
तंपक्षिसंचारंप्रतिवध्नतमित्यर्थः । नाभ्यस्ताच्छतुरितिनुम्प्रतिषेधः । निशम्यमितिकर्मणिषष्ठीः अबोधकृतमनज्ञानकारणमेघाख्य
एनसूत्र्यादिविवेकेलुप्तमित्यर्थः । जलदकालंप्रावृट्कालमपरस्याप्रकारांतरेणप्राप्तमेघोदयोपाधिनाप्रावृट्व्यवहा
रभारंतमेवकालंमेघासद्योपाधिनाप्रारत्संज्ञयोपलेपइत्यर्थः । कालोह्येकएवतस्मिन्ननेकोपाधिसंबंधान्नानात्वेनोपच
र्यतइतितद्विधः ॥४१॥ सहति ॥ अघानांनाशकंनिवर्तनेकिर्तनेयस्यसोघनाशनकीर्तनःसहरिविकच्यानितुमला
न्यवनरुर्यस्यांसाः । अघपुष्पगलत्संसमानंच्यहसनंतस्योपमासाद्दृश्यंतस्याक्षमायोग्याघनामेघायस्यास्तां अतए
वक्षितोभत्तीकगतामुत्संगगतादयितामिवस्थितामित्युत्प्रेक्षाशरदमैक्षत ॥४२॥ जगतीति ॥ अशीतकरःउष्णांशुः
करैःस्वांशुभिःजगतिलोकेनिशायांभवंनैशंनिशाप्रदोषाभ्यांचेतिविकल्पादणप्रत्ययः । तमस्तिमिरंआदद्रुवतद्रवयति
स्मनिरस्तवानित्यर्थः । दगतौ ऐभ्यउपधाहस्वेसन्भावः । सुवतिस्रुणोतिद्रवतिप्रवतिप्लवतिच्यवतीनांचेतिअ
भ्यासस्यविकल्पादित्वं । वियसाकाशेचारिदवंदमयंमेघवृंदं मयंरूपेस्यैरूपार्थमयटतंमन्त्रादिद्रुवत् । जलजशशि
पुनैर्द्वैवनैर्द्विनिमीलितंतद्वत्तमःतददिद्रुवत्तातत्पाहि । महतांमहात्मनांअरयःशत्रवःकोकदानहतापुनाकिंतु
सर्वत्रहंताभवंतीत्यर्थः । द्वितीयनिषेधेप्राप्तितस्यप्रकृतार्थस्यहननस्यतृतीयनिषेधःपुनःकेतिशंकितशद्धसा

सं०का०
६६

मर्थ्यास्त्र कृतार्थपर्यवसानं चैवधर्म्येण सामान्याद्विशेषस्य समर्थनरूपोऽर्थान्तरन्यासः॥४३॥ समयइति। समयः
कालएव शरीरिणां बलाबलं बलाबले विप्रतिषिद्धं च्यानाधिकरणवाचीतिविकल्पाद्द्वंद्वकवद्भावः। करोतीति प्रणि
गदंतः प्रतिपादयंत इवेत्युत्प्रेक्षा। नगदनदेत्सादिना णत्वं। शरदि हंसरवाः परुषीकृतस्वराः निष्ठुरीकृतनादाम
यूरायस्मिन्कर्मणि तत्परुषीकृतस्वरमयूरं यथा तथा रमणीयतामस्युः प्रापुः। अयतेर्लिटि लङ्शाकटायनस्यैवे
ति सर्जुसो देशः। उस्यपदांताद्दितिपररूपतो संहितायास्त्रलोपोग्रे। शरत्प्राप्ता हंसमयूरयोर्जितमाधुर्यमाधुर्य
विपर्ययदर्शनात्कालएव प्राणिनां बलाबलदानमिति व्यक्तमभूदित्यर्थः॥४४॥ तनुरुहाणीति। पुरोग्रे धवलपक्ष
विहंगमा हंसपक्षिणः। हंसास्तु स्पेतगरुतइत्यमरः। तेषां कूजितैर्विजितध्वनेः शिखंडिनो मयूरस्य तनोरुहाणि रु
हाणि तनुरुहाणि रुहाणि तनुरुहाणि बर्हाणि। इगुपधलक्षणः कप्रत्ययः। अक्षमया हंसकूजितेर्ष्यया व्रज
गलुः गलंतिस्म। कालप्रयुक्तस्य बर्हपतनस्याक्षमाहेतुकत्वमुत्प्रेक्ष्यत इति गुणहेतूत्प्रेक्षा। युक्तं चैतदित्याह अ
भिभवः प्रतिभवः सुदुस्सहो ऽस्य ह्यापि पराजयदुःखितस्यागसादायुज्यत इति भावः। कारणेन समर्थनरूपोऽर्था
तरंन्यासः। सच समर्थास्त्रेप्रष्यासंकीर्यते॥४५॥ अनुवनमिति। अनुवनं प्रतिवनं चटुलो राजो यस्याः सा जयाउद्गु
ध्वजयेत्यमरः। पुष्पजातिप्रभृति वाग्रस्तलिंगता सैवाधरस्तेन च्यासण रम्या वनराजिरेव नववधूस्तस्यां मुखप्रागमवः सएव मुखे
वकमिति श्लिष्टरूपकं तस्मिन्रुचिराणमीक्षणानां निभ्रमरवद्विभ्रमः शोभायस्यास्तादिके चवाणदलावलयो नील
सिंटीपत्रं पंतायः। वाला श्लिनी लक्षिदियां चेति वैजयंती अधिके रुचिरे स्फुरुभिरे। उपमारूपयोः संकरः॥४६॥
कनकेति। कनकखंडाः स्वर्णखंडा इव पिसंगानि दलानि येषां तैः सहरजसा रजसमित्यनुरादिना साकल्यार्थेऽव्ययीभावः।
समासांतनिपातः बहुव्रीहिलक्षणो जाते सरजसससरजस्का इत्यर्थः अतएव नसरजसेसरसइत्यव्ययीभावइतिवामनः
अथवा महाकविप्रयोगप्रामाण्यादव्ययीभावदर्शने प्राप्ति

सं०६
६६

पटलमिति। पथिकांगना काचित्प्रोषितभर्तृका अतएव सपदि जीवितसंशयं मरणं एष्यति निश्चितमरणेत्यर्थः। आधिच्छेद्यो
नैमितिविकल्पोनुमभावः। अतएव सनयनांबोः सबाष्पस्य सखीजनेन संभ्रमात्संक्षोभात्तद्विधुरवेपुः संभ्रमदर्शनाद्धि कलव
धुजनासती अंबुमुच्यां पटले अवपुरं अशोभंते सदेत्यसशोषमितियावत्प्रेक्षते ईक्षते लेट पाघ्राध्मेति वृद्धिः इह विरहवे
दनाक्षमायाः नायिकाया मरणसाधनमेघपटलावेक्षणवर्णनात्तद्योगलक्षणमरणावस्था कासाहित्यविधा तदुक्त्वो
गास्तच्चेसाहुः। दृङ्मनसंगसंकल्पा जागरः कृशतारतिः ह्रीत्यागोन्मादमूर्छांता इत्यनंगदशादशावस्थासंग्रहः। अत्रा
प्येकस्मादक्षरावृत्त्यात्रिपदाप्युपरतोक्षपैरेत्रयावृत्तिलक्षणयमकेन संसृष्टिर्द्रष्टव्या॥२८॥ प्रवसइति। कंदलीभूक
दलीः द्रोणपर्णी स्निग्धकंदा कंदली भूकदलपीति शाश्वतः। तस्याः पुष्पाणि कंदलानि फलेलुगित्यालुक् विदला
नां विकस्वराणां कंदलानां कंपनेनाधूननेन लालितः उपस्कृतः मनस्विनीतस्य मेनसां नमनेन नमयिता मानिनीमान
भंजनइत्यर्थः। कर्तरिलुट्। घनमारुतो मेघवायुर्यानानि नमयतिस्म प्रवसतः प्रोषितान् सुतरामुद्वेकंपयत उद्वेजितवान्म
नस्विनीमानमर्दकस्य वननमनं प्रोषितकंपनं चाहीयादिति भावः॥३०॥ जलदेति। निजया आत्मीयया स्वनसंपदा कृतः सं
मार्जनस्य मार्जनास्य संस्कारसहकृतमर्दलमृदंगस्य ध्वनेर्जयो ययासा तथोक्ता मार्जना मामर्दलानां ध्वस्यर्थपस्य मंदितानि
नपुष्करलेपने जलदपंक्तिरुन्मादमुत्कटमदं कलविलापि मधुरालापि कलापिकदंबकं मयूरवृंदं मनतयत॥३१॥ नवेति
नवकंदवरजोभिररुणितेमरुणीकृते अंबरमाकाशं येस्तैः शिलीध्राणां कंदलीकुसुमानां यः सुगंधः स एषामस्तीति शिलीध्र
सुगंधिनः तैर्गंधस्य इतेदंता तत्स्तहणादरात्सर्वदधनिसादिवत्कर्मधारयादपिन प्रत्ययः अयमेव च। कंदल्यां च शिलीध्रस्यादि
शफ्फर्णे। वनवायुभिः पुरस्थिविषये अधिपुरस्थिविमसार्थेऽव्ययीभावः रागवतां कामिनां मनसि नवनवानवप्रकाराप्रकारगुणत्वनस्येति
द्विभावः। कर्मधारयद्भावात्सुपोलुक् अनुरागिता अदधे अनुरागमुत्पादितइत्यर्थः॥३२॥ शमितेति। अंबुमुचो मेघाः प्रविरलैरंभसांप्र
थमबिंदुभिः शमिततापमर्मपोष्ममहीरजोनिरस्तं पूलिकेनतु पंकिलमिति भावः। सुगंधिकसेतूस्मात्सेकादुद्भूतसौरभं इत्यर्थः तत्के
तलांगधर्मस्थले। अचलानां गणं रैवतकागणां। अंगणे चेतराजिरइत्यमरः। सुखेनगच्छत्यस्मिन्निति सुगंसुखसंचारं इत्यर्थः। सुदुरो

सं०कृ० ६७

सं०६

तविरतसस्पाजिपत्से उपसर्जनह्रस्वः। मध्वग्रे मगसमूहेनाध्वं द्रूयतन तारुयत्सिद्धं साधनप्रयोगादिति भावः। अत्र चंद्रउप
साध्यमध्वनिवारणोक्तता लीयन्यायेन सुखार्थस्यकल्पनालकल्पना त्समादितुकारः। कारणान्तरयोगात्का
र्यसुकरत्वं समाधिरिति सूत्रे॥४९॥ कृतेति॥ अयुजोघिपमेघदावेषा तेअयुक्छदाः सप्तपर्णास्तेषांगुच्छैः सावकैः
सुगंधयः शोभनगंधाः गजमदगंधिन इति भावः। आलिभिर्भृंगैरत्तलाविलत्तागाजिरौअलिभिर्गीयमानीइ
त्यर्थःसततेगच्छतीति सततगाः सदागतयो वायवो इतिपावत् कृतमदं जनितमदं अतएवाकुलीकृतजगत्र
ये ऊर्जो कार्तिकः बाहुलोर्जौ कार्तिकिरत्समरः सएवमतंगज इति रूपकं तन्निगदतइव अयमागच्छतीत्यादिनिवेद
यतइव ववृः वातिस्म। मत्तमातंगागमने ध्यवेविधवप्युवहनसंभवादियमुत्प्रेक्षारूपकांगमस्याः॥५०॥ विगत
तेति॥ शरदीयदवोमाद्वाः पद्दशच्छेरघुशच्छेदतदपयालेष्टणादजनपदशच्छनामतश्चजे ह्यावहुला। समवादि
ति। क्वचिद्दिगतवारिधराववरणानिवर्तमेवरणाअतएवोल्लसिता कोशादुत्कृतासिर्लतेवासिता तद्वदसिताश्यामाद्द
सुपमाक्वचित्तु नीरदनीमेघवतीशुभ्राभ्रपटलच्छन्नाइत्यर्थः अतएवैरंगजाजिनेनेराववत्ताचर्मतद्वत्केचुकं कूर्पासके
यासांतादवस्थितादिसुत्प्रेक्षादिशोदद्दशुः उक्तालंकारयोः संसृष्टिः॥५१॥ विलुलितामिति॥ शरदेवांगनाशरदंगनेति
रूपकं अनिलैर्विलुलितां विक्षेपितां नवसरोरुहकेसरसंभवां धूलिंपरागं परितःसर्वतस्तस्याः सारिच्छिकीर्षयाद्धा
तेःसनंतात्स्त्रीयांप्रत्ययेरटापूहरिवधूर्विकरितुं विक्षेप्तुमिवतुमर्थेतुलाक्रियायांक्रियार्थायामिति तुमन्प्रत्ययः। मृतइ
च्छतोरितीकारः उदक्षिप्तप्रेरिता वतीरूपकाजीवितेयमुत्प्रेक्षा किरतिरयंकौर्यमाणकर्मप्रथारजः किरतिमारुतश्च
विकिरणकोन्यकर्मायथात्रेवेतिविवेकः॥५२॥ हरितेति॥ अभितामन्नमर्सीअरुणमुखंगात्रेत्यादिनाविकल्पात्

मरकतैः सुरत्नैः छदविततातहरिप्रियार्थमाकाशेवितता हरितानां हरिद्वर्णानांपत्राणां विकारो हरितपत्रमयी। टिड्ढा
णञित्यादिनाङीप्। तथा अत्र वहद्भः गृथितमनोरमाः पल्लवाः यस्यांसातात्रगिवोत्प्रेक्षा। मधुरिपोः कृष्णस्य मु
दं वितताना॥५३॥ स्मितेति॥ स्मितानि विकसितानि सरोरुहाण्यत्र वने जातायेषु तानिसरोजलानियस्यांतां तथा
तेअतिसितांमाधवलपक्षायेविहंगाहंसास्तै हंसैस्तीववविस्मयमानेवस्थिताक्षोर्यस्यांतांतथोक्तांशरेस्दृए
विशेषैर्दतुरात्पुन्नाताद्दंतानिहासात्मकाशदशनानीतियावत्दंतरुन्नतरुराजिसु केन्यप्रत्ययोमहौ
यः तानिदिङ्मुखानियस्यांशरदंतुरदिङ्मुखांशरदं सर्वतोमुदितामिवाकलयत् सर्वत्रनेत्रविकासादिलिंगैर्दृष्टा
वाम मित्यर्थः अत्रसरोजहंसशरेषु नेत्रहासदशनत्वरोपनेरूपकालंकारः तद्दृष्टात्त्रतीयमानांगमाभेदार्धवसी
याद्धरदि मुदितत्वोत्प्रेक्षेतिसंकरः॥५४॥ अपोहेमितवर्त्मनाजपतीति॥ गजपतिप्रमाणमासांताजपतिद्वय
स्यामहागजप्रमाणाः प्रमाणेद्वयसज्दघ्नञ्मात्रच इति प्रमाणार्थेद्वयसच्प्रत्ययः टिड्ढाणञित्यादिनाङीप्॥ ताअ
पिसरितस्तुहिनहिमीकुर्वन्नात्तनोतीति एवंतात्लञ् शङ्क्वादयः हेमंतोभवोहेमनः सर्वत्राणतलोपश्चेतिहेमं
तशब्दाद्धकोअण्प्रत्ययः तकारलोपश्च एवतांविंदूनां पतिर्वायुः एवतिविंदुष्वता इत्यमरः। अध्वानंगच्छं
ध्वगाः पथिकाः अताश्चेताध्वदूरया नरसर्वांतं तेषुकः। तद्योषितां प्रोषितभर्तृकाणां दशामातनुतापकरं
तां महासंतापकारिणीं सलिलसंततिं अतनुत। उदकमज्जनाद्यामासस्यर्थः हेमंतमारुतोविरहदुःसहोजनी
तिभावः॥५५॥ सर्वदावियोगिनामुद्दीपकस्यापिवायोः हेमंतेवैशिष्ट्यमाचष्टे॥ इदमिति॥ अनिलोवायुरन्यस्मि
न्कालेअनन्यद्वामीषादविशेषर्थः। सर्वेकाल्यहादिनादांप्रत्ययः वियोगिनोविप्रयुक्तान्गरतिवृत्यादिनाअलि
कर्तुः कर्मत्वंवरतनोर्वरतनुमिसर्थः अधिगर्थहादिनाकर्मणि शेषषष्ठीस्मरयतीतियत्स्मरतेराध्यानेमित्यादि

ती

सं०क०
६८

इदं स्मारकं त्वमपि मत्स्वं तन्मयुक्तमेव सहकारिविरहादिति भावः। अहो सततं किंचित्करत्वाद्विस्मयः। हेमन्ते तु हेमन्त
मध्यस्य संभवादित्याह। स तुहिनस्तु तुहिनसहितस्तस्य यो वनाद्यो वनयुक्ताः। अत एव सो श्रमणः सोष्णोऽपयोधराः
कुम्भाः तेस्मता येस्मात् स स्तानयौवनसोष्मपयोधरान् वियोगिनो विमुक्तान्। तन्मायुक्तं वा लौसितमपि कर्मत्वं किं हिन
स्तु विहेतुवा संभावनायां लोट्। हेमन्तस त्वकारात् कुन्नो धीमकसाध्यदुःखोत्पादनसमर्थ्यान्ति योगिमारकत्वमपि सेना
ञ ध्येत नीपवादेतु तादृक् सहकारिविरहात् स्मारकत्वमपि न युक्तमित्यर्थः। अमारके मारकसंबन्धेऽतिशयोक्तिः। भेदः २
रहस्य कविप्रौढोक्तिः सिद्धयोरभेदाध्यवसाय इति रहस्यं॥५६॥ प्रियतमेति॥ अत्र अञ्चपर्याये न सहसा अत्र हृत्
धाविभागः। अन्यत्र सहसे से सेकं पदं सर ष्णासरो घयायां स्त्रियाकर्त्रा प्रियतमेन सह हनस्थितं नपुंसके भावे क्तः साम
गना स्त्री सहसा मार्गशीर्षमासेन मार्गशीर्ष सहा मार्गः इत्यमरः कृतवेपथुः जनितकम्पा सती विरोधं जिहापुत्र प्रत्ययः
तं पूर्वमगणितमेव प्रियं हसेन सह वर्तत इति स हसा सहास्या सती। अथो हसो हास्यं च इत्यमरः॥ स्व हेमन्ते विधि वि
कल्पाद प्रत्ययः सहसा श्री पूर्व स्वरादिपाटाद व्ययं परिरभ्याश्लिष्टा स्पर्शं स्पर्शमपीत्यर्थः। अन्यथा वेरं स्यात् अत
एव सामर्थ्याधिलभ्यार्थत्वाद् पेतप्रयोगः। अन्यथापि तु नाप्त मतांगना शिथिलीकर्तुं नोत्सहते स्मेत्यर्थः। मानिनीमा
नभंजनक्षमोऽयं मास इति भावः। कलहान्तरिते यं धीरा नायिका कोपात् कान्तं पराणुद्य पश्चात्तापसमन्विते तिल
क्षणात्॥५७॥ स्पष्टमिति॥ अनावरणम् आवरणरहिता या अधरपल्लवस्य द्युतिर्वर्णो हिममारुतैः स्पष्टा मदूयत अत्र
तद्यता दूको द्वेवादिकात् कर्तरि लट्। साद्युतिः यतदो नित्यसंबन्धः सीत्कृतैः सीत्कारैः कर्तृभिः सितनमुखेन दशनर
स्मय एव परस्तेन निवसिते वा शुद्धादिते वेत्सु त्रेक्षा वसेरायाद्नार्चा त्कर्मणि क्तः स्पष्टागमः सुनिर्ववौ सुहुनि वेवां
शीता लुराश्नात इति भावः। हिमहता परवर्णान्वीणस्

सं०क० ६८

६८

मिति पक्षाश्रयणाच्च हुश्री हर्षोपि साप्युरेवं तस्या च सरजे स सरजसापाये अरणे केसरास्तैः चारुभिः प्रियैर्विधूनिता अवमानि
ता मानवशा मानिन्यस्तासां यारुषा रोषास्तासां निरसने निरासकैः अस्यतेः कर्तरि ल्युट् असनैः प्रियकरप्रसूनैः सर्जकास
नबंधूकपुष्पप्रियकजीवक इत्यमरः अत्र व्यर्थता मानिनीमाननिरासहादस्यं तीव्यसन्नानीति स्वार्थनामकलं दधेद
प्रेदध्ना ते कमलिलिट्॥४७॥ मुखेति॥ धृतो नवानपायेन ततत्पतनवो तपवाला तप ताम्रमित्यर्थः। अंभसि कमले अं
भस्येकमलं अंभोरुहं तस्य लकमलं निव सर्वं अम्लानताद्योतिनोर्थं च्याय तो मदपादलोचकोरदृशां स्त्रीणां मुखसरो
जेरुहं चं मुखारविन्दशोभामनुचकार। अनुपराभ्यां कृञ इति परस्मैपदनियमः। अत्र तानुकरणाद्धेतोः केपुमांस उत्सुकतां प्र
यस्मां मुखावलोकनकौतुकितानालभयत नालभयत। स कोच्या लभयेत त्व तत्स्मारत्कहादित्यर्थः। एतेनोत्सुकेयने वस्तुना
कार्येण कारणमप्रस्तुतकमलदर्शनोत्था मुखस्मृतिर्व्यज्यता इति वस्तुनालंकारध्वनिः। एतेन स्वयं स्त्रीमुखसदृशतयाकु
मलस्याधारेंभसि पुंस उत्सुकतामलंभेयदिति रंगराजीयव्याख्याने काकस्य कार्ष्ण्यं धवलः प्रसाद इतिवदसंगतमिति य
मेतव्या। अत्र लभेयदिति लभेर्णिजन्ताल्लट्। लभेश्चेति नुमागमः। लभेत्का त्वप्राप्य सजेनवत्गमर्थहानिरिति बुद्धीसादि
नाश्रुणि केतु कर्म तद्विकर्मतागमुपसर्जनकप्राप्यार्थहेतुवैपरीत्यामिमसुकेसितसितिम्नेसत्रा॥४८॥ विरहेति॥ इषे अ
श्वयुजमासो स्यादाश्विन इषोप्याश्वयुज इत्यमरः। कमलगोपशालिगोपस्त्री सा चासौ वधूश्च कमलगोपवधूः। स्त्रियाः
पुंवदित्यादिना पुंवद्भावः। श्रुत आकर्णितस्तया वध्वा ईरितस्यालापितस्य कोमलगीतस्य ध्वनिर्येन तेन हेतुना तदीरितको
मलगीतेक ध्वनिं श्रुतवतागतेणेन निर्निमिषविस्मयानंदाभ्यां इत्यनिमिषे। इगुपधलक्षणः कप्रत्ययः। तच्छ्रवणेयय
स्यतमनिशमेव क्षणे प्रसंगतुरंगाजितघ्नसाधनेरवादेशे हासनैतादप्रसयादिति स्त्रियामुप्रत्ययः सा विरता यस्य

सं०क० ६६

णा विश्व व झावे विन्मतेता लेकू मद विका शिमि र्म दे ने विजृंभमाणै रलि नीरै वसंगी सकोसराहितकुंहतिः कुंकारा माधु
र्यो द्दीपकत्वातिशय द्योतनार्थमलिनीति स्त्रि लिंग निर्देशः शास्त्रिरा लिमः प्रिया न विपुवतीः कोपाद्धियं जानायो तेः
शत रिधा तो रुव ऽा दे ग्राः ऽगित ऋत्तिरुपि पुवती वधूः युन क्ति रितित प्रत्ययः निरमर्त्यतु स्रत जयत तद्भिः भस्यो
स्रौरादि कयोरनुदात्तत्वादात्मनेपदे स्राच वाया वत्येत नेत्येत नधर्मो नी चा होन मुत्प्रेक्षते सा चालिनी कुंकार हुं
कारो जीवितेति रूपकसंकीर्णा व्यंजकात प्रयोग कुम्पार्थः॥६८॥ उपचितेति॥ कालवश हलवानेपि परे घु प
चितेषु तेषु प्रवृद्धेषु सत्स्वसमर्थतां दौर्बल्यं व्रजन्ति हीयमाने तपसि माघमासे तपा माघ इ समरः मदगमस्तिरव
हुरस्मिर भीषुमानं सुमान् भीषु प्रग्रहे रस्मा विसमरः महत उपचितस्य हिमस्य हानिनाशं करोतीति यम हानिम
हानिकरोरा विस्तद्धेतु र्लोभ यत तृजो हि सिसादिना हेत्वर्थे ट प्रत्ययः विरूद्धगुणसमान्येन न समर्थं न रूपो चीत
रन्यासः॥६८॥ अभीति॥ स्तुभितः उद्भूतायः सैन्य परागः सेन रजः स इव विपांडुर द्युतिः शुभ्रवर्णः स्रत एव कयोलो घ्र
रजसोमुख नान्यभिषिषेणयिषु स्र भिषिषेणयितुं सेनया भियातुमिच्छुः यस्से नयाभिगमनम रोतद् भिषेणनमि
समरः सस्रावश्या दिना सनाद्यन्ता ति चि सना शंसा भिक्षुः उरिस प्रयः स्यादि व्यभ्यासेन व्याप्यासि स्यति धाहभ्या
ससकारयोः व वं स्मर मा स्व्ये त वा रव्यात वानि वसुत्प्रेक्षा प्रयुक्तिः रव्या जप्रस्यति के कि रव्यात मिया क्विति स्रे रस
दृशः स्रयं लोप्र रेज स्रयादृशस्ति रयन्ति रस्कुर्वन्तिरस्काद्वात्करोति निरपतांल्लट शत्रा दे शः एग विष्व झावे
टिलोपः उदभूत॥६९॥ शिशिरेति॥ शिशिरकालमपास्यावहायप्रीते हरतीति शीतहरस्य हरते रनुम कोदिसके स्रम
प्रत्ययोनो स्मा कमस्य कुलोपाणः कुलोफलत स्यकर वगुरणं किफलं संपाद्य तदरति शेष गयमा गक्रिया पेक्षया त्का निर्देशः उवशे

६९

वाच्यालंकार इति प्रियायत्तो स्मिनु शिशिरकाले सर्व विभक्तिकस्तसिः प्रियाः कौताः स्रस्ता रुषा निरस्त रोषाः संरोनमतः प्रस
मतानन्नमतान् स्वप्रियान् घने निविडं परिरेमिरे आलिलिङ्गुः वक्षः प्रति धीयते सुरवार्थस्य परिरंभस्य कुलो पाद्य साफल्या
र्थमुत्प्रेक्षते व्यंजकात प्रयोग कुम्पवं गाद्ध्यः॥ अधीति॥ लवंगे कौपिल वंगेभि मत्सर्ये व्ययीभावस्तु मनसां पुष्पाणां दलेषु त
ले ति प्रति तिष्ठते इति सुमनो दल तालिनः॥ तान्पूतोल्यम् भीक्ष्णोपवासिनिः॥ अभीक्ष्णिनो मधुपाः रजसा परागेणान्तिवन् प
च स्रपि के मनिलितामलीमसीः पापिन स्रकृतामनिलिता इति हेतोः पुरोषे सपदि कुंदलता माघवल्ली माघ्यं कुंदमिसम
थैरः दलता कि कि सतायस वे न विजे कुसुमे नाहसत जहास स्फुटमिसुत्प्रेक्षायां रजस्वलाङ्गतार्कामिन सेवते स्याहसं
तीति भावः कुंद कुसुमस्य धाव ल्यादुत्प्रेक्षेनोत्प्रेक्षा॥६६॥ स्रयथमप विक्रोशमपलकोत्क्रुष्टि॥ तयाकवि पूर्न द्वादप्रोमि
स्त्रो के केतुन्वर्लयत्तो विस्मतुमिर्वसंतं वर्णयति॥ अतिसुरभिरिति॥ अतिसुरभि रसेत सुगंधिः संतानकः कल्पवृक्षः पुष्प
श्रियां संपदां मत न्नुत रयामह तरत्वेन स्रत न्नुशब्दा तरणवेधात्तलप्रत्ययः स्रमाजीवा स्रेमं जीवे तुत्प्रेक्षा तथान म र सर्थः
भंजेर्थण्यावि णि त्ति विभाषा सलोपो उपधाचद्धिः विधो लेकः किंच वसंतस्यानकोचसंतानकोवसंतागम दुंदुमिरितिरू
पकतरुणं भैं परन्न तस्तरुणकोकिकौ लोरागिणां कामिनां रतेयरागवर्द्धनाय स्वनमत नुतमधुरं स्वकूजैरसर्थः॥
प्रभावतं॥ वसुयुग विरतिर्नन्नोरो प्रभेति लक्षणात्॥६७॥ नेति॥ अरमसंतमिद्धे च्छिसितेषु मधुपुमकरदेषु वासवसती र
सो रागोयस्यासा इत्थं मधुवासरसा मधुपानप्रियेत्यर्थः स्रत एवालिनी मालिः भं गस्त्रेणि युवति मानि निरासे दृष्टं कुशलं प
उद्दीपकत्वादिति भावः मधुवासरेषु वसंतदिनेषु सारं श्रेष्ठं मधुवासरसारं तत्काल क्रियाव्यमिसर्थः॥ न तं सहकारं स्राति
सि रागादति लोल्याटु क्लिंत्तं तुरं तु नोक्षमिषनाहिस्वभावादिका ल्लङ् स्यागतां वतमु तेः॥६८॥ जगदिति॥ प्रभावयः

तीतिप्रभावती संपादयित्री कर्त्तरि ल्युट् ङीप्॥ पृथ्वीः कर्त्री॥ जगद्धारिणी कर्तुं प्रभौ समर्थे अस्य स्मरस्य अनीके सैन्ये
जयंती जितवरीः केतनं वैजयंती ध्वजापताका स्तनैव विस्तृताः तनोतेः प्राप्ताकाले चटेरे हंएतविकारस्य द्रुमस्
पि अस्त्राटक्केतिवृद्धिः। इति मनीषयेति शेषः। इमाः कदलीः रंभातरुस्तेन विततस्तारविततस्तार कदलीवारणबुसा
रंभामोच्चाशुमत्फलेस्मरः। कदलीपुकाममैवजेयती होमेस्मा। वृत्तमुपजातिः॥६९॥ स्मरेति॥ असती दुष्टा स्मा
रणकमेन निमित्तेन यो रागो रमणेच्छा स एव न्मयी तमिस्रा तमसो मः। तमिस्रेति तिमिररोगे तमिस्रा तु
तमस्ततौ॥ कृष्णपक्षनिशायां ज्योतिविस्तः। रवेर्वपुर्मंडले स्वपरितस्तार आव व्रोऽत्र ह निरजो प्रियं जनयामासस्
र्पः। परिपूर्वात्स्तृणाते लिट्। आवश्यस सर्पिसर्पः कुतः परितः समेता तारस्वेउ आतरध्वेनो कोकिके रसतिकूजिते
सतीसु द्वीपके तिः स्त्री। प्रियइत्यर्थः जातावेकवचनं दिवापि दिवसेपि सप्तसर्पस्यं वंशंगतो वश्यः वशंगतः
तियत्प्रत्ययः। न वश्यमवश्यं अवशामगतमर्थीसर्पः प्रियमाप स्वयमेवाभिसार्याभिसारिरिपर्थः यदगणयंत मपिप्रियं
वापि मप्रमवगणय्यनि वेपं ज्योत्स्नेस्य समगच्छत तत्स रागः तिमिराहितभानुमेउला भामिन्यइतिरूपकानुप्रा
णितेयमासिक क्रियानिमित्तापरिस्तारणक्रियास्वरूपोत्प्रेक्षा अवश्यमिति व्यंजकप्रयोगा द्वाच्या प्रोपच्छंदसि
केवृत्तं॥७०॥ अथैवेन ग्रीष्ममाह॥ वपुरिति॥ शुचिना ग्रीष्मेण पयोजकेकर्त्रा अंबु विहारेण जलक्रीडया हिमंशी
मशीतलं अतएव रुचिरमुज्ज्वलं वपुर्देहं गमिता प्रापिता। गतिबुद्धीत्यादिना प्राणिकर्त्तुः रमण्याः कर्तृत्वं प्रधानक
र्मण्याख्येयेलादीनां दुहिकर्मणामिति विहितत्वेच्यास्त्र तएव कमनीयतरा रमणीयतरा अत्र चिरं अभ्युल्लेते वा चि
राम्फुलता चिप्युल्लनातास्यारुचिरिवरुचिर्यस्याः सात्र चिराम्फुलतारुचिरि सुपमा कुये। तथा रागमनुरा
गमितां प्राप्ता। इणः कर्त्तरि क्तः रमणी रमणेन प्रियेन अंके मृतसंगमनीयतानीता विज्ञ्यामृ माघ वगृह्णामिति

व्रणैति॥ मद्भुतयामार्दवे नेहतु नाहिममारुतैर्द्भुतयापीडितया पुयुपरासइतिघातोसंपादितात्कर्मणि क्तः। व्रणमतान्व्य
एवसा सुतनोः स्त्रियो अधरोलेखेव तया अधरलेखया कर्त्र्या कलसीत्कृतैः हेतुनास्फुरितापकशायेदंतमरीचय
स्तन्मयेत कूपेस्फुटं भावरणामाच्छादनेदपेइवधृते इवसुतेक्ष्मादधतेकर्मणि लिट्॥५९॥ धृतेति॥ धृता स्तुषा
रकणास्तुहिनसीकरा येन तत्स्वनभस्वतः पवनस्य संवर्धिनसारुलता एवांगुलयस्ताभिस्तर्जनानि यानि तान्येव
वविभ्रमाः विलासाः पृथुविशालमभिलस्य दचितस्यभुजांतरं मुजमध्यं वक्षस्थलं निरंतरमनितया अत्र प्राप्तुयागाढा
लिंगनमलभमानये रार्थः। इणः कर्त्तरि क्तः वनितयास्त्रिया नचिबोहिरे नसोढाः विरहिणः पत्सार्जि ताइव नभस्यतावि
मृतीतिभावः॥६०॥ हेमेति॥ स्मरमयं स्मरदत्तं स्मरप्रयुक्तमित्यर्थः। ततः आगतइतिमयट्। अकृत्रिममनुरागं सह
जं प्रेमप्रकटयतिप्रकटीकुर्वाणैः तत्कार्येण स्वेदनेतिभावः। अतएव सुतरामुपकारिणी। दुःसाधीरं साजिननातेभ्यः स्या
नुरागप्रकाशनात्याः तापकर्त्तरिइत्यर्थः एवंभूते हिमकर्ते हेमंतेपिस्वेदसंभावनो रहितकालेपीत्यर्थः रसवत्सां
तिम्रकृतिभावः प्रशंसितं तिरा ज्ञापयतेति प्रशंसितिइति सारिकोक्तिः॥६१॥ हेमंतोपरिणामिस्वेद हेतुरेवतद्धेतुरा
गहेतुत्वादितिभावः। तास्तदभीरायुवतयोविलासिनः प्रियानरमयंतिस्म। हेमंतस्याद्दीपकत्वाद्रुत्तिपीडारम्यमवा
र्दीर्घरात्रित्वात् आभयेपुरात्सदर्शरमंतेत्यर्थः॥६२॥ अथ शिशिरं वर्णयति॥ कुसुमयन्निति॥ षपवनं वनरूपः
विमतत्पर्वेऽव्ययीभावः। तृतीयासप्तम्योर्बहुलमिति विकल्पादमावाभावः। फलिनीः प्रियंगुलताः प्रियंगुः फलिनी
फलीसमः। कुसुमयन् कुसुमवतीः कुर्वन् हिलु द्वीपनसामग्रीवर्णाना। कुसुमतेर्णवंतप्रकृतिकात्तत्करोतिएय

स॰ कं॰ ७१

त्सानेदासतीत्यकाशनिललासे हर्षः। अत्र च समुच्चकाश इति योजितः प्रियप्राप्तिनिमित्ते हर्षाख्यभावसंबंधानात्प्रेया
लंकारः। रसभावतदाभासतत्प्रशमानां निबंधनं रसवत्प्रेय ऊर्जस्विसमाहितानीति लक्षणात्॥ वृत्तमुपजातिः॥७४॥ स्त
नयोरिति॥ रसमानाः कूजनशीलाः। ताधिरुत्यनयोवचनशक्तिषु च्यानाशीति ताच्छील्ये चानश्। अत्र प्रत्ययः रसतेः परस्मै
पदत्वाच्छानूच प्रत्ययः। ते सारसाः पक्षिविशेषा यस्मिन् तेन रसमानसारसेन। समयेन। शरत्कालेनेत्यर्थः। सारसा
२५ नां तत्रैव संभूतेः। सारसे मैथुनी कामिमोनर्दे पुष्कराह्वय इति यादवः। अंगनानां स्तनयोर्यजलानां ततिः। शारदोष्म
जन्मना स्वेदोदबिंदुसंदोहः। अमितोऽनल्पाऽव्ध्वाणे नहतेरभिपूर्वात्कर्मणि क्तः। न हो ओ इति धत्वं। हारसमामुक्ताहा
रतुल्यां कुचमंडलायमानेति भावः। सा जलततिः रसेन रागेण हेतुना बलीयसेति भावः। परिरंभरुचिमालिंगनेच्छां
नाभिनत्। न विवेद। शारदस्वेदस्याप्यलंकारतया दीपकस्य ऊर्जस्विता ह्लादिनः सपत्नीः शृंगारोपि जायत इत्यर्थः। अत
एव रसनिबंधनाद्रसवदलंकारः। लक्षणमुक्तं पूर्वश्लोके। अत्र पच्छंदसिके वृत्तं॥७५॥ ज्ञातेति॥ व्यास्योग्रनुवनां ते
वनां तेविभक्त्यर्थेऽव्ययीभावः। मधुरेण कंठेन सारसिकाः कुरुते न सारस्य एव सारसिकाः सारसांगनाः। का सर्व
स्पते। तासां का कुरुते न विकृतशब्देन। का कुंस्त्रियां विकारा यशोक भी हादिभिर्ध्वनैरिति समरः। का कुत्सितं दते तेन।
कोमकेमकेत्वसिंहोदवदत इति वक्रेण प्रयोगः। कांतप्रिये ज्ञातप्रीतिर्जातहर्षा रसिका रसवती रागवतीत्यर्थः। अ
त इति हृनाविति टन प्रत्ययः। सा काचस्त्री या एकांते रहसि तस्य कांतस्य संपर्कमालिंगनं प्राप्य पुरा पुरुषप्रेरणात्पूर्वमे
व कामोहनलीला सुरतेक्रीडां न कुरुते सर्वापि सुरतविशेषान् कामतंत्रप्रसिद्धान् विस्रब्धं चकारेति शृंगार
स्य परकाष्ठाप्राप्तिरुक्ता मत्तमयूरवृत्तमुक्तं॥७६॥ अथ चैकेन हेमंतमाह॥ कांतेति॥ सहत इति सहः पचाद्यच्। स

स॰ कं॰

७१

रसहः कामोद्दीपक इत्यर्थः। तेनासवेन तोषितः तेन स्मरसहासवतोषितेन। अत एव रसहासवसमेता रसहासोऽस्य
स्तः इति रसहासवता रागहास्यवता। अत एव प्रेम्णा मनस्सु पुंसां चित्तेषु उषितेन वसता। वसेः कर्तरि क्तः। वस
ति क्षुधोरिडितीडागमः। कांतेव जनस्तेन कांताजनेन जातावेकवचनं रहसि प्रसभं बलाद्गृहीताः केशा अत्राकृष्ट
शिरोरुहे रते हेमंते भयाहेमन्यः तासु हेमनीष्वपि द्राघीयसीष्वपीति भावः। सर्वत्र एव तल्लोपश्चेति हेमंतश
घादणप्रत्ययः तल्लोपश्च ङीप्। रजनीषु के युवानः शेरते स्म स्वपंति स्म न केपीत्यर्थः। लट् स्मे इति भूतार्थे लट्
एतेनातिभूमिगतः शृंगारो व्यज्यते॥७७॥ अथ चैकेन शिशिरं वर्णयति॥ गतवतामिति॥ असकलाममलपल्ल
वलीलया। असकलाम् असमग्रविकाशिनाममलानिर्मलानामब्जानामिव पल्लवानां सेवा लीलया त्यजितियेत्यर्थः। प्रियस्यितानामिमु
खक्षा। मधुकृतां मधुकराणां संबंधिनी बहुलवल्लीषु शिशिरबहुलताविशेषबहुलया लयनस्थितिर्यस्याः सा लवलीलया
अवलीः पंक्तिः। रसकलो रसेन मध्वास्वादेन कलोऽव्यक्तमधुरो। ध्वनौ तु मधुरास्फुटे कल इत्यमरः। गिरां वाण्या अ
स्फुटश्च कलः। अलपत्। आगायत्। मधुपहेतुकस्य मधुरालापस्य पल्लववल्लीलाजनितविस्मयहेतुकत्वं॥७८॥ कुर्व
न्तामिति॥ इतीयं पुष्पैरेवातिभरेण तत्कृतमारगौरवेण नगान् नवपक्षाणि अवनंस्यतीति अवानाम्रान् कुर्वंतं
अलिनां गानवाचां णीत ध्वनेः कैकीरस्य विरामयन् कुर्वंतं समस्तमृतुं सर्वान् ऋतून् अनुसानुसानुपुषिप्रती
ति विभ्राणः इत्थं गिरा रैवतकाद्रौ विहर्तुं श्रीमान्सुहरिर्मयूरगिरा केकया अनोदि प्रेरितः भगवन्निह विहर
णाद्वृतुगणमनुगृहाणेति प्रार्थितवानिवेत्युत्प्रेक्षा॥७९॥ ०॥ इति श्रीपदवाक्यप्रमाणपारावारीण
श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां माघव्याख्यायां सर्वंकषाख्यायां षष्ठः सर्गः॥६॥

ऋतूनामृतुगणप्रादुर्भावमभिधाय तत्फलतया भगवतः सानुचरस्य विहारलीलावर्णनमारभते ॥ अनुगिरिरिति ॥ अथ
ऋतुप्रादुर्भावानंतरं सहरिर्गिरावनुगिरं विभक्त्यर्थेऽव्ययीभावः ऋतुभिर्वितायमानां वितसमानां तनोतेर्लटः शानजादे-
शः तनोतेर्यकीति वैभाषिक आकारादेशः वनांतलक्ष्मीं विलोकयितुं निर्गमत् निर्गतः ऋतुगणभक्तिं कर्तुमिति भावः
तथा हि अभिराद्धुमाराधयितुं आदृतानामादरं कुर्वतां नामास्थावतामित्यर्थः कर्तरि क्तः प्रयासः सेवायां स्वमहत्त्ववि-
षये निःफलो न भवति न हि महांतो नुकंपिनो महांतस्तत्सेवां व्यर्थयतीत्यर्थः अत्रोत्तरस्य तु गणानुग्रहार्थो निर्गमो-
युक्त इति सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः पुष्पिताग्रावृत्तं ॥१॥ दधतीति ॥ यदवो यादवाः व्याख्याते
ध्येतत्वृक्षाः बहुविधा इत्यर्थः बह्वादिभ्यश्चेति विकल्पादीकारः सुमनसः पुष्पाणि स्त्रियः सुमनसः पुष्पमित्यमरः
दधति दधंतीति वा नपुंसकस्य सम्यस्ताश्च तुर्वैकल्पिको नुम्प्रतिषेधः वनानि युवतिभिर्युताः स्त्रीसमेताः एव प्रयातुमी-
षुरिष्टवन्तः इच्छतीति स्म अत्र हेतुमाह युवतिषु विना ऽभावे अमी यदवो मनसि शेते इति मनसिशयः कामः तस्य महास्त्रभूतं कुसुम
पंचकमपि पंचापि कुसुमानीत्यर्थः पंचानां संघः पंचकं संख्यायाः संज्ञासंघसूत्राध्ययनेष्विति कं प्रत्ययः बिसो-
ढुं नालेन सक्ताः सकलसुमनसः समग्रेऽत्र आरविंदादिपंचकस्य संभवप्रमाणमसिद्धसादिति भावः अत्र तायुवति-
भिः सह प्रयाणं युक्तमिति अरविंदमशोकं च चूतं च नवमल्लिका नीलोत्पलं च पंचैते पंचबाणस्य सायकाः ॥
२॥ अवसरमिति ॥ तमवसरं सहजिगमिषाकालमधिगम्य हृदयेहरं सौहृदयंगमा भवंत्यः सर्वे हि प्राप्यमानमेव प्रि-
यं भवतीति भावः यत्नेन कृतेन भवती इयं यत्नकृते तथापि उज्वलस्वरूपया सौता स्वभावेन सुंदर इत्यर्थः अग-
नास्तदानीं तस्मिन्नवसरे अवनिषु पदं न्यदधत् निहितवंतः पादचारमौवप्रचेलुरित्यर्थः दधातेर्लङ्यात्मने-

अथ द्वाभ्यां वर्षर्तुं वर्णयति ॥ मुदितेत्यादि ॥ अद्रुमुचां मेघप्रवानां अपां लाभे वर्षे सतीत्यर्थः ॥ सहसा मयूररुतमुदमा-
यतालभंता अवपयगतालक्ष्मिरुजादीनामित्याडागमेवृद्धिः नदीपपाठनद्यः अवहन् इत्यर्थः अटपटगतोलिट्यि-
जातावेकवचनो अलिर्गोअलिनामं गेनसहसायमेव सायंतनः सायंचिरमित्यादिना ट्युप्रत्ययः स्तुडागमश्च
सस्यासौदीपश्च तद्वत्साटला प्रभाइत्युपमालंकारः तस्मिन्नश्रिलींध्रे कदलीकुसुमेऽरमत अभ्रमयूरमोदप्रा-
स्त्यानेककर्तृकक्रियायोगपद्यात् भिन्नाधिकरणक्रियासमुच्चयरूपः समुच्चयालंकारभेदः ॥ गुणक्रियायौ-
गपद्यं समुच्चय इति सामान्यलक्षणं ॥ औपछंदसिकं वृत्तं ॥७८॥ कुटजानीति ॥ शिखरीन्द्रस्य रैवतकाद्रेः स-
मीपे अभितः परितः समये त्यादिना द्वितीया अवनौप्रदेशे घनमदा भ्रमरा येषु तानि घनमदभ्रमराणि कुटजानि
कुटजकुसुमानि वनौघेन पयःपूरेण नमंदसम्भाणि मेघा यस्मिन् तद्वनौ घनमदभ्रे पयःकीलालममृतं जीव-
नेभुवनं वनं इत्यमरः गगने वीक्ष्य शिखिभिर्मयूरैर्गीतं निनदस्य गानध्वनेः समया तुल्यया तुल्यार्थैः इत्यादिना वै-
कल्पिकी षष्ठी ॥ गिरावनसा केकया इत्यर्थः उभे अरणि रणितेरणशब्द भावे ल्युट् ट्रियिणालुकं स्वमगलीवृत्तं ॥७९॥
अथ त्रिभिः श्लोकैः शरदं वर्णयति ॥ अभीष्टमित्यादि ॥ कामयते इति कमनी कामयित्री ॥ काम्रकामयिताभीकः कामन-
नः कामनो भीक इत्यमरः रमेकतेरिल्युरव्यापयोविंत जातावेकवचनो अनीभ्याउन्नताकाशा अभ्र्वालायस्मिन्
तस्मिन्नभ्रनीलकाशे काले शरदीत्यर्थः मनोजन्मसुखोदयेषु कामसुखविभावेषु धृताः आशा अभिलाषो येन तथो-
क्तोऽश्राममभीष्टं चिरायचिरकालेन ॥ चिरायचिररात्रायचिरस्याद्याश्चिरार्थकाइत्यव्ययेष्विसमरः सम्यगुद्धतासुत्स-
द्याशंकः संकोचो यस्मिन्कर्मणि तत् समुद्धताशंकाविस्रब्धं यथा तथा प्राप्य मुदा सहवर्तते इति समु-

र०प० ७३

ननु प्रतिज्ञापि दुस्साध्येति विप्रतिषेधमाशंक्याह ॥ नेति ॥ हे सुतनु हे सुभ्रांगी दीर्घा तातरपदात्सेवृद्धिरन्यथा गुणस्या स०८
त् अहं न वेद्मीति न किंतु वेद्म्येवेत्यर्थः किं वेत्सीत्यत आह ॥ महीयान् महत्तरस्तव निश्चयः तदनैक्यप्रतिज्ञापरेण
जनांतरेण सुनिरसः सुखमोच्यः अस्य ते खल्पप्रयत्नसाध्ये न भवती ससुनिरसः इति यत्तदिति अर्थलभ्यं तु पदद्वयं न वि
धेयाक्षेपात् तत्र दृढदुस्पृष्टउत्तरवाक्यस्य वाच्यपूर्ववाक्ये तत् दृढयोग इति निषेधः तथापि विदित तथापि असौ मत
सखी जातु कदापि मद्वचो न वितथयति नानृतीकरोतीति स्वसखीषु मध्ये मेऽभिमानः स्वप्रज्ञाभंगेऽपि मत्प्रज्ञा
मेव पालयसी सहकारा तत् निःशंकं प्रतीहि इत्यर्थः ॥८॥ सततमिति ॥ भवती त्वामनानयाया आनयितुमशक्नुवंसैस
र्थः मया सततं सदा तेतव कर्मणि दृष्टी अनभिभाषणमसंभाषणं च परिपालितं निश्चितं भातीति भवती भाते इवतु उदि
तत्रेति ङीप् तस्यां सेवृद्धिः भवति हे सुभगे त्वयि त्ते दिति तदसंभाषणमस्तीति विरोधनिश्चितायां निश्चितविरोधा
यो सत्यां अग्न्यादित्वात्परनिपातः अस्तु हृज्जनो विपक्षवर्गः सकामः फलितमनोरथः भवतु भवेत् प्राप्तकाले लोट
अस्माद्विरोधकांक्षितममयमानंदकालप्राप्त इत्यर्थः ॥९॥ न केवलमावयोर्विरोधः प्राणैरपि निरपि ममस्यादिर
सा ॥ गतेति ॥ गतिर्धृतिरधीरोऽहंभवसाः तवानालपनादसंभाषणात् अलपविलायेत्यर्थः प्रस्थायपंचमीत्र
स्तन प्राणा नावलंबितुं धारयितुमनलमसमर्थाः अलेभ्रक्षणपर्याप्तिशक्तिवारणवाचकोऽपि समरः चतेति खेदे अ
तएव हे मानिनि प्रणयिनि प्रिये प्रसादबुद्धिरनुग्रहबुद्धिर्न यदि नास्ति च्चेत् तथापि मम मंजीरविते दयालुर्भवस्व
हीत्यादिना लुप्रत्ययः सप्रूतापि मत्प्राणार्थमनुग्राह्य इत्यर्थः ॥१०॥ प्रियमिति ॥ रतीत्यं नितांतमागसोऽन्या
संगापराधस्य स्मरेण सरोषेऽतएव कषाये लोहितीकृते आयते चाक्षिणी यस्याः सा तथोक्ता नियासेच

७३

कषायोऽथ सौरभे लोहिते न्यवद्धितिविश्वः वनिता नायिका चरणगतायाः पूर्वोक्तयाक्यंतप्रणतायाः सख्या वच्चसो
नुरोधादनुस्मरणात् किल किलेत्यपरमार्थे वस्तुतस्तु रागादेवेति भावः प्रियं कथमपि कथंचिदनुकूलयांचका
र अभिमुखी चकार अनुजग्राहेत्यर्थः ॥११॥ अथ काचित्सखी केचिदग्रे शीघ्रमागमने युग्मनाह ॥ द्रुतेति ॥ हेत्व
यस्य हे सखेऽहं इतीत्थं द्रुतपदं शीघ्रपदक्रमं यथा तथा मा यासीर्मागमः यातेर्लुङि माङ्योगादट्प्रतिषेधः नन्वयोतीम
नुगच्छतीत्यस्तु तन्नु सुभ्रांगी प्रियामनुपालय प्रतीक्षस्व अपि अस्याव पि शीघ्रमायातु तत्राह न हीति तव चेतोच्यत
दीयस्तनजघनस्योद्वहने विदितमनुभूतं खेदं नेति न किंतु वेत्स्येवेत्यर्थः अतः कथं शीघ्रमायास्यतीति भावः सं
भाव्यनिषेधनिवर्तने द्वे प्रतिषेधाविति वामनः ॥१२॥ इत्तीति ॥ सखीजने इति वदति सति अपरः कश्चिद्दयितत
मा अनुरागात् स्नेहात् चिरं प्रातिष्ठिप तदनुगमवशात् तस्याः प्रियायाः कर्त्र्याः अनुगमः पश्चाद्गमनस्य वशाद
शारात् अवनीमिमानोमानेकुर्वाण इव स्तुत्यंप्रक्षामाङोल्लटःशानजादेशः क्लादिति द्विर्भावः अनायतान्य
नेतरालानि पादानि न्यधितनिहितवान् एषा च नायिका स्वाधीनपतिका ॥ स्वाधीनपतिका सा तु यां न मुंचय
ति वल्लभ इति लक्षणात् दृष्टांतश्चेयं ॥१३॥ अथ काचित्पुरः प्रयात प्रियमेलनप्यशीघ्रानुधावनं प्रार्थयमानां स्वस
सखीमाह ॥ यदीति ॥ हे सखि मयि लघिमानमागताया स्वयंगमने लाघवं संप्राप्तायां तवधृतिरस्ति यदि संतो
षो भवति चेत् धृतिः संतोषधैर्ययोः इत्यमरः तदेव स्थैवसंप्रसस्मिन्क्षणे एवगतास्मि इति वदतीति शेषः इति ना
गम्यमानार्थत्वाद प्रयोगः अन्यथा पोनरुक्त्यादि सलीकरिकाः सख्याः सह कोपपदेन कोपव्याजेन वस्तुतस्तु
रागादेवेति भावः व्याजोपदेशो लक्ष्यं चदिमितोव्याजनेपदमित्यमरः काचिन्नायिका द्रुततराः शीघ्रतराः पा

स०क० ७४ दयाताः पादन्यासाः यस्मिन्कर्मणि तद्यथा तथा प्रियं वल्लभमावपातु अनुधावति स्मरवशा च स्वयं प्रवृत्ता स्याला स०७
पवं शंकनेया पूर्वं निर्वासितप्रियानस्यैदानीं स्वयं प्रवृत्तेः पश्चात्तत्प्राप्ते च तिगम्यते। अतः कलहान्तरिता। कोपा
त्कांतं पुनाणुद्य पश्चात्तापसमन्वितेति लक्षणात्॥१४॥ अविरलेति॥ सखि व्रजे यः पार्श्वमाश्लिष्य गच्छत्याः इस
र्थः तरुण्याः संबंधी अविरलपुलकः प्रियांगसंगात् रोमांचः एकतरो ऽन्यतरो यो ऽन्यः द्वयोः संनिकृष्ट इति भावः।
स्तनः प्रियस्य वक्षस्तटमिव तस्य भूः प्रदेशस्तस्यां वक्षस्तटभुवि प्रतिपदं घटितविघटितः संयुक्तवियुक्तः पतितोत्प
तितः सन्निति यावत् कंदुकविभ्रमं गेंदुकक्रीडां गेंदुकइ समरः वभार। अन्यविस्रस्ता न्यसंवेधा योगात् स्वादृश्यादृ
पेनिदर्शना एषा च प्रियया पार्श्वगामिनी इतः प्रभृति मदनरसेन ततः प्रागवस्थमाणः षट् नायिका दृष्टा प्र
गल्भा क्रमेणानुसंधेयं॥१५॥ अथापरस्याः अपरांगतिविशेषं विभिः कुलकेनाह॥ अशिथिलमित्यादि॥ अपरा
स्त्री दृढं परिरब्धो गृहीतो वक्षस्थले हरिस्तेनायेन तेन हर्षितान्युद्धर्षितानि तनुरुहाणि रोमाणि यस्य तेन पुल
पुलकितेनेत्यर्थः किंवेतो तरपदो वहुव्रीहिः हर्षलोमस्विति धातुगमः भुजेन भर्तुर्वामबाहुना अमदगाढं यथ
था तथा व्यतिविद्धं व्यतिषक्तिं तामदं कोमलमेकबाहुं निजदक्षिणबाहुं भर्तुः कंठे अशिथिलं दृढं अवस
न्यास ज्यजमामेतिभाविना संवध्यते॥१६॥ मुहुरिति॥ किं कृतानि तव मंडलेन करणेन नितांतमतिशयेन
प्रणदिता प्रकर्षेण ये ध्वनती मत्त्ती कांची यस्मिन्कर्मणि तद्यथा तथा उपसर्गादसमासेपि णोपदेशस्येति णत्वं
मुहुरसकृत् समं प्राणेशं अह्वयती ताडयती हि तेरादृ पूर्वो लिटः शत्रादेशात् ङीप् सकर्मकत्वात् सकर्मकत्वात् कुप
कोपमहनरसात्मनेपदे विवमिताविवमी कृता पृथुहारयष्टिः यस्मिन्कर्मणि तद्यथा तथा इतरपूर्वश्लोके
तंवहिस्त नादन्यां दक्षिणमित्यर्थः कुचेतस्य भर्तुरुरस्थलेति यकनि पीड्य पूर्ववत्संवेधः॥१७॥ ७४

पदेष्वानतसकारस्याद्यादेशः अंगनो(गा) स्तु विभ्रमसंपदः विलाससंपदः पदं न्यदधत तदानीं विलासाः प्राप्ता इत्यर्थः अ
न्यदधत विभ्रमसंपदोंगना स्विपुंके ना एव प्रपत्स्यति॥२॥ नखेति॥ ललितगतेषु मदगमनेषु नखावलीरुचि
भिः प्रभाभिः रचिता इंद्रस्यापेलखा यस्मिन्कर्मणि तद्यथा तथा गतागते या तायां तदंष्टा नातरुणाभुजलतिका
मुखराः कृता इति मुखरिता ध्वनिता वलयं यस्मिन्कर्मणि तद्यथा तथा कटकोवलयो स्त्रिया मित्यर्थः पथ्यानितवे
मुहुरस्खलत च स्वाला॥४॥ अतिशयेति॥ अतिशयेन परिणाहवान् अतिविशाल इत्यर्थः अन्यथा तज्जघनस्य प
र्थे प्रेरितिभावः परिणाहो विशालता इत्यमरः चटुतरमर्पिता रत्नानां किंकिणया यस्मिन्कलो मधुरो रावो मेखला
कलापो ऽपरस्याः स्त्रियाः अलघुनि जघनस्थले अधिके ध्वनिं वितेने तद्दलकृतिरियं॥५॥ गुर्वीति॥ गुरु
गुरुत्वगुणयुक्तेन नितंबेन इचयन्नितेव तत्तद्वभारः तस्याः क्रमणेनाधिष्ठानेन निर्वाडित अंगनाजनस्य च र
णस्तु गकतेपदषु पादन्यासस्थानेषु अलक्तक लेन लाक्षारसनिषेणस्वरसेस्वद्रवमेव गुणेन रागेणद्रवेरसस्य म
रः अप्रसतमविच्छिन्न यथा तथा अश्रुवत् अवर्तिस्म द्रवद्रव्यकतृक एवायमकर्मकः अन्यकर्तृकं हेतु द्रव्य
कर्मक इति अवर्तिः तत्र सकर्मकः॥६॥ अथ कस्याश्चित्सख्याः कुपितनायिकानुनयवचनं पंचभिः कुलकेनाह
तवेत्यादि॥ तां मत्सखीं सपदि तव समीपमानयेयं आनेष्यामि वर्तमानसमीपे वर्तमानवत्प्रत्ययः कर्तृभिः प्रायमात्म
नेपदं इति मया तस्याग्रतोऽभ्यधायि अभिहितं धाञ्कर्मणि लुङ् अतो युगिति युगागमः हे गुणगौरि गुरोः सौभा
ग्यदाक्षिण्यादिभिर्गौरि पार्वति इति रूपकं अतिरभसेन अतित्वरया कृता अलघुर्महती प्रतिज्ञा तदानयनार्थय
या तां मामन्तगिरमसत्यवाचमा कृथा मा कार्षीः मद्वचनं सर्वथा कर्तव्यमित्यर्थः करोतेर्लुङि थास्तनमाङ्योगे इस

स० कां० अनुवनमिति॥ अपरः कामी अनुवनं वने प्रतिसखीभिः सह पुरो गतायाः असितभ्रुवः स्वकांतायाः पदवीमुरसि वक्षसि सरस आर्द्रे रा स० ७
७५ गोलाक्षारंजनं यस्य तस्य पादस्य या रेखाविन्यासः सा प्रतिमा उपमानं यस्याः सा तत्र तत्प्रतिमा तस्याभावस्तत्तां लक्ष्य ध्वनियाऽस्पर्शः
असंशयानोऽसंपदि दृशीकोलरंकं तरिशान जादेशा अनुययौ अत्र पादरेखा प्रतिमत्तयेति सादृश्यवस्तुना सुरतकालीनपादता
नेवस्तु सरससरागपादार्थमहिम्ना प्रतीयते इति पादगतः स्पतः सिद्धार्थशक्तिमूलो वस्तुसंलक्ष्यक्रमध्वनिभेदः॥२२॥ मदने
ति॥ मदनस्य रसो मदनरसः अन्यच्च रसो जलं तस्य महौघेन महापूरेण पूर्णा नाभय एव ह्रदाः तेषां परिपरिखाहाः कृत्ताः परिवा
हिता जलोच्छ्वासोत्कृता रोमराजयो यासां ताः जलोच्छ्वासपरीवाहा इत्यमरः सरिज्जलानि ह्रदस्था पूर्यपरितः उच्छ्वसंतीति
प्रसिद्धिः सविभ्रमैस्सविलासैः प्रकृष्टगमने प्रोणोदितासिजनाये हंसकापादकटकाः हंसकं पादकटकं इत्यमरः अन्यच्च हं
सा एव हंसकाः मरालास्त एव भूषणानि यासां ताः स्त्रियः सरित इव विरेजुः मदनरसपूर्णेन नाभीनां तदुद्बोधकत्वं
ते परिवाहिकै तरोमराजय इति रोमराजीनां परिवाहित्वरूपाणं चोभय एव ह्रदा इति रूपकाश्रयसंतास्सरित इव श्लि
ष्टविशेषणाय मुपमालंकारे एव सन्यः॥२३॥ अनुतिपथेति॥ अनुनदं नदीनां समीपे समीपार्थेऽव्ययीभावः अव्ययीभाव
श्चातनपुंसकं हंसहंसैः ताभिः स्त्रीभिः जनानां समूहो जनता ग्रामजनसम्रहेस्वादिना समूहिकस्तल्प्रत्ययः तासामनं
स्यवशरव्यं लक्ष्यं लक्ष्यं शरव्यमित्यमरः तस्यव्यधो वेधः तत्र पटुः समर्थो यो मन्मथस्तव्यापनादः स इव शंकाभ्रमे विदध
ति दधानाति नाम्यस्तास्स्त्रतुरिति वैकल्पिको नुम्प्रतिषेधः श्रुतिपथमधुराण्यक्षराणि यस्मिन्सर्वः स्वाररसानां रुतानि शब्दाश्चि
रेश्रुतानि सारसरुतमश्रवणं मनसो श्लीपनमासामासीदित्यर्थः॥२४॥ मध्वेति॥ उत्सुकान्युन्मनांसि भ्रमरकुलानि
मधुमथनस्य हरेर्वपूरंजयत्साकारयत्तीति वसुत्येक्षा हत्त्वराकारणं स्थानं इत्यमरः शापशनोनिसमितिकृयते शशान्तनुभागम
जगुरितियत्तगायते लिट्वनानामावलिन्नूतानपल्लवा एवांगुल्यः इत्येकदेशिवतिसावयवविरूपकं अस्यैवनावलो ७५

नर्तकीस्यरूपकापगमकत्वादिति ताभिः तदभिनयनं व्यंजकैश्चेष्टा अतनुतेव व्यंजकाभिनयौ समावित्यमरः अंगैराल
भैयजीतं हसेनार्थं प्रदर्शयेदिति वचनात्॥२५॥ असकलेति॥ मरुद्धनानिलः असकलाः असमग्राः अर्द्धविकच्या इत्यर्थः
ताभिः कलिकाभिः कोरकैरा कुली कृतानां संक्षोभितानां अलीनां स्खलनेन विकीर्णविक्षिप्ताः विकाशिन केसरा किंज
ल्कायेषां ते अवनिरुहां क्षिपरजपरागं वधूभ्यः समुपहरन् पयद्धरन्यथाकृक्षितकामीति भावः धनमजयन्वससीतिव
ल्लरीषु एहे लाक्रियाया इति हलचैरतत्प्रत्ययः कोरकानि कुड्मलानि कलिका कोरकः पुमानित्यमरः कोशो पुंस्यभिधानं प्रा
यिकाभिप्रायं कोरके कुड्मले पिस्यात्क्लीबोलकमत्रणलयोरिति विश्वप्रकाशादौ नपुंसकस्याप्यभिधानात् विचकप
विकासयामासेत्यर्थः वीपूर्वात् किरतेः करोतेर्वा लिट्॥२६॥ उपवनेति॥ वने उपवनं इति विभक्त्यर्थेऽव्ययीभावः तत्रयःप
वनः तस्यानुपातेनानुसारेण नदद्भिः शत्लिभिः पद्मकपणात् अंगनाजनस्य संवेधी परिमलो गंधविशेषः विमर्दोत्थोप
रिमलो गंधे जनमनोहरे इत्यमरः स एव विषयो भेद्यार्थः रूपशब्दगंधरसस्पर्शाश्च विषया मीत्यभिधानात् आलाभि
लब्धः लभतेकर्मणि लुङ् विभाषा चिण्णमुलोरिति विकल्पानुम्भावः अत एव उपधावृद्धित तस्माद्धलतानां महता
मनुगमनेप्रयासोद्भवेनानुवृत्तौ च संपदोऽग्नास्तित्वं तीति इगस्याः पुरोवर्तिन्यः स्खलसुपिस्यादिति कप्रत्ययः अ
त्रानुगमनयोरभेदेनाध्यवसायाभेदेन उत्स्यापितातिशयो तया नुप्राणिते यमर्थातरंन्यासः सामान्येन विशेषणस
मर्थनरूपोर्थातरंन्यासः॥२७॥ स्थेति॥ सुमनसः पुष्पाणि स्पचरणे तस्य धरोधारयिता हरिः पत्यावचतस्यांग
नास्तासां करात्त्रौव्यतिकरः संपर्कः स एव संपत्तया उपात्ते लब्धं सौमनस्यं सुमनस इति नामकत्वं संतुष्टचित्तत्वं याद
सोताःस सः अत एव सौमनस्यं लाभ आदि यस्मिन्कर्मणि तद्यथा तथा तदादिततः प्रभृतीत्यर्थः पूर्वोक्तावचयवर्यात्प

स०७०
७६

रिस्फुटं प्रसिद्धावयवार्थमभिधातेनामधेयं दधति पूर्वं लक्षकर्णालादिवत् रूढमिति भावः आख्यातु अभिधानं च
नामधेयं च नाम च संसमरः स्त्रियः पुष्पा एव पद्ये तु इति फलितार्थः नूनमिति उत्प्रेक्षायाम् ॥ ८६ ॥ अभिमुखेति ॥ अभिमु
खपतितैः भग्नार्थमभिमुखागतैः उज्ज्वलानां मुक्तोच्छ्वासानां मुञ्चति मुपरि प्रसारं मोक्षं च दधानैः रंगनानामग्राणि
च तैः हस्ताग्रैः अति समानाधिकरणः समासः अत एव हस्ताग्रस्य हस्तायोः गुणः गुणिनोर्भेदाभेदादिति वामनः तैरग्र
हस्तैः कर्तृभिः गुणप्रकर्षाद्धेतोः रवजितं मे धारितं तत्तरुकिशलयजालं प्रसभं बलात् भंगच्छेदपराजयं च नीयतनी
तं अग्रहस्तेषु विशेषणमहिम्ना जिगीषुलस्य किशलयजाले जेतव्यहस्ये चोपतीते समासोक्तिरलंकारः ॥
८८ ॥ मुदितेति ॥ मुदिता हृष्टा मधुपा मधुलिहो यासु ताः शाखाः भुजेन हस्तेन चलिता निविष्टा खलानि अप्रतिहतरस
वालिं प्रेरवकानि वलयानि यस्मिन् कर्मणि तद्यथा तथा धुवंसाः कंपयंसोः धूविधूनने इति धातोः तोक्षादिष्ठः तरिङ्गीपक्र
ति चेति वेधादु वकादशः अतिशायिता सौंदर्येण अतिक्रान्ता मरंगनायया तस्याः कस्याश्चित् छिरसि तरुर्मुदेव तदभि
सरणे संतोषेणेवेति गुण हेतूत्प्रेक्षा पुष्पवृष्टिमुमोच ॥ ८९ ॥ अनवरतेति ॥ अनवरततरसेनाविच्छिन्नद्रवेणान्यत्रा
नुबद्धश्रृंगाररसेन रागभाजा रक्तेनानुरक्तेन करजपरिक्षतिषु नखक्षतिषु लब्धसंसर्गेण प्राप्तपरिचयेन संस्तवस्तत्पर
रिचयः स्यादमरः बध्वाविगतदयं निर्दयं यथा खण्डितेनाछिन्नेन निराकृतेन च तरुणपल्लवेन नवकिशलयेन युवविटेन
च पल्लवकिशलयविटः इति विश्वः सपदि मम्लेम्लानः खलु प्रसिद्धं म्लायते भोवलिः अत्राभिधायाः प्रकृतार्थनियं
त्रितत्वाद्प्रकृतार्थप्रतीतेः ध्वनिमूलो ध्वनिः श्लेषतेन चोभयोः पल्लवयोरोपम्यं गम्यते ॥ ९० ॥ अन्यासां पुष्प
वचये श्रृंगारचेष्टावर्णयन् कस्याश्चिच्चेष्टाविशेषमेके नाह ॥ प्रियमिति ॥ अन्या स्त्री प्रियमभिप्रियस्याग्रतः सर्पः

७६

गुरुतरेति ॥ पुनः गुरुतरः कलो मधुरश्चन्द्रपुरस्यानुनादो ध्वनिर्यस्मिन्कर्मणि तद्यथा तथा सललितं सलीलं नर्तितं नर
व्यापारितं वामं सव्यं पादपद्मं यस्याः साऽइतरदक्षिणपाद मनतिलोलम् तच्चरणस्खलनादनतिविस्तृतचल
नं यथा तथा आदधाना निक्षिपंती सती मन्मथेन मदमंथरं अलसं गजगामेव चपार्श्वगामिनी ॥ ९१ ॥ अन्यान्मासा
मध्ये केन गतिविशेषेनाह ॥ लक्ष्मीति ॥ कश्चित्तु द्वयेनेत्यन्यावला स्त्री तस्य प्रियस्यांसो पीठे तयोर्द्वयेन्निर
हितौ बाहुपाणिपल्लवौ यस्याः सा सती लघु निहुतेललितैः पदैर्यस्मिन्कर्मणि तद्यथा तथा कठिनाभ्यां कुचा
भ्यां यः प्रणोदो निपीडनं तेन सहितं यथा स्यात् कुत्वा गंस्यादिस्यमरः तेन सहेत्यादिना समासे चोपसर्ज
नस्येति सहस्य सभावः सोपदेशा हातर्कलोदइति गतं स विलासं च प्रियं अन्वियाया नुजगामेवाचप
लगामिनी ॥ ९२ ॥ जघनमिति ॥ काचित् स्त्री अलघु गुरु पीवरौ पीनौ चोरू यस्य तत् उरुमहानुनिविडौ सोनि
विडः निविडौ निविडौ संचरतौ गात्रे प्रयच्छते इति वैजयंती निविड चचिरौ सचाविति निशा छादितौ सत्रयः सत्र
यानि तेनःकटिपश्चाद्भागः पश्चान्नितंबः स्त्रीकट्याः क्लीवे च जघनं पुरस्सप्तमरः स एव भारस्तेन खिद्यते इति
तयोके आभीक्ष्णो णिनिः जघनं कटिपुरोभागे दयितं तमस्य प्रियस्य प्रियस्य शिरोधरायां ग्रीवायाम वलंबि न्यो लव
मानयोः स्वभुजलतयो विभवेन सामर्थ्येन कथ्याद्वहेतुवाह बहिस्यरितेत तत्का लक्रंभिप्राय मात्मनेपदस्य च
पदगामिनी प्रियं कंठावलेवा ॥ ९३ ॥ अनुवपुरिति ॥ अन्याः स्त्री वपुषः पश्चादनुवपुः स्त्रीपश्चाद्भागे अव्ययं
विभक्तीत्यादिना पश्चादर्थेऽव्ययीभावः बाहुमूलयोः स्त्रीकक्षकुक्षयोः प्रहितावधः प्रसारितौ भुजौ ताभ्यामाकर
लितः स्तन कपोले निहितः दशनवासस्सान्यस्ताधरेण किंचिदाच तमुख्याः स सा कपोलं चुंबते सर्पः अपरे
एकामिनाविषममधिसहर्षात् तस्मि हृष्टचितीर्ण पदन्यस्तां प्रियया तथा बालादिव निन्ये नीतो आरोप्य नीयमा

[illegible]

सं०कं० ७७ विजानन्तीत्येवमपि विटपीवल्ल्येविभक्त्यर्थेऽव्ययीभावः लतीत्यथा तथाऽग्रपल्लवाग्रे यानि पुष्पाणि तेषां ग सं०७
हणस्यमिषेणापदेशेन चिरं विलम्बप्रियायस्यांगप्रदर्शनार्थमितिभावः॥३५॥ अद्येति॥ विलम्बनानन्तरं अत्रास्मि
न्प्रियेसखीभिः कथितेसतिकिलायमत्रैवास्तीति प्रबोधितेसतितत्क्षणं ससंभ्रमा भवति अपरे च पूर्वविपरीत
व्यापारकरणादन्यथाभवतीबुद्धिपूर्वकारित्वमज्ञातनाठकेनवेत्ययं तीत्यर्थः शिथिलितपुष्पग्रहणानान्निवर
र्तितः कुसुमाकुलः कुसुमव्याप्तोऽग्रपाणिर्यस्याः सा प्रतिपदंप्रतिस्थानेसंयमितेन नियमितेनांशुकेनअंसु
केसूक्ष्मवस्त्राणादितिविश्वः वस्त्रेणावृतमंगं यस्याः सा तथोक्ता॥३६॥ कृतमयेति॥ किंच कृतं भयपरितोषयोः
मत्दर्शनोत्पन्नसाध्वसहर्षयोः सन्निपातः संकरो येन ततत्मनसिजातः मनसिजः स्मरः सप्रार्थ्ये उद्देः हलदंतात
सप्तम्याः संज्ञायामिसलुक्सएवगुरुराचार्यस्तेनतत्क्षणे तस्मिन्नेवक्षणे उपदिष्टं तदकहेतु कथित्यर्थः किं
मप्यनिर्वाच्यं रसान्तरं लक्षणया भावान्तरं तत्र हाकिलकिंचिदाख्यविवक्षितेकृतमयेत्यादिविशेषणेन र
क्रोधाश्रुहर्षभीत्यादेः संकरः किलकिंचितमितिलक्षणार्थस्यप्रतीतेः रसेन रागेण हेतुना भजेतीत्यत ए
वससंकिताभयात्ससंभ्रमाचकितभयसंभ्रमः सास्मिताहर्षात्समंदहासाचैववक्त्रवारिजश्रीर्यस्याः
स्सासतीमय्यचकितस्मितयोः पूर्वोक्तभयहर्षानुभावत्वेनोक्तिः॥३७॥ अवनतेति॥ अवनतवदनं
दुःलेज्जयानम्रमुखी सर्वाः आश्लिष्टदयोन्मितिविकल्पानुमभावः आक्रोप्रियायस्ताम्यितं आलापेनप्रकारेतीस्थि
तोऽसर्व्वः तिष्ठतोलुठइतियदतोहेतोरस्य प्रियस्याततः सुतरामहरत तथाहि त्रपैवस्त्रियाः भूषयति स्फुटं प्रसिद्धमियमप्य
अतोऽस्याः अपत्रपाभूषितत्वादतिमनोहरत्वमुक्तमितिभावः कुलकालेकारोपमर्थांतरन्यासः मध्यावस्थेयंनायिका ७७

धृता
लज्जामन्मथमस्यामध्यमोदितयौवनेलक्षणं॥३८॥ किशलयेति॥ किशलयशकलेषु अवाच्यनीयाः प्रसिद्धलिपिवि
वेलक्षणाह्यूचितमनहाः किंतु केवलं पुलकिनिदयितस्यहस्तस्पर्शादेवरोमांचवत्संगकेवपुषिनिक्षेप्या विरह
श्याम्यतीतिभावः ॥ ६९ ॥ स्वच्छेति ॥ स्वच्छं नांभसा स्वपनेन अभिषेकेन विधौतविमलितं अंगं वपुः तांबूलद्यु
ता तांबूलानुरागेण विशदमुज्वलः ओष्ठो ऽधरः प्रतनु सूक्ष्मं विविक्तं विमलं वासः अयंअयवाचिविनमेकांत
स्थानेवार्दसेचरूपोरयानएतावानेवविलासिनीनां मा कल्पो नेपथ्यमस्तुकिमर्थं [illegible] स्यैरितिभावः
कुसुमेषुना कामेन शस्त्र्यायदिनभवेत्तस्य अन्यत्र उपहितानामपिवकनकभूषणमपिमोघ्यतएवेतिभावः ए
तेनविच्छित्ता माल्यवनेच्छाख्ररूपउद्दीपनविभावउक्तः स्तोकभूषणयोगेपि विच्छित्तिरितिगम्यत इतिलक्षणात् ॥ ७० ॥
अथोत्तरसर्गेस्यार्थस्तमयादिवर्णनं प्रस्तौति ॥ इतीति ॥ इतीत्थं सरसि मज्जनेन स्नानेन धौतपुरंधिमत्स्य
रागक्षालितमालिनीमालान् अभीष्टमिति शेते अभीष्टं अतिशयिनीं आभीक्ष्णं सिक्तिः प्रियमाप्त वतः प्राप्त

८२ वतः प्रथमलग्नमासः विमलांगकांतीन् यादवान् अवलोक्य तदेव शिशिरेतररश्मिस्तापादुष्णांशुना पि अपरवारि
राशेः पश्चिमाब्धेरपां ततिषु जलपूरेषु मंक्तुं प्रवेष्टुं ईषे इष्टः इष्ट भावे लिट् परच्छेष्टा साक्षात्कारो विषयिणं ता
दृग्विषयाभिलाषमतरद्धत इति भावः अत्र भानोः कालतः प्राप्तमज्जनस्य यादवमज्जनावलोकनहेतुत्वर
मुत्प्रेक्ष्यते ॥७१॥ ॥श्रीपं०बा०पा० कोलाचलमल्लिनाथविरचिते माघव्याख्याने सर्वंकषाख्ये ऽष्टमः सर्गः ॥८॥

सूर्यास्तमयं वर्णयति ॥ अथ मिमिक्षानंतरं उष्णरुचिः सूर्यो निजतेजसा ममितापसंपर्दं तापातिरेकं असहमान इवापराम्बुनिधेः
पश्चिमाब्धेः पयसि प्रविविक्षुः प्रपतितुमिच्छुः पततेः सनंतात् प्रत्ययः सईनाभिमिसादिना इशादेशः अत्र तोयपाया सस्य सम्भाव
लोवः अस्तगिरिमस्ताद्रिमंत स्तु चरमक्ष्माभृत् इत्यमरः अधिरोहुमभ्युपेत अभ्यधावत् अत्रयासहमान इवेति कानप्रा
प्तस्य पयसि प्रपातस्य निजतेजःसहनहेतुकत्वमुत्प्रेक्ष्यते अस्मिन्सर्गे प्रमिताक्षरावृत्तम् प्रमिताक्षरा सजससैरु
दिता इति लक्षणात् ॥१॥ गतयेति ॥ रक्तेन रविप्रोसितौ लक्ष्याभ्यां तृतीया च इति सप्तम्यर्थे तृतीया अंशुम् स्तुकता कला
क्ष्मवलक्षणमो स्तुवपो दधतीयाबितपुरोगगवाक्षमुखगवाक्षधारंप्रतिगतया अपसतया दशा अस्तगिरेः स
वितुरंतरालभुवं मध्याकाशं ददर्श मुहुरभिमीतमातिसीह स्तमात्रमवशिष्टमरलिमात्रमवसिष्टमित्यादिना मानकरणे
नास्तमयं प्रतीक्षितवतीमित्यर्थः माङ्गोलाङि क्ला विति द्विर्भावः अजाभिसम्पासस्यलम् एतआस्तमयं प्रतीक्षणम् अमणादो
स्तुवपानुभावांतरालक्षणं अत्रौत्सुक्यभावचवचनात्प्रेयोलंकारः ॥२॥ विरलेति ॥ परिणति परिणाते मन्यत्रजोराक्ष्या चगतः
अन्यत्र विरला अल्पा अतपस्य धिषः स्यसश्रन्यत्क्षीणप्रभा अन्धकातनुः अन्यत्र यो काश्यादीष दुष्छेदः अलवणं जवाग्रिति वद
ल्यायेन त्रप्रयोगः परितो विपांडुरेक चक्षुभ्रा अभ्रपटलच्छन्नत्वात् परत्र पलितैः पाण्डु अभ्रमाकाशमेव शिरो दधद्वृद्ध ८२

तः पदभ्रंशोल्लज्जिताः कचिल्लीयते तुधृष्टास्तु निर्लज्जाश्चिरं रमंते इति भावः आशुगुरुर्णि मज्जंति लघुनि प्लवंते इ
ति मपार्थः ॥३॥ स्त्रामरेति ॥ तिललरुचः पत्रशोभा अम्रदाः स्त्रजो माला निरस्ताः वसनं कौसुंभं वा सोम्बर
तेनिरस्तरागमित्यर्थः कृतमिति शेषः अंगरागो ऽपाकृतः सर्वं त्यक्तमित्यर्थः इत्यंस्यपरिव्याघातात् स्ववर्णदृश्या अनु
शय्यवानिवानुतापैवानिवेत्युत्प्रेक्षा कामो मन्मथः स्त्रीः स्त्रियः सुतरां चारुः पूर्वतोपि रमणीया अकार स्त्रीणं काम
एव विभूषणं अन्यद्रूमवमेवेति भावः ॥४॥ शीतेति ॥ नीरे स्तोयैः आसेकादासेचनात् शीतार्तिः शीतव्यथा वलवत्सुद
उपयुषेव प्राप्तवतेवेत्युत्प्रेक्षा अतएव शिशिरसमीरकंपितेन शीतवाततवेपिना नवाम्बुकेन कत्र्यम्रिमिनवायो
वनोष्मा उष्महेतना रामाणां स्तनतटयोरंतर्लेलिग्ये आश्लिष्टसंसर्कंभावेरु-सहेतुकस्योश्लेषस्य शीतार्तिहेतु
त्वमुत्प्रेक्ष्यते इति हेतूत्प्रेक्षा ॥५॥ इत्थमासां जलक्रीडामुक्ता जलादुत्तरणं वर्णयति ॥ अवतस्तिति ॥ अथ जलक्रीडा शु.क.८
नंतरं अंगसंगात् त्रसेपकात् प्राप्तमुपात्तमुपात्तमिति यावत् समाधिकमतिरिक्तं तनुमन्मूर्तिमत् लावण्यमिवकांतसा
मिवेत्युत्प्रेक्षा अनुद्रो तहि स्वरद्रिः मौवादिकलालमूपधगुणः तरलाश्चपलाः स्तरंगा एव रंगाः सस्यानानिते
षु लीलालोलानिता सुनिष्णातैः कुशलैः नदीनां स्नाताः कौशल इति षत्वम् वासोतेवस्त्रस्या चलेरुपलक्षितैः प्रि
यासमृते स्त्रीसधैः सरसो ह्रदादुत्तेरुत्तीर्णानिर्गतमित्यर्थः तरतेभावेलिट् ॥६॥ दिव्यानामिति ॥ दिविभावादिव्या
स्तेषामपि कृतविस्मयां सौदर्यातिशयेन जनिताद्भुतरसां स्फुरदरविंदाभ्यां चारु रूस्तोय स्यास्तापम रुस्तामित्यर्थः पु
रस्तादग्रतः अंभस्तः जलात् पंचम्यास्तसिल उत्तरंतीं उत्तरंतीं निष्क्रामतीं काचितस्त्रियं श्रियमिव मथ्यमानात्समुद्रा
त्सेयः प्रादुर्भवंतीं लक्ष्मीमिवाद्राक्षीत् पश्यति शौरिः कृष्णो जलनिधिमंथनस्य समुद्रमथनमित्यर्थः मेघो भोवादिकस्येदिता

सं०कि० ५३

रागणार्णं च गम्यते च्छुद्धपूर्वेन्नुति सौत्रादेव प्रयोगात् सहार्थं नाम प्रयोगेऽपि सहयुक्ते प्रधान इति सहार्थे तृतीयास्त्राति सं०९
सक्तिमति संनिकर्षे अस्याशक्तिं च एस प्राप्य अस्तमन्वरज्यत लोहितोऽभूदिति रक्तो वा अस्ताम न तु रजेर्देवादिकात् कर्तरि ल
ङ् दुविरञ्जोः प्राप्त्यां रय तु परस्मैपदं च एतिकर्मकर्तरि वा अत्र चवारुणीदिनकरमहिमैव तयोर्जारभावः प्रतीतेः
समासोक्तिरलंकारः ॥७॥ गतवतीति ॥ जपाकुसुमस्तबकद्युतौ लोहितवर्णे दिनकरे अवनतिमस्तं गतवति सति
ति लवायमाने सति तीर्थः दिग्वलयं दिङ्मण्डलं कंकणं च च्छन्यते च हलानुरागैः सांद्ररागैः कुरुविंदलैः पद्मराग
सकलैः प्रतिबद्धः प्रसृतो मध्यो यस्य तदिव राज्यत इत्येवं सु सौक्ष्म कुरुविंदस्तु मुस्तायां कुल्माल ब्रीहिभेदयोः
हिंगदे पद्मरागे च स्रु कुलेपि समीरित इति विश्वः ॥८॥ द्रुतेति ॥ द्रुतं तेयत् शातकुंभं तपनीयं सातकुंभमितिस्व
वर्णपर्यायेष्वमरः तन शादसं तन्निभमिति निसमासः पयसि समुद्रोदके अर्द्धं यथा तथा मग्नवपुर्यस्य
तस्यांशुमतो अर्कस्य वपुर्मण्डलं विरंच्येब्रेण खेन भिन्नस्य द्वैधा विदलितस्य च हतो महतो जगदंडक
स्य जगदाश्रयकोशस्य ब्रह्मांडस्य कतरखंडमन्यतरदलमिव रुरुचे रराज अत्रोपमानस्य पुराणप्रसि
द्धत्वादुपमालंकारः ॥९॥ अनुरागवंतमपीति ॥ अपरा दिक् पश्चिमा सैव गणिका वेश्या। वारस्त्री गणिका वेश्या सम
रः अनुरागो लोहित्यं अभिलाषश्च तद्वंतमपि लोचनयोः सुखयतीति सुखं सुखकरं शांतिलादभिरूपाश्च दर्श
नीयं वपुर्दधतमपीति अतापकरं एम नोष्मादशा ह्लानश्चासंतापकारिणं सुखस्पर्शं च अतएवापि तं वसुंनि
रस्मिं निर्द्धनं च द्वे द्वेधने लेरश्मौ वसुरत्ने धने वस्विति अमरः रविं सूर्यं वियंच गम्यते वियदाकाशमेवालयो गृहं
तस्मान्निरकासयत् निःकाशितवती धनपरा हि वेश्या निर्गुणमपि धनिकं आसर्वस्वहरणादनुरवदनुवर्तते ९३

गुणवंतमपि हृतसर्वस्वं निर्कासयतीति स्वभावेतिभावः अस्तंगतोप्यलेखापितदुस्थापितस्याद्नुरागएवानुरागी वसुएव
प्रसन्नीति रूपकएव पर्यवसितएवेसेकंगके इतिश्लोकार्थः अत्र वियदालयादपरदिग्गणिकेत्येकदेशरूपणाद्व्य
विटत्वरूपणावगप्राद्देवदिशवर्तिरूपकं ॥१०॥ अभीतिः ॥ नलिनी अभित इति अमरराशिमरूपं अभिमुखं चिरमादस्तमपा
दनिमेषतया अपक्ष्मपातपादलसंकोच एवाभतिमिव अवधानेनाभिमुखावस्थानं निवद्धेन स्निग्नमलसं
अतएवविगलन्निः सत्तमधुब्रजाकुलेवाम्बुजलेशयस्य तदंजमेव नयनं न्यमिमीलितमीलतिस्मभ्राजभावेत्या
दिना विकल्पान्नोपधाह्रस्वः अतएव नाम्यासदीर्घः अनुरक्ता हि कान्ताकांतमनिमेषं पश्यन्तीति तदपाये सतिनि
मीलिताक्षिस्यादितिभावः अत्राप्यनयननमित्याद्यवयवकल्पसिद्धिरेकदेशवर्तिरूपकं ॥११॥ अविभाव्येति ॥
अविभाव्यतारकमलक्ष्यनक्षत्रं अदृष्टहिमदीधितिरिन्दुबिंबं यस्य तत् अव्याप्य अनुदितचंद्रतारकमित्यर्थः अ
स्तमितदर्शनेऽव्ययम् अस्तमितोऽस्तंगतो भानुर्यस्मिन् तत् एतानि गुणमुकान्यविदोषिमाह अवसन्नतापं
कस्तमयापक्षं तसंतापं अतमिस्रमनुदितांधकारं नभोऽन्तरिक्षमभात्भाति स्म भाते लङ् निर्गुणस्य कारणमिति
वाच्यं निर्देषतायाश्च विगुणत्वादिसर्वेतिरमाह विगुणस्य गुणहीनस्यापदोषता निर्दोषत्वमेव गुणः अतो
गुणवताप्रोभायुक्तोऽतिकारणेनसैसमर्थनरूपोऽर्थांतरन्यासः ॥१२॥ रविविधामिति तेजोनिधौ सूर्ये च तरिपयो
परलोकदेशान्तरं गते च प्राप्तसति विमलाः शुद्धैः स्वशिखोज्वलं निबिभ्रुः अग्निं वा वादिदृशः सायं प्रतिविशे
तीति श्रुतेरितिभावः अन्यत्र मृते प्रिये तया नारी सा स्त्री ज्ञेया पतिव्रतेति स्मरणादिभावः अग्निप्रवेशफलमा
हरतरया ज्वलनाप्रवेशान्यजन्मनि जन्मांतरे पात्माः सूर्य एव पतिः अन्यत्र तु योयस्मिन्न्यन्मनिप

स्लो० २४ ति: स एव कथं सुलभः न कथंचिदित्यर्थः उक्तं तेषां वा दिशः समग्निरनुसमारोहतेति श्रुतेः तेनैव सह मोदत इति सम स० ९
रणं श्रुतिभावः अतोग्निप्रवेशो युक्त इति समर्थनाद्वाक्यार्थहेतुकं काव्यलिंगमलंकारः ॥४३॥ अपसंध्याप्र
दुर्भावमाला॥ विहितेति॥ जनतया जनसमूहेन ग्रामजनसेहेत्यादिना समूहार्थे तलप्रत्ययः विहितांजलिः कृत
प्रणामे सत्यर्थः विकसत्कुसुंभकुसुमवदरुणं तां दधती राजसत्वादिति भावः तदुक्तं सर्गांबरलरजसोपद्यैर्हि
तमिति प्रस्तुत इति प्रस्तुमेता जनपित्रप्रसूर्मातां जननी भगनी स्वसेत्यमरः पितॄणां प्रसूः अप्रसावियसंध्या रू
पिणी रूपिणी अमृतसंभवो ब्रह्मणस्तनुस्त्यिरमुक्ता त्यस्य कापि प्रकृतिः स्वभावे जगंधधत्यादिति निषेधो मित्यर्थः नोक्त
तन विससर्ज उक्तविसर्गलक्ष्य उज्जादीनामित्यागमः आरः अत्वेति वृद्धिः मतपूर्वं पिमहीजनपरिग्रहः फलत
तीति भावः पितामहः पितॄन पद्मामूर्तितामुत्ससर्ज जहासस्य प्रातः सायमागत्य संध्यारूपेण पूज्यत इति अदि
भविष्यत्पुराणमत्र प्रमाणं अत्र तन्नुयागरूपकारणमज्ञावेपि प्रकृष्टागमरूपकायानुदयाद्विशेषोक्तिरलं
कारः तस्मात्सामग्र्यमनुसक्तिविशेषोक्तिर्निगद्यत इति लक्षणात् ॥४४॥ अपेति॥ अथ संध्योदयानंतरं सांद्राये
संध्यः संध्यायां भवाः संधिवेला नक्षत्रेभ्यो लियणप्रत्ययः तैः किरणैरुणितमरुणीकृतं अत एव विरहार्था विरह
व्यापदा दलतो दीर्यमाणं रुद्रयस्सुतेनरुधिरेण लिप्तमिव स्थितमिमं लक्ष्याहं रविं हरेर्विष्णोहति
राघुघस्रक्रमि सर्पः तस्य हूतिर्नाम यस्मिन्तत्पतत्तोः पत्रिणोः पतत्रि पतंग पतत्त्वत्र स्थो जद्धास्य मरः मुपुन
स्य कोकवाकद्वंद्वमित्यर्थः उत्पातं उड्डीयत ॥४५॥ निनयमिति॥ यज्जले जन्म यस्य तज्जलजन्म तद्वसे ते तस्मियोनि
लयश्रालय इति प्रथितश्रसिद्धुनिकायनिलयालयाइत्यमरः तद्धपि निहवासम्भूतमपीत्यर्थः तथाश्रियादिवसाय
ये सायंकाले मुक्तसत्कं अहो देवानामपि कृतघ्नं यद्यदि महोपकारिणस्त्यागः इत्याश्चर्यं अथवा त्वपलाघ्नो २४

हतपरिमंदप्रशांतं अर्यग्रहणाद्दिवसहे एवस्य विरह इत्सवयवरूपकसिद्धेरेकदेशवृत्तिरूपकं श्लेषाप्राणितं ॥३॥ अ
पराह्णेति॥ अपरोऽपरभागोऽह्नः अपराह्णो दिनांतः पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे इत्येकदेशिसमासः राजा
हः सखिभ्यष्टच् अह्नोऽह्न एतेभ्यः इत्यह्नादेशः अह्नोऽदन्तादिति णत्वं अत्रापराह्णे शीतलतरेणानिलेन शनैर्लोलिता आ
लिता लता एव अंगुलयो यस्य तस्मै अत एव निलयाय निवासाय आहूयते अंगुलिसंज्ञया आह्वानं कुर्वाण इव
स्थिता ये सुलेक्षाशाखिने रक्षाय स्वगकुलानि पक्षिसंघाः आकुलास्तु मुखा गिर इद्धमागमपतत इति प्रस्तुतराणि
ददुरिवेत्यनुषंगादुत्प्रेक्षा ॥४॥ उपसंध्यमिति॥ उपसंध्यं संध्यायां समीपे समीपार्थेऽव्ययीभावे नपुंसकत्वाद्ध्रस्वः
अशीतरुचः उष्णांशोः तनुकरजालं तत्क्षणे तस्मिन्नेव क्षणे तत्कालेपीत्यर्थः अंसस्तं संयोगे द्वितीया सानुमतोऽ
द्रेः शिखरं आस्तत्र अतिष्ठत् अस सेकतरि लिट् तसमस्तसमये नाशसमये पूर्वत्र तरमेव पदमुन्नतमेवोचितं
खलु अर्थान्तरन्यासः ॥५॥ प्रतिकूलतामिति॥ विधौ दैवे प्रतिकूलतां उपगते सति बहुसाधनता अनेकसाधनता
विफलत्वमेति महत्त्वपि साधनसंपत्तिर्निष्फलैवेति भावः तथाहि पतिष्यतः आसन्नपातस्य दिनभर्तुः करा अंशवो
हस्ताश्च बलिहस्तांशवः करा इत्यमरः तेषां सहस्रमप्यवलंबनाया वष्टंभनाय नाभूत् अत्र तद्दैवमेव प्रबलमिति भा
वः विशेषणसामान्यसमर्थनरूपोऽर्थांतरन्यासः ॥६॥ नवेति॥ अतुषारकरः उष्णांशुः नवकुंकुमकुसुमवदरुणपयोधर
या संध्यारूपेण पयया अन्यत्र नवकुंकुमकुसुमदरुणपयोधरया कुच्चया स्वकरावसक्तरुचिरांबरया स्वकिरण
कीतरुचिराकाशया अन्यत्र स्वहस्तलग्नचारुवस्त्रया वरुणस्य दिशा पश्चिमदिशा सह सर्वः वरुणसंधात

सं०कु०
९५

मेवौचित्यात्तदुत्प्रेक्षायाः प्रतीतेरसंभवात्तत्संसृष्टमेवामात्यरूपकमेकयुक्तं तया च रूपकानुप्राणितोत्प्रेक्षे सं०२
यमुपमेति संकरः तत्रोत्प्रेक्षया भ्रांतिमाननुनययो रूपकं च व्यज्यत इति अलंकारेणालंकारध्वनिरिति संक्षेप
॥१८॥ व्यसरदिति॥ बहुलपंकरुचिसान्द्रकर्दमद्युतिविदिवसावसाने दिनान्ते पटुनः समर्थस्य तमसः पटलमुद्धरगु
हानामेतरतोऽभ्यंतराद्देशगहनबहिर्वाह्यप्रदेशं व्यसरदनुविसृतं वबाह्यबहिर्वाह्यप्रदेशाद्गुहास्वपि केनस्वशश्व
भजते वा भजते तस्मात्किं प्रविष्टं वे सर्वः भजते लुङि तङ् मूलो हृल्लीति सकारलोपः अत्र व्यापकत्वसादृश्या तमसोंत
र्बहिरपादानकत्वसंदेहात्संदेहालंकारः॥१९॥ किमिति॥ पचुरीभवद्बहुलीभवत्तमःकर्तृ किमिव रलमलमा
काशस्य सत् अधोभूतलं प्रक्षालवत्तासीत्तत्किमिव अवनीतलतो भूतलादूर्ध्वमुपरिष्टाद्वर्द्धितं अथवा
दि[illegible]गभ्यस्तिर्यक् विससार विसृतं इति न निरधारि अवलंबनादीनामन्यतमं नावधारितमित्यर्थः धारयत
तेः कर्मणि लुङ् अत्रापि पूर्ववत्संदेहालंकारः॥२०॥ स्थगितेति॥ स्थगिते तिरोहिते अवरुद्धिते तलोचने
तस्मिन् तिमिरे परितो जने स्वदृशं न दधती संधत्ति कुर्वति सति सुदृशः स्त्रियोऽपूर्वं नूतनं रसं जनं र
सरागमेवांजनसिद्धांजनं चंदधारे दधुः अतो हेतोः प्रियवेश्मवर्त्मदृशः अवरसां जने वा व्याप्य न प्रियवे
श्मदर्शनसमर्थत्वाद्व्यहेतुकं काव्यलिंगमलंकारः तेन सिद्धांजनधारणेन निष्ठादिस्वपमाध्वनेनालंका
रेणालंकारध्वनिः॥२१॥ अवधार्येति॥ सांद्रतमयत्संततमसं व्यापकं तमः विश्वकसंतमसं तमसंतमसमरः अव
समंधात्तमसः इति समासांतः ततः तत्कर्तृसुतनोनार्यः दयितोपगमे प्रियाभिसरणे कार्यगुरुता संभोगकार्यस्या
कस्यकल्पं अवधार्य निश्चित्य सभयापनाभवत् त्वत्तनोः कुचौ च तनुः कृशा या रोमराजिः पंक्तिरोमणां पंचा मध्य

९५

भागः तस्यचेपथ्यवेकेपायविठोधुजिति युच्चप्रत्ययः नाभवता इति विभक्तिविपरिणामेनानुषंगः कार्यसत्कार
स्य तत्प्राप्तिकामुकस्य कुतो भयक्लेशगणनेति भावः अत्र संतमसंकुरभारयोः कामिति मितमयकेपानुद
ये कार्यगौरवावधारणे हेतुकेनोत्प्रेक्षणोद्धृतोत्प्रेक्षा यमकेन संसृज्यते॥२२॥ सवितुरिति॥ योग्रहगणो
तेनि सवितुस्त्विषानदृक्षेनलक्षितः सग्रहगणस्तमोभिस्तृतो व्याप्तां तद्व्याप्तिमस्यामिति तमी रात्री रजे
नीयामिर्बी तमी समरः अपिधिगम्य प्राप्य च्युतिमग्रहीत् ग्रहेर्लुङ् ग्रहालिरिदीर्घः इति दीर्घस्तथाहि
लघवो ल्पाः चिह्निष्टे ल्पे लघुरित्यमरः मलिना श्यतोनिः कृष्टात्मेण तत्प्रकटीभवति अर्थांतरन्यासः॥
२३॥ अनुलेपनानीति॥ तेन समयेन प्रदोषकालेन कर्त्रा अनुलेपनानि कुंकुमचंदनादीनि कुसुमानि र
णि चिरसुमस्य पूर्वस्त भस्यमनोभवस्य कामस्य बोधनमुद्दीपनं यस्मिन् कर्मणि तद्यथा तत्पूर्वकरसर्थः
रतरथा अनुलेपनादि बोधकस्यैव फल्पसंभवात् इति भावः समंससद्देवा वोधिवत्तु चोपितानि वृध्यादेः क
र्मणि लुङ् अत्र गंधमाल्यसंपादनस्तौ मनःप्रसादनदीपशिखासादिना नामचोपिपवेस्यकेनक्लिष्टशब्देना
भिधानात् क्लेसमलामेदध्यवसायेसया विशयोक्तिरेका तया स्मसमनोभवबोधवमिति क्रियाविशेषणसा
मर्थ्यात्समागिति योगपद्याभिमानश्च मनोभवेतरबोधनयोः कार्यकारणभूतयोः सद्धिपर्ययरूपात्वान्यात
द्रुमयापेक्ष्या गंधमाल्यादीनां प्रस्तुतानामेव बोधनरूपैकधर्मसंबंधात्तु तुल्ययोगिता भेदश्चेति संकरः
॥२४॥ अथ संदोदयवर्णनमारभते॥ वसुपेति॥ अथ प्रसंजनानेतरं वसुधा बोनभ्रप्रान्ते न निसृतं वहिर्निर्गतिः अ

स०प्र०

५६ लिपतेः शेषस्य फणामणिस्तरस्त्राणां गच्चांभासां पटलैस्तोम इवेत्युत्प्रेक्षा शीतरुच अथेन्दुस्य संबंधि स्फुरदुल्लसद् सप्र
शुजाले मघोन इमो मा घवीमां तेद्दीमाघवा वरुल इति विकल्पात्तत्ता दिशः ककुभं दिशः समस्फुरत् अभूष
त् वै प्राच्यां दिशि चंद्रकिरणजालमलस्पतेत्सर्व्यः सेपर्य्युपम्यः करोते भूषण इति कात्पूर्वः सुडागमः अडभा
सव्यवायेपीति नियमात् ॥२५॥ विशदेति ॥ विशदप्रभापरिगतमभ्राभ्रकांतिव्याप्तौ उदयइति अचलः उदयः
पूर्वपर्वतस्तस्मरः तेन व्यवहितं इंद्रवपुरिंद्रमंडलं यस्मिन्नप्यग्रू दिशः प्राच्यामुखमग्रभागः वक्रोच्चप्रतीय
तेतदमेदेनोत्प्रेक्षते अप्रकाशदशनमलक्ष्पदंतेस विलासहासं सविलासहासास्मितमिवशनकेर्मे दं
विधमौ ॥२६॥ कालेति ॥ पुरः प्राच्यामग्रभागे च तुषारकिरणस्पंदः कलया किरणेन अन्यत्रोपलक्षितं परिमेद
मल्पंनिनाविदलितातिमिरौघा एवजटा एवजटायस्पत तत्गगनेन मघवासंगगणापि पतेः प्रथमवतेरीर
श्वरस्पगणाप्रथमसंख्योधार इति वैजयंती मूर्तिरिति जनैः क्षणमप्यपष्यत गगनेन मघ्वानांशिवमूर्तीनां
अन्यतमेतियतत्तस्स्यमभिसत्रामिसूर्यः कलामात्रोदितचंद्र इति फलितार्थः रूपकालंकारः ॥२७॥ न
वेति ॥ नवचंद्रिकाभिरेव कुसुमैः प्रकीर्णं तमएव कवरीकेशपाशः ज्ञानपदस्यादिनांडीप्तांविभर्तीति तत्कृतः ह
रेः शक्रस्य हरितो दिशः मुखमेग्रभाग एव मुखवत्कमिति श्लिष्टरूपकं तस्य ललाटतटवद्धरिमनोरमे हिमरश्मिदल तरं
मिंदुखंडं मलयजेन चंद्र~~ ~~नेनार्द्रमिवददृशोधावल्यादितिभावः अत्र नवचंद्रिकाकुसुमेस्यायनेकदेशविवर्तक
रूपमहिम्ना हरिवधूत्वप्रतीतौ तत्सहकृतक्लेषावगतवक्रमेघवसितमुखसंबंधप्रमादनोदितललाटतटोपमो
ज्ञीकानेनेंदुदलस्पनुपातनिजधावल्यगुणनिमतमलयजार्द्रत्वरूपात्प्रेक्षेति संकरः ॥२८॥ प्रथममिति ॥ ५६

त५

पलवती स्त्रीकमलाच्चपलाकमलाविद्युत्पुंश्चलीपिप्पलीषु चेति विश्वः सैव जनस्त्रपलाजनः जातोऽस्य सं
ज्ञापूरणयोक्रेति चोभयत्रापि पुंवद्भावप्रतिषेधः तं प्रतीति तस्मिन्निति सर्वः अदः इदं कृत दृष्टं त्योद्धं चोदनीयं
कथं इत्या सोक्षं न चपलत्वाल्लाश्चर्यमिसर्व्यः स्त्री चपलेषु वाकियद्देतदितिभावः श्लेषमूलातिशयोक्तिः अ
नुप्राणितो यमर्थान्तरन्यासः ॥२६॥ दिवसइति ॥ दिवसो वासरः पुमानितिभावः मित्रे सूर्ये सुहृदश्चानुमित्रेण
सहे सूर्यः तृतीयार्थ इति नो कर्मप्रवचनीयत्वाद्द्वितीया मित्रे सुहृदी मित्रोर्क इति विश्वः विलयं नाशमगमत
गतः गमेर्लुङि पुषादित्वात् अरकादेशः अबलया स्त्रिया मया रुच्चिभर्तु तेजोनिधेः प्रभास्पदस्य पतेः आर्क
स्पविरहाधिगमत् वपेलोपेपं चमीविरहज्ञानं प्राप्यापीसर्वः इहास्मिन् लोके किमास्पते किमर्थं स्थीयत
ते असंभ्रांवलि इव तेति खेद इतीत्यमालोच्य सर्वः अत एव गम्योत्प्रेक्षा सेध्ययापि व्यगमि व्यगामीसर्वः ज
मेस्यार्थे एषं ताज्ञा वे लुङि मिलाङ्खुवः अन्यत्वाद्दुपधावृद्धिः नार्थस्याद्भूतु मल्पितितस्मात्स्यार्थेणिजुर
धोमितां रुस्वोय तामवेतविगमशब्दात्करोनिरणं तालुङि तिकेमित ॥१७॥ अथाधकारं वर्णयति ॥ पति
रात ॥ पतंगोर्क एव मृगराडिंहसिंह इति रूपकेसमासतस्मिल्लिजेन प्रतिविंवेन रोषिते कोपित इवेत्युत्प्रेक्षास्य
प्रतिविंबे सिंहभ्रमादितिभावः अतएवांचुनिधौपतितेसत्ति तज्जिघांसयेतिभावः भावलक्षणसप्तमी अथ
पतनानेतरं नागयूथानि करिकुलानीवमलिनानि श्यामानि उपमानानि सामान्यवचनैरिति समासः तमां
सिजगल्लोकंपरितः परितस्तैरंधाद्यामासुः स्टणांते कृतेरिलि इत्कृतप्रसयोगादगुणः अत्रय ध्यपिना
गमलिनानीसुक्ता नुशासनसिद्धोपमानानानुमारास्तेगमृगराजीर्हत्राप्युपमितसमासात्पयेणोप

समुद्रस्येति विरवः उपचयाय स्वोरुवच्छेयसमच्छये जीवतेस्म स्वितस्म अन्यत्र लभतेस्म पदा अयाविकुशलो ह्सकुशलान्महांत
लाभमाप्नोतिता छ्दिति भावः श्लेषसंकीर्णयमुपमा उपमा संकीर्णश्लेष इत्यन्ये ॥ २१ ॥ रजनीमिति ॥ शशी रजनीमवाप्य रुचि
शोभामाप अस्ते शशर्यपि तो रजनीं व्यमूषत तथाहि महतां सतां चरितं अविलंबितं अमं अविलंबितप्रकारं यथा तथा इतरेत
रोपकृतिमत् भवतिअन्योन्योपकारवत् अहो इत्याविलवादाश्चर्यं अत्र रजनीशशिनोर्मिथः शोभाकरत्वादन्योन्यालंकारः
तदन्योन्यमित्योयन्त्रौ सा यो सादकतामेवदितिलक्षणात त्[ऽऽऽ] तत्सामर्थ्यंकथ्याय मर्था तरन्यासः इयं गागीभावेन संक
रः ॥ २२ ॥ दिवसमिति ॥ मणधरश्चंद्रो दिवसं दिवसेइत्यर्थः असतसंयोगे द्वितीया भृशमत्यन्त रुच रुच्यं शोपादनां कु रु
नां किरणं चपादाइत्यवृत्तं तु यशाइत्यमरः हतातावितान् अतएवानवरतो रविधिक्षेरलिरुतेरुदती क्रंदती चास्ति तांकु
मुदिन्यवनितां अग्नालि चंतकरा अचंद्र इत्यभेदेन समास इति वा मनः तेरुकैरेरण्गोप्शुमिरणहस्तैर्मृदु रामशानस्प
शनूदशिखसतउ धास यतिस्म परावामहतानां पतिभिराश्वसनीयत्वादितिभावः स्व सिधांतो र्णोच उपधाया हस्व
अचपादएव पादस्तेन हतामिताम्मिति दूनसाधितत्क्लिष्टरूपरूपकोत्थापितेयमलिरुते रितिव्यधिकरणपरिणाममग
मरिोदनो स्वेक्षासापेक्षय मुधासनो प्रेक्षेसंकोविजातीयसंकरः तथाकैरेरेयकरैः कुमुदिनीवनिते तिक्लिष्टाक्लिष्टरुप
णामगधरभल्लभलप्रतीतरेकदेशविवर्तिरूपकततत्सापेक्षयं उदश्रसदितिगम्योत्प्रेक्ष परो विजातीयसंकरः रोदनोप्रे
क्षासापेक्षयमुधासनोत्प्रेक्षयसजातीयसंकरोति ॥ २४ ॥ प्रतीति ॥ सुदृशो गनाः अभिमतैर्भर्तारमभिलक्ष्यणेनाभिप्रति
अभिमुस्वश्वयीभावः शशिर स्मिनिर्गलतः स्रवंतो जलबिंदवो यस्यास्तां इंदुमणिं चंद्रकांतशिलासैवदारुतस्य वधूः स्त
न्यायीवधूः स्त्री प्रतिमाः स्मरात्र यस्य तेन स्मरजन्मनायमपयसा स्विदाचुना उपचितान्याप्तासिन्नवतीयर्थः प्रतिकूला
कामिनी सपत्नीतिभ्रांसेतिशेषः चकिताभीतादद्रशुः अत्र चंद्रशिलपुत्रिकायां सादृश्यनिवंधनया प्रतिकामिनीभ्रांसाभ्रांतिमद्

अम्लेति ॥ अोषधिपतिरिनोषधिपतिः चंद्रो वेव्याग्र इति क्लिष्टरूपके अम्लेतेमेवाम्लतमोषधविशेषः तेनद्रवैरोर्द्रैः करैरेव करैः कि
रणहस्तैरञ्जदशं अपमार्गमगपरिमार्जनं विदधन्कुर्वन् परितोविसर्पिसर्वव्यापि भशं परितापिसेतापकरी मनःकोपः स ए
वविषतत्वपुषः शरीरादत्तारयति स्मत्व वंशोषितवानस्व च सावयवरूपणेवषयीति स ऊंगानिकहस्तसंस्पर्शाद्विषमि
वनिशाकरस्पर्शादं गनानां वपुषि रोषो नष्टइत्युपमा व्यज्यते ॥ २६ ॥ अमलेति ॥ अधिकमवभासिता दिशो याभिस्ता
साभिदुरुचोविकेरोअमलाह्मसुनिर्मलमूर्तिषु तरुणीनां कपोलाफलकानीव तेष्वभितो मुहुः प्रतिफलन्ननक्रमनसं
क्रतं प्रचुरतरं विससार दर्पणे संक्रमणादितिभावः अत्र चेद्भासां कपोलसंक्रमेपि संक्रमोक्तेरसंबंधे संबंधेरूपातिश
योक्तिः ॥ २७ ॥ उपगूढेति ॥ रजनीकरश्चंद्रः अलघुभिरूर्मिभिरेवभुजैरुपगूढा वेलायेन तेसावधेमप पीतिभावः स
रितामधीशं समुद्रमपीस्वभावादक्षोभ्यमपीतिभावः अनुत्सुभत्क्षोभयतिस्म क्षुभ्यतेर्णौ च उपधाया हस्वः अने
नलघुंगतसारयदवएवरागिणस्तेषांगणं अनुत्सुभदितिदृः किमिव चित्रं न किंचिदित्यर्थः अत्राक्षोभ्यमपिक्षोभं यत
श्चंद्रस्यदृष्टापिकयायाद्वक्षोभकत्वो केरर्थांतरन्यासः ॥ २८ ॥ भवनेति परिमंदतया एकाकिनादसमर्थतया भवनोदरेषु
रहाम्येते वृशयितः सुप्तो मदनो जालमुखोपगतानेणवाक्षविवरप्रविशन् अतएवलसत्स्फटिकयष्टीनां रुणि वरुक् शोभा
येषां तान् स्फटिकदेइनिभान् ईंदुवितरणान् अवलंब्यावष्टभ्यादतिष्ठत् उत्थितः अत्रो ह्माधोस्यानयोरभेदविवक्षयाउ
दान्‌र्ध्वकर्मणि इति परस्मैपदसिद्धिः एततदेवाभेदाध्यावसाय मूलातिशयोक्त्या स्फटिकयष्टिरुच इत्युपमयासहक्लृतया
अवलंबेनत्वावलंबेव्यतुः त्यापनस्यावलेचहेतुकलोत्प्रेक्षाप्रसापेक्षता सांसंकरः ॥ २९ ॥ अविभावितेति ॥ मदनोपि प्रथ
मोदयात्प्राक्तमसाऽविभावितोऽलक्षितः इषुविषयो बाणलक्ष्यं येन स सोभवतन्ननामसुत्क्षेपायस्मादधर्मधाम्नि शीत
करेउदिते दिशः प्रकाशयति अमुनामदनेन धनुशैरा चक्रेषु आकृष्य वान् चेद्रएवमहान्नुद्दीपको मदनस्यामूदितिभावः ॥

अवकाशमिति॥ पुष्पचन्द्रपुष्पधन्वावासंतायामिति॥ विकल्पान्तानेकोद्देशः तस्य धनुः पुष्पचापं पुष्पो तरं तस्मात् अलितानिः
सृत शिलीशिल्पे मुखेषये वाते शिलीमुखा बाणा अलयश्च अलिबाणौ शिलीमुखाविसमरः तेषां गणाः शशिन उदयात् विर
काशं औत्सुक्यं उन्मीलनं च गमितं माधितस्तस्तां हृदये कुमुदे च अवकाशमाश्वासमलभत उभयत्र प्रवेशं लब्धवानित्यर्थः
अत्र चन्द्रोदये कुमुदकामिनीहृदयो र्हृदयोरपि प्रकृतयोः शिलीमुखप्रवेशलक्षणे कधर्मयोगाद्दीपमा तुल्ययो
गिता एकधर्मेत्वाच्च शिलीमुखेति श्लिष्टपदोपात्तयोरलिबाणयोरेकत्वाध्यवसायमूलातिशयोक्त्याश्चादिति संकरः ४१
ककुभामिति॥ ककुभां मुखानि दिशां मुखानि सहसा झटिति उज्वलयन् उद्भासयन् रतये सुरताय अधिकया कुलतं औत्सुक्यं दध
त् ऊनामिति शेषः अन्यत्र रतये कामदेव्यै आकुलतमयिविरहलं दधत् तस्य त्रैरत्रिमुनेर्नयनप्रभवः अत्रिनेत्रसमुद्भूत
इति पुराणात् त्रिनयनप्रभवो नमनतीसत्रिनयनेप्रभवः अपरः त्रिनयनप्रभवो दृन्याद्दहनोग्निरिंदुः कुसुमधुको
मेअदिदीपितत्दीपतिसंदीपते गौ अकर्मानी याद्दिना विकल्पान्लोपधाया ह्रस्वः अत्र प्रकृते कुसुमेषा दर्पनेनाम प्रवर्द्धि
तं तस्य तत्रप्रतीयमानेनउज्वलेनाभेदाध्यवसायान्तमिति मिदो दृद्रुत्वा ज्ञसनादिधर्मसंबंधाद परोक्षे दहनः
वपशद्वप्रयोगसमर्थ्याद्दहनेन लोत्प्रेक्षानरूपकमिति रहस्यं चंद्रोदयात्कामो ववृधे इति तात्पर्यम्॥४२॥ एवं
चंद्रोदयास्यमुद्दीपनविभावनेमुक्तात फलमाह॥ इतीति॥ इत्येवं सितदीधितौ उदयति सति अयत्लाः स्त्रियो निश्चि
तां प्रियान् तमानाभागतिरागमनेयामिस्ताः सद्यः प्रतिकर्मसाधनेकर्तुं उपचक्रमिरे प्रतिकर्मप्रसाधनमित्यमरः चं
द्रोदयात् प्रियागमने निश्चितस्त्रलेकर्तुं प्रकांतइत्यर्थः तथाहि समये कार्यकाले कृतमनुष्ठितं सर्वं सकलं कर्मउपका
र्युपकारं भवति अन्यथा विफलमेवेति भावः अत्रैतानिश्चित्य प्रवृत्तिरासांयुक्तेत्यर्थांतरन्यासः॥४३॥ अथ प्रसाधनमे
व प्रपंचयति॥ समम् इति॥ सुतनोः स्त्रियाः उरोजधरो उरस्यामेकमेव हारमेव भूषणं समं चैव मेयेण दधतुः संहतया सन्नि

हिमदीधितिश्चंद्रः प्रथमं कलामात्रमभवत् कला तु षोडशो भागः इत्यमरः ततश्चार्द्धमभवत् अर्थानन्तरं अर्थोऽर्धे समरः
उदितः साकल्यादुस्थितः सन् क्रमं महान् महांतं संपद्यमानो भूत् दमहद्भूत् अभूततद्भावे च्विः हलो तलान्नकार्यांतरप्राप्तिः त
थापि द्युतिशालिनोपि तेजिष्ठाः क्रमशः क्रमेणैव उदयवृद्धिं दधाते सहसा झटिति नदधति धुवं सामान्येन विशे
षणसमर्थनरूपोर्थांतरन्यासः॥४९॥ उदमज्जितीति॥ अपानि द्रुपांडुरसरोजरूपावि कचपुंडरीकश्रिया तुहिनद्यु
तिनाचंद्रेण प्रथमे हरेः पूर्वमेव प्रबुद्धायाः अन्यथा तन्मुखं दृश्यते इति भावः नदराजसुतायाः सिंधुकन्यायाः श्रियाः
वदनेन्दुनेवउत्प्रेक्षाके रमज्जितो हरेः शयनोसमुद्रादि संपर्क उक्तोत्प्रेक्षा संभावनायामित्यनिर्देशः उदमज्जि उन्मग्नो
उस्थित इत्यर्थः॥५०॥ अथोदेति॥ अथोदयानंतरं लक्ष्मणालांछनेन सोम्मित्रिणा सौम्यानुगतमनुसृतं कांतवपु
कोतर र्यस्य स लक्ष्मणानुगतं वपुरिति श्लेषः वस्तुतः शब्दभेदेनार्थद्वयन्नपमासपिजं तु काष्ठवदैकवर्णवशाद्वप्रतीतेः परि
तः समंतात् दृक्षगणैर्नक्षत्रगणैर्जाम्बवादिभल्लूकसमूहैश्च इत्यर्थः श्लेषः एकराभालावलेविफलद्वयवदखं
डेवशद्वार्थद्वयप्रतीतेः नक्षत्रमृक्षंभं ताराऋक्षाच्छभल्लभाल्लूकाः इत्यमरः परिवारितः शशी च दाशरथिर्द
शरथपुत्रो रामः अतरत् जलधिं विलंघ्यातिमिरोघ एव राक्षसगणं तत्ताच्चिभिदे विदारयामास भिदेः कर्तरि लि
ट् तत्र श्लेषसंकीर्णवस्तु वतिसावयवरूपकालंकारः॥५१॥ उपजीवतीति॥ अंभसां निधिः समुद्रो वणि
जि वसततेपरिमुग्धतांसौंदर्यं अन्यत्र मोग्ध्यं व्यवहारानभिज्ञत्वमित्यावत् मुग्धसुंदरमूढेष्वित्यमरः दधतो दधा
नस्य घनानां वीथिर्घनवीथी रंतरिक्षे साची वीथीपदएपवीथीरिवेत्युपमित तत्समासः तामवती अवतः अविद्रवतः उडुपतेर्नक्षत्र
नाथस्य कस्यचिद्वणिकः वणिजः कलाः षोडशांशान् मूलधनवृद्धिश्च कलास्यान्मूलजे वृद्धौ शिल्पादवंशमात्रके षोडशांशे

स०कां० ९९

दुरितिसंकरत्तेनकपोलयोर्लोकोत्तरलावण्यदर्पणेमृ्यांच्चव्यज्यतेइत्यलंकारेणवस्त्वलंकारध्वनिः॥४८॥ध्रुवमिति॥ स०९
मदनेषवोमहतिवज्रिणेकुचतटेप्रतिहतिप्रतिघातंप्रागताःप्रासाःध्रुवंयस्मात्तूरिम्णानिजभारेणग्लपितंकृश
तेम्रवलग्नंमध्यंयेनतंतादृशंकुचतटंइतरेणरागेणतुल्यंइतरागवत्तेनतुल्यवतिप्रत्ययःतनुतांकार्श्यनागमत्
नामजत्पुष्पादिसृष्टेणस्मरजंदशाःतदामदनेषुपातात्कुचारितमेगतानामंगकृशमासीदित्यर्थःअत्रकादि
न्यस्यप्रतिहतिहेतुत्वात्काव्यलिंगंतदपेक्षयाकुचयोःकार्श्याभावनिमित्तान्मदनेषुप्रतिघातोत्प्रेक्षणात्काव्यलिंगसंकी
र्णगुणाभावनिमित्ताक्रियास्वरूपोत्प्रेक्षा॥४९॥नेति॥प्रियतमंग्रहमेष्यताग्ह्ष्अतिसतिइणोलङःसइतिसत्रोद्देशःविशेष
विदांतारतम्यवेदिनांविवेकिनामित्यर्थःअतएवसुदृशांसम्यक्दर्शिनीनांस्त्रीणांमनःकर्त्तमनोरमास्यपिवसनांगरागः
सुमनसःसुवस्त्रांगगंधमाल्यपुइदमेतदितिइदंपुरोवर्तिवस्तुएतदितिवसनमितिअनुलेपनमितिसुमनसइतिविशेषाकारे
णतथायोग्यमस्माकंधारणेर्हमितित्यनिरस्येदनेनिरधारयतप्रियागमनहर्षातिरेकादितिकर्तव्यतामूढमभूदित्यर्
थःचिनोतेर्लुङिताङिलोःसिचसार्वधातुकार्द्धधातुकयोरितिगुणःहर्षेतसंकरेनिश्च्यसंबंधोक्तेरतिशयोक्तिःसुम
नःसुमनइतियमकविरोधक्षेतिसंसृष्टिः॥५०॥वपुरिति॥वधूःस्त्रीपुरिरंभसुखव्यवधानभीरुकतयाआलिंगनसुख
विच्छेदभीरुत्वेनकृपन्नपिवतव्यइतिकृकन्नप्रत्ययःवपुर्नानुलिप्तेनानुलिप्तवतीअंगरागमात्रव्यवधानमपिनसह
तइत्यर्थःलिंपतेकर्त्तरिलुङितङ्तथाहिअदोवपुःप्रियसंगमेकुमनवलेपमच्छेदनमगर्वच्येतियतस्वलेपस्तुगर्वेस्या
ल्लेपनेमूढेणपिचेतिविश्वःइदमनवलेपनमेवास्यवपुषोवाच्छंरूशंस्तमेयुक्तेश्लेषानुप्राणितेयमर्थांतरन्यासः५१॥
निजेतिअपरास्त्रीनिजयापाणिपल्लवस्यस्खलनादभिघातादभिनासिकाविवरंनासिकारंध्रंप्रतिउत्तत्तैरास्यकमल
स्यसनेर्मुखमारुतैमुंमुखवासंमुखवासनाशनैःपरीक्ष्यमुमुदेइयंवासिकसज्जिकानायिका॥५२॥विघ्नतेति॥दिवा
९९

आकोशेनसवयसावयस्यापाचपुरोऽग्रेविघ्नतेविधारितेपरिपूर्णमंडलविकाशंविवशोमंविभर्तीतितदूततस्मिन्हिमधाम्नि
चंद्रेचंद्रर्पणतलेअमगददृशःस्त्रियःस्वमुखश्रियंपूर्वसोपमानभूतामुत्तरत्रोपमेयभूतांचेत्यर्थःमुहुर्द्दशुःत्रोपम्य
परीक्षार्थमितिभावःअत्रान्यस्त्रियोन्यत्रसंभवान्त्रेद्रेतत्सदृशीमितिसादृश्यासोपादसंभवत्वस्तु्संबंधनिदर्शनातथा
चेद्रदर्पणयोर्द्धवसयसोप्य्ययासंख्यमच्यायाधयासंख्यालंकारश्चतदुभयापेक्षयाचंद्रदर्पणयोर्मुखश्रीदर्शन
स्यानलेनप्रस्तुततयोरेवौपम्यस्यगम्यत्वात्तुल्ययोगितेतिसंकरः॥५३॥अपीति॥नमतिकपोलार्पणयप्रलीन
पाणिपल्लवेध वतिकरपल्लवेअर्पितनिहितेकपोतलेगंडस्थलेयस्यतेवाहुंअपिजानुज्ञानुनिविभत्स्यपेऽव्ययीभावःउपधायनिधायकू
पर्णजानुमवष्टभ्येत्यर्थःकंठेपरिवर्त्ततइतिकंठपरिवर्तीनतुमुखेआरितइत्यर्थःकलमव्यक्तमधुरंस्वरहीनंतारध्वनिशून्यंस्व
र्णादिस्वराभिव्यक्तिरहितहीनंयाप्यंतूगानंतदपरयातदासकेयामेदकेटेनैवावगीतयेत्यर्थःकालक्षेपार्थमितिभावःअयं
चातेकेयानुभावःअपयास्त्रियाउदकेठितत्वेदितेप्रियागमयोत्सुकयास्थितमित्यर्थःभावेलुङिचिणोलुकअत्रचकालय
हिमवलक्षणमोत्सुक्यंतंसंचारयतिनिबंधनात्प्रेक्षयालंकारः॥५४॥मणयेति॥अपवसाधनानेतरेमुग्धतरोसंततेकाव
ममोहितःतरुणीजनःप्रणयप्रकाशनविदोअनुरागव्यंजनचतुरःइत्यर्थःमधुरामधुरमाविणीःअन्यत्ररम्याकृतीःसु
तेरामभीष्टांअभीष्टजनस्यचित्तहृतामनोहारिणीःसखीदृशइवकौतमनुप्रियजनंप्रतिप्रजिघायप्रेषितवान्हिनोः
तेर्निरिवेनसत्सहसमासेवचनात्दृशइवेतिसमासःपूर्णोपमातयासखीनामहत्वातरंगत्वकार्यदर्शित्वादिव्यंजना
द्लेकारेणध्वनिः॥५५॥तथान्यकाचिन्नायिकादूतीवाचिकमनुशास्ति॥नत्वेति॥समेदयितोयथामयिकरुणांकुरुते
यथालघुतामल्पतांचनावगच्छतिनगम्यतेएनेदयितमुपगम्यप्राप्यतथानिपुणंवदेःविधत्स्वप्रार्थनेवाल्लिङ्इत्
तीत्यकाचिन्नायिकाअभिहत्तांअभिलक्षणेव्ययीभावेनपुंसकइतिहृस्वत्वेसंदिदिक्षसंदेशवतीकौर्त्तेरिलिट

स्फुरितेतत्सादृश्यमनेपदेननायिकातुकलहांतरिताकोपात्कांतंपराणुद्यपश्चात्तापसमन्वितेतिलक्षणात्॥५६॥दयिता
सं०कृ० १०० येति॥मानपरयाऽपिकमानवसाम्प्रतएवापरयानायिकयाऽऽगादितादयितमानयेसनुकास्खीदयितायदर्पितमानेतु सं०
त्रियार्थस्वपपादस्यचकर्मणिस्थानिनइतिचतुर्थीहरितेशीघ्रंययोऽन्यस्यामरणशंकवेतिभावःतथाहिशोभनेहृदयंयेषांते
सुहृदोमित्राणिसुहृद्दुर्हृदौमित्रामित्रयोरितिनिपातःचोदिताःप्रेरिताःसंतःसुहृदःप्रियोहृद्यःहितःश्रेयस्करःश्रेयाप्येतकुर्वतीः
तिभि—हितार्थकृतेःकृतमेषामस्तीतिकृतिनःकृतकृत्याभवेतिकिमुक्तंतुचोदनांविनैवकृत्याकृतिनइतिभावः॥अर्थयतिरस्यासः
नायिकान्यपूर्ववत्॥५७॥अथकाचित्कलहांतरिताकांतंप्रतिचित्रंदूतींसंदिशति॥प्रतिघातेत्यादि॥अपराधकृतमागस्कारिणं
कांतंप्रतिभिद्यनिराकृत्यपुनर्मय्यैवास्यानुवृत्तिरनुसरणंक्रियतेयदिताभेदुश्चितैवपतिव्रतानांप्राणप्रयरुचितानुवर्तेर्धर्ममलादि
तिभावःकिंतुहेसखितन्नानुवर्त्तेर्ममानमनसंभ्रमिमानहीनचित्तांकलयेत्मन्येत॥५८॥तर्हिलाघवायविग्रहैवस्थी
यतांमतत्राह॥अवधीर्येति॥धैर्यंकलिताकलितधैर्यासतीवाहिताग्न्यादिषुइतिनिष्ठायाःपरनिपातःदयितमवधीर्यतिरस्कृत्य
तेनसहविरोधंविदधेकरोमिइतिअत्रदधातेकर्तरिलिटितङिप्रशएसखितवकिमिगोप्यतेनिगद्यतेनकिंचिदित्यर्थःकिंतु
कथ्यएवेतिकथयतीसहसावर्त्ततेइतिसाहसिकीओजःसहोंभसावर्त्ततेइतिठकसानभवतीतिअसाहसिकीअहमितिशो
षःइदंसाहसंविरोधाचरणरूपसाहसकृत्यंकर्तुंशाकधाष्टर्यादिनातुमुनूसहतइतिसहासमर्थापिच्यायेस्नास्मिअत्रसाह
सिकत्वस्यविशेषणगर्भाग्लोसहनेहेतुत्वात्पदार्थहेतुककाव्यलिंगम्॥५९॥तर्हिकिमत्रकार्यमतआह॥तदिति॥
ततस्मात्तववल्लभमुपेयमास्मोपालभथाःनोपालभस्वतद्दोषेनगणयेत्यर्थःस्मोत्तरेलटचेतिउपालंभमाख्योगइतिअइप्रति
षेधःननुसापराधःकथंनोपालभ्यस्तत्राहवयमस्यदोषमपराधंचविद्मकिलअज्ञानोऽस्वतिक्षामतिक्षामइत्यर्थःकार्योर्थोनः
कुतोऽयमेवइतिविद्मोलटोवेतिनन्नलादेशःइतिसंप्रधार्यनिश्चित्यवधूर्नायिकाविहितागसेकृतापराधःयदपिरमणायप्रियसखि
याग्रहणात्अनुर्थीसखीविधसमर्जप्रजिधायविरहासहिष्णुतइतिभावःएषाकलहांतरिताप्रोक्ताचाहिं॥६०॥नन्वेति॥ननुसंदि

१००

ष्टतयाएकमेरानजानितांनिर्विवरतांनिरंतरालत्वेचदधतोरिदंसमभागिवमेवघटतेअंतर्मंदाग्रंतस्याहिविषयोपभोगाकु
चयोस्तदभावात्समशोहणूरधारणयुक्तमितिभावः॥४४॥कदलीतिगवधूकदलीप्रकांडउरुस्थिरःरंभास्तंभगंभीरऊरू
रिवतत्रूवंधनत्रूतस्मिन्नूअत्रकदलीप्रकांडस्यसौंदर्यमात्रोपमानेहात्वेवंधनयोग्यत्वकाचित्तानातरुशब्देनपुन
रुक्तिःमहतिजघनस्थलेचपरिसरःप्रदेशस्तस्मिन्नूरशनाकलापकएवगुणस्तेनमकरध्वजोमदनःसएवद्विरदस्तमाकर
लयतत्रनघ्नातरसनावंधनेजघनमतीवमदनोद्दीपकमासीदित्यर्थःसमस्तवस्तुवर्तिसावयवरूपकं॥४५॥अधरेखंडिते
सुदृशामधरेखंडेषुअमलकेकरसोलाक्षाद्रवःतथाकपोलभुवितेउस्थलेविशदःशुभ्रंलोध्ररजःतथानयनपंकजयोर्नवम
जनेनंशखनिहितात्पयसःक्षरात्नविमिदंचिह्नंनाममत्कर्मकर्तरिलिट्अधरादिनिहितंलाक्षारागादिकेशस्व
निहितस्त्रिरवत्सावर्ण्याःअथतोमदनदुर्गमभूदित्यर्थःअत्रपदेतदधरालककेरसादिकेतत्कंकेनिहितेतस्त्रीरमिसेक
वाक्यतयावाक्यार्थोवाक्यार्थसमारोपादसंभवद्बुद्धिस्तुसंवेद्योवाक्यार्थनिष्ठानिदर्शनालंकारःतेनाधराल कादीनां
गुणतएकस्वरूपःसामान्यालंकारोगम्यतेसामान्यंगुणसाम्येनयत्रवस्त्वंतरेकतेतिलक्षणात्॥४६॥स्फुरदिति॥प्रमदास्त्रियःस्फु
रतश्चलेतउज्वलाश्यामलाअधराओष्ठारएवदलानिपत्राणियेषांतेःपरितोविकसन्तोदशनाशावदंतकांतयएवकेसर
रितिरूपणात्प्रमदाएवसरस्यइतिसिद्धेयेकदेशविवर्तिसावयवरूपकंयस्यकुमुदेरितिपाटेकुमुदस्यमुखोपमानत्वंक
विसमयविरुद्धमिसेकावलेकारः॥४७॥भ्रजतइति॥अधिकेनप्रबलेनजितोविदेशांदेशांतरंभजतेअथवाकुशलंअ
तदनुप्रवेशंभजनमेवशरणंतयानुप्रविश्यजीवतीत्यर्थःअतोहेतोरिंदुरुज्वलोकपोलोयस्यतादृतिमुखस्यविंवयोग्य
तातिःपादार्थहेतुककाव्यलिंगस्सुदृशांमुखंप्रतिमाधवलेनप्रतिविंवव्याजेनाविशत्प्रविष्टःसाक्षात्क्रेदृएवायंनप्रतिमाच्य

शासंदेशं ब्रूहि इत्युदितया दूत्या कथितयस्सु दृशा नायिकया कन्यापि चपया हेतुना किं च न नाभिदधे किल नाभिहितं खलु किंतु नि
नितैरशिशिरशरीरनेनगवाहोरनिशं कृशितं कृशीकृतं कृशशब्दात्तत्करोतीति एपं तात्कर्मणि क्तः नवविहृतवद्भावे रक्तोतो हं
लोदले धारिताकारस्येरफादेहः निजशरीरं मंदं दे ऐक्षि ईक्षितं एषापि कलहं तरिता मध्या च त्रपया निजदुःस्या नमिधाना
न्निजनिरीक्षणेन स्वानस्थानिवेदना अतुल्यलज्जास्मरत्वावगमादिति इयं पंचमी कार्श्यावस्था कामवस्थांद दृष्टुनः
संगसंकल्पो जागरः कृशतारतिः ह्रीत्यागोन्मादमूर्छतां इत्यनंगदशादशा॥ ६५॥ इत्थं नायिकानिरूप दिष्टा दूती किमकु
र्वन्नात स्याहा॥ ब्रुवतरति॥ प्रगल्भाः प्रदृष्टाः प्रतिगर्भा प्रतिभासारा अभिरोयासां ता दूत्या नरान्पुरुषानुपसृत्य नरवते नरैः पु
भिः तुल्यं तेन तुल्यं क्रियाश्चेतिवति प्रत्ययः ब्रुवते स्म न चैताव ता चेवासद्रूपणमर्थान्तरन्यासेनाहसुहृदयमित्तित
याहि सुजिह्मजियामकुटिलबुद्धीनां संबंधिसुहृदस्य सुहृदार्थंमित्रार्थंयेनसहनित्यसमासः सर्वलिंगता चेतिवक्तः
व्यं इहितंच्छेष्टिं तप्रकृत्या विरुद्धमपि विराजति शोभते तस्मान्नाधार्ष्ट्यं दर्षिइस्यर्थः॥ ६६॥ अथ काचिद्दूती कंचित्प्रि
यप्रियं प्रति सप्रभिः प्रार्थते॥ ममसाद॥ योमुविमम रूपकीर्तिसौंदर्यप्रथम महरत् इयं लस्त्रियातदनु सत्कृहृदयातस्मि
न्नासक्तचित्तेतितेहे तां स्वयि मत्सरादेव मदनो निर्दयः सन् तां वस्त्रियां सुतरां क्षिणाति क्षपयति खलु एतेन
कार्श्यावस्था क्तः अवसाप्त्या प्रतिभूतपक्षपक्षनयायकपीडा समर्थस्य समदनस्य तदीयनायिका पीडोक्ता प्रस
नीलेकारः सच त्वयि मत्सरादिवेतिहेतूत्प्रेक्षोत्थापितस्मेति संकरः बलिनः प्रतिपक्षस्य प्रतीकारस्यदुःकरत्वस्तदीयतिर
स्कार प्रसनीकं तदुच्यते॥ ६७॥ तवेति॥ सा स्त्रिया तवकथासु गुणकीर्तनेषु मुकुरंगुलीमुखेनांगुल्यग्रेण श्रवण
श्रोत्रविवरं परिघट्टयति स्फालयतीति यत्तद्धुपायेतिशेषः तेन परिघट्टनेन मधकुणपूणपुरितश्रवणं स्फुटम्
कुणगृहणेनासेतुस्तुयाधनं तां नयति बहुतं कुलमानार्थप्रस्थादिवद्भोगुणप्रवेशाय श्लेषयतीस्यर्थः स्फुरितमि
सुत्प्रेक्षायांस्वचकेद्रविनोदनार्थं श्रोत्रघट्टनेध्वनतां नयत्व मुत्प्रेक्षिते॥ ६८॥ उपेति॥ अनलधुरतः सतावदधिकं उल्लि
माउ स्मेवयंतैः श्वसितैर्निश्वासैरुपतप्यमानां सितेतरसरोजदृशो नीलोत्पलाक्ष्याः अधरं नवनागवल्लिदलानां तांबूली
३

सभावविवरी
तमविर

दलानोरागरसोरंजवद्रवोद्रवतामार्द्रतांनेतुं न क्षमते नशक्नोतिएतेनज्वरावस्थोक्ता द्रवतासेवंधेप्यसंबंधोक्तेः संबंधेऽ
संबंधरूपातिशयोक्तिः स्यतःसिद्धकविप्रौढोक्तिसिद्धातिशयोक्तेरभेदाध्यवसायइतिरहस्यं॥ ध्व॥ दधतीतितारतिपतेरिषुक
शिततानेशितंदधतिस्फुटमेवसुत्रक्षायस्मात्किरंतरंनीरंध्रंच्छहलकठिनेच्चयस्तनमंडलेतदेवावरणंच्चर्मयस्य तत्तद
पिउत्यलपलाशदृशाउत्पलाक्ष्याः हृदयमभिदन्नभिदत्तिस्माभिदेत्लुङिइरितोवेति लेलरकुदेशः सावरणमपिभित्त्वमितिविरो
धो॥ स्यापितेयस्मरशरैर्निशितातैस्त्रक्षातथाच्चरंध्रान्वेषितकामेननिपीड्यमानायास्तस्यास्तदुदिरहोजीवितं संशयमा
पादयतीतिवस्तूव्यंग्यसंता॥ ध्व॥ कुसुमादितित्रिस्मि तदृशः स्मेराक्ष्याः अंगं कुसुमादपिसुतरांकुसुमारमितिदमपस्या
अन्यथानकिंतुससमेवसर्थेयद्यस्मात्कुसुमधुरककरुणानिर्दयः सन्निजैर्विशिखैर्वाणैः एषत्वविशिखाइसमरःकुसु
मेरेवसर्थकरुणदीनेयथातथाश्चनिशमुत्तपतितापयतीसर्थःतपतीरयंभोबादिकःसकर्मकःकुसुमाधिकसौकुमा
र्यमावेकुसुमेरेवसर्थःपीड्यतइतिकुसुमाधिकसौकुमार्यगुणेनस्त्रक्षानापरस्येतिव्यंजकप्रयोगाद्योत्या॥ ध्व॥ विपत्ता
मिति॥ अपक्रिययाविपरीतप्रयोगनेनिजेवितमुपयुक्तं सर्वमप्यमतमपिताभावः विषयतांविषवदहितत्वंसमुपैतिइसदट
दंविषवत्ससंधूनं अमतसुतोपिसवतेकपिदुकृहिमरस्मिरुच्यक्रंदपादाः भवतोविरुद्धाद्धुतेः त्वयाविनासेवनादिसर्थे
अमुलत्वियोदेहेतियाः पूर्वत्वयेतेक्किपिल्लुकृपाः पूर्वत्वयासहसेवनाह्लादयतीतिभावः एतेनविद्विषद्वेषरूपाअरस्या
वस्थोक्ता विशेषणसामान्यसमर्थनरूपोऽर्थांतरन्यासः॥ ध्व॥ उदितमिति॥ प्रियंप्रतिप्रियामुद्दिश्यहृदयस्यादे
हार्दंप्रेमप्रेमनाप्रियताहार्दंप्रेमस्नेहसर्थः तस्यदमिसएप्रसयः हृदयस्यहृल्लेखपदणत्वासेछवितिहृदयस्यहृ
दादेशः सहार्दस्सस्नेह इत्युदितंवदेःकर्मणिक्तः वचस्यपीयादिनासंप्रसारणंवचोदूतीवाक्यंप्रियतमेनअद्धीयतवि
क्तीतदधातेकर्मणिलट्संदंतरोरुपसर्गनचनाधः इष्टस्यप्राकप्रयोगः हियस्मात्पुरः पूर्वमेववदितेगितेवदितपराभिप्रयो
जनेईगितेहृद्गतोभावैइतिसज्जनः इतीरिताउक्ताः गिरस्वपदिगलेतिसजेतिखलुस्यप्रियाहृदयवेदिलास्यवेदसंवादे
नइतिकथितप्रियाविरहदुःखविश्वासेसर्थःअर्थांतरन्यासः एषाकलहंतरितास्वतएवमानास्थोविप्रलंभशृंगारः पूर्वनिरा

[illegible]

दयितेति॥ प्रथमं च दैवद्यात्प्राक् परिमुक्तां तां नियमेनोपहर्तुं मार्गानभिज्ञां तामुपगतैः ततः पश्चात् क्षणदाकरे उदिते सति सपदि ल-
ब्धपदैः दृष्टचारपदैश्चिह्नैः अतः दयितामिष्टां तस्याः हृष्टस्यापहृतस्य च मनसोऽनुपदिभिरन्विष्यानुद्धृतिरिव सर्वथः अतत्
एवगम्यो स्त्रीक्षाप्राग बलाविततधैर्यत्यागनिमित्तामनुपद्य चेष्टेति निपातः अन्वेष्टानुपदी प्रोक्तः इति वैजयन्ती युवभिः प्रथये
प्रयाते पातेः भावे लिट् अत्र जातपद अन्वेषणात्प्रेक्षणाद्यूनां चिरस्याहि स्वगम्यत इस लकारेण लकारध्वनिः॥ ॥७०॥ अथ यूनो
गृहप्राप्त्यनंतरं वृत्तांतं वर्णयति॥ नयपथेति॥ संभ्रमैः प्रसृत्यानसेरभिणपाः अस्सितमु वीगनायाः श्रवणात प्रणदितालि-
कुललिगुंजदलिपुंजे उपसर्गोऽसमासेपि णोपदेशस्येति णत्वं वा रिरुतं श्रवणेन्स्यलं दयितावलोकनेन विकसितो निस्तारं गत्वा प्र-
तानयनस्य प्रसरेण प्रणुन्नमिव पूर्वं वक्षावनिपपात तत्पासंभ्रांतमित्यर्थः अत्र च संभ्रमहेतुकस्य कर्णोत्पलपातस्य नयनप्र-
समहेतुकमुत्प्रेक्षते एवाह दृष्ट्वा॥ ७१॥ उपनेतुमिति॥ स हस्स्यापगतो रूढदागतः कम्पनयुगान्तत एव रभसेनास्थिता-
अतत एवोन्नतिमता कुचयुगलेन करणेन पुरः पदिवमाकाशं उपनेतुमिव ऊर्ध्वमुत्क्षिप्तमिव इति फलोत्प्रेक्षा उत्स्था-
नानिमित्तान्निरूपणेन निमित्ततत्त्वरसावलेनाकलितां व्याक्षिप्तां वधूं प्रियः परिरभ्यारधत रुद्धवानूद्बाहुस्तपान्निवा-
रितवानिति॥ खात्वार्थः रुधेर्लुङ् इरितो वेति च्लेर्विकल्पादङ्। एषा हृष्टा रोमाञ्चिता यनुभाववती च॥ ७२॥ अनुदे-
हमिति॥ अनुदेहं देहस्य पश्चात् अव्ययं विभक्तीत्यादिना पश्चादर्थेऽव्ययीभावः आगतवतः परिणेतुरस्य परिणेतुर्वो-
ढुरित्यर्थः नयतेः तृच्प्रत्ययः उपसर्गादसमासेपीति णत्वं गुरौ पृष्ठभागवर्त्तीच्य प्रतिमां प्रतिबिंबं उद्वहता पश्चात् स्थि-
तस्यापि तदाभिमुख्यादिति भावः मुकुरेण दर्पणेन दर्पणो मुकुरादर्शौ विश्वः अमरः वेपथुभृता नवोढतया भयस्मेरा-
श्यां कंपमानात् अतिमात्रभरायस्य तस्मादिति भावः तत्प्रतिबिंबगतमुकुरधारणादिति भावः नववध्वाः नवोढायाः क-
रतः पाणितलात् प्रच्युत्यास्त्रसिलिकरुपमपिनापाति न पतितं महताप्रयत्नेनावधारितमित्यर्थः भावे लुङ् एषा च मुर-
ग्धा अत्र च वधूकरस्य दारासंवेधोपिसंवेधो निरतिशयोक्तिः॥ गुरुमिति श्लेषो त्स्यापि तेति संकरः॥ ७३॥

अवनम्येति॥ अवनम्य गाढं अवगूढवता आश्लिष्टवता अत एव वक्षसि निमग्नकुचद्वितयेन दयितेन तत्क्षणाच्चलत्
उदग्रघर्घरसनायाः कलः किंकिणीरवो यस्मिन्कर्मणि तद्यथा तथा करेति दयितोपगमेवराविरहिता सनयाउष्पि
तयेसर्पः कयाश्चिद्वितिशेषः अत एव गलितस्रस्तं अत एव करुरुध्वनिविकरगृहीतवंधंवसनं क्षणं दृष्टा हाटकशी
ला सदृशीवधूरुदासिउद्दिप्तमणिलप्रतिमास्फुरेती ऊरुभित्ती ररुदृशो यस्मिन्कर्मणि तद्यथा तथा हिरण्य
हेमहाटकमित्यमः ववसेण आच्छादितवसनश्लाघ्यादनात्कर्मणि लिटि ऊरुभित्तिरिवेत्युपमितसमासः अत्रोपमे
ययोः संसृष्टिः॥७४॥ विदधानमिति॥ नववधूर्नवोढा अन्यकूपञ्चादुपेत्य दृशौ पिधानं दधा दयिते प्रिये स्वयं दृष्टि
सादर कः कः वदरति ब्रुवते पृष्ठते जनाय गिरवाच्या अभिधांतु नाध्यवससेनोत्सेहे लज्जयेति भावः अध्यवपूर्वात्
सहतेः कर्तरि लिटि किंतु पुलके न्यगदत अव्याप्रियज्ञानरूपस्याख्यस्य लज्जयाअसेनक्षितस्य पुलकैः प्रकाशनात्
सूक्ष्मालंकारः अप्रसेलक्षितस्रक्ष्मार्थप्रकाशः सूक्ष्मइत्युच्यत इति लक्षणात्॥७५॥ उदितेति॥ अभिमतजनत
समक्षेलक्ष्मणानाभिप्रति अभिमुख्येइत्यव्ययीभावः उदितउत्पन्नउरुसादृउर्वीनिष्पेषता यस्य तत् अतिवेपथुमत्
अतिकंपवत एतेन विशेषणद्वयेन प्रस्तुत्यानालिंगविरोधिनस्तंभवेपथुसात्विकावुक्तौ त्रपयाविधुरंविलक्षंएतत्
नलज्जासंचारिणा प्रियवाक्यटलमुत्केएवं प्रतिपतिमूढमपिइति कर्तव्यतामूढमपिसुदृशो वपुर्वाढं भृशं आ
दरातिशयश्लेषसुखरागादिलिंगेरादरविशेषव्यंजकमभूत् तत्सुसादरेकिमुपचारेरितिभावः॥७६॥ परीतेति॥ प्रमदा
अपि वेश्मनि निजवेश्मनियत्पुरुपचारधोप्रस्तुत्यानादिकर्मणि अलचोर्महत्तूरुभरात् परिमंथराभिरलसाभिरनुपदं
पदेपदेस्खलिताभिरपिगतिभिः प्रण्यातिभूमिं प्रेमप्रकर्षमगमत् परप्रेमास्पदीभूता अभूवनूरुसपर्यः प्रस्तुत्यानादपि
स्खलितगमनमेवपरं प्रीतिकरमभूदितिभावः स्त्रीणां स्खलनेपरः प्रीतिकरमितिविरोधाभासोऽलंकारः॥७७॥०

मधुरेति॥ मधुरं मनोहरं यथा तथा व्वतेउल्ललिते भ्रुवौ यस्मिन् तत्का पुरो व्वतभ्रुगोस्त्रियो रूपसर्जनस्येति हृस्वं वृ
श्रोर्ल्ललितं नयनचेष्टा च स करप्रयोगं हस्ताभिनयसहितं तत्स्य तत्सुतुरं तद्धन्वसमस्तुतनोः स्त्रियाः प्रकृतिस्थमे
व स्वभावसिद्धमेव सदपि निपुणेन निपुणा न्यायेन गमितमभ्यासितं अत एव स्फुटं प्रथिते यन्नो हृत तस्य ली
लेव लीलायस्य तत् तथा तोऽभवदिति निदर्शनालंकारः तत्पानतैवमुपमागम्यते॥७८॥ अथ कस्याश्चित्सप
त्नीनामग्रहणेन स्वाहूतायाः कान्तोपलंभं चिमिः कुलकेनाह॥ तमिस्रादि॥ अंगे सामे त्रयेण विश्वस्य स्रष्टा विधात्रा
तवश्यक ईक्षणसहस्रत येनेव सहस्रे समूहः संख्यायां अवयवे तयच्च नकृतेनेस्पष्टमिति एतदपुरुकृतत्ये
नकारणेन मयि विषये स्फुटं प्रत्यक्षमेव गोत्रमिदो नाम मेदिनाः अद्रिमेदिना च गोत्रेनाम्निकुलेच्चाद्रावि
ति विश्वः त्वयेति शेषः अय ईदृता जगति प्रकटीकृता खलु अत्रमिदिति श्लेषानुप्राणितमसौ अप्रत्यक्षमिद्र ह
त्वमुत्प्रेक्षते॥७९॥ नेति॥ अनिशं अप्रधिगतो चक्षुः सन्निकृष्टामपि दृष्टामिवेति गम्यते दृष्टेवत्रधिगत इय
मरः मामतिसमीपतया भवन्त्व विभावयति शेषः प्रथमा इति प्रथमपुरुषः इन्द्रियसंनिकृष्टामपि न लक्ष्यत इति वि
रोधाभासनार्थोपि शब्दः परमार्थस्तु दृष्टत्वादिति सामीप्यात्स्य विभावेन चित्रमिति भावः अभीष्टतमां पुनर्हृदयास्थि
तां हृदयादनपेतामपि अंतर्हितामिव व्यगम्यते अत एव विरोधाभासोऽपि शब्दः वहिः पुरतः कथंभवान् ईक्षते इदं
कुत्रचित्रं अतिसामीप्यव्यवधानस्यापि दर्शनात् प्रतिबंधकत्वादिति भावः प्रेमास्पदं वस्तु परोक्षमप्यपरोक्षमि
त्याह तेऽ इतरदपरोक्षमपि परोक्षमेवेति तात्पर्यार्थः विरोधाभासयोः संकरः॥८०॥ इतीति॥ इत्यभिधाय पुरोगं तुर
मिधुरं स्ने दृष्ट्याः पातेन विकसद्वदनो परस्परदृष्टिमात्रगतकोपामिसर्पः कोऽपि कान्तापि कांतरुणो युवा स्वक
रावलंबनेप्रियकरेण गृहीतेन विमुक्तामृतावेधनो अत एव गलतीभ्रवमानाकलामधुराकांचीयस्मिन्कर्मे
णि तद्यथा तथा अरुणतरुद्भ्वानूरुदादिभ्यः अमरएवं

अपयातीति॥ सरोषया मृगाक्ष्या कामिनि निस्तकृते रिपुपयातिति निपातितः सति कृतके कृते च मंदं यथा तथा स्पृष्टुमेतत्प्रि
मन प्रतिबंधार्थं हस्तं कृतमित्यर्थः दुष्टशठ हे भाव ललिट इतरापि नायिका पिकलयन्नपि कृतकोपमिति ज्ञानन्नेर
पिशकुने स्खलितः किल्लानिरुद्ध रवस्याथः सनिर्वेदं रुवाब तस्थैर्य इतः नगतः इत्यर्थः उभावपि समानानुरा
गाविति भावः एवाच्यकलहं तरितार ॥८२॥ अवलोकयति॥ मानवत्याः कोपवत्याः स्त्रियाः स्त्रीणामीर्ष्याकृतः कोपोऽ
मानोऽन्यासंगिनि प्रिये प्रियतम मालोकयत्यि वा समानक रत्वान्निर्दशः अश्रु केवि नीरोप्रियालोकना
द्विगलितं वंधसतिभावितं दुःखं वा स्वभावः स्त्रीकटीव स्त्र वंधोपिनिवीपरिवलापिन्ये यमरः नमितमुखं
दुर्यथा तथा तस्थेस्थितंइतियत् ततस्मात् नम्रमुखा वस्थां तं हृतं शीघ्रं प्रिया लोकनरदन्यत्रेव एवयत्यर्थः अप
यानमास्थितस्य प्रयाणंगतस्य मानस्पकापस्यपदं विह्नं अवलोकयावमवेअन्न्वेषितमित्यर्थः लज्जाविमित्त
यामुखानतेऽन्वेषण एव स मुख्येस्ते नतमिति मानगंधोप्यस्तमितिभावः ॥८३॥ सुहृदइति॥ सरसमार्द्रं नत
नमितियावत् तेन च्युल्लीके नापराधेन ततः तथा यौवनोष्मणा सहवर्तत इति सयौवनोष्मा किं च स्मरानलोष्मः कामा
ग्निसंतप्तः एवं त्रिविधाग्नितप्तोपि सहृदशः स्तनचारस्तरसावेगेन अतिदाहशापामेवेत्यर्थः आश्लिष्ट इव ततः आलि
गितवतः प्रियस्य कथमिके विवाकुतो हेतोरित्यर्थः न स्वेपयति कापयतिइति न स्वेपच्यःमित न स्वेध्येति स्वश प्रस
यः अस्रु द्वि वंद्जंतस्यमुमिति मुमागमः नाभवत् तथा हृ ईवदूष्मापि नाभूदित्यर्थः प्रियांगसंगप्रतीकारः स्वलु
कामिनीसंतापाइतिभावः ताद्दृगौष्म्यसंवेधेप्यसंवेधोते रतिशयोक्तिः॥८४॥ दधतीति॥ गुरुमहद्दशीतलं
स्मरयौवनोष्मभ्यां मुष्णमुरोजद्वयंकुच्युगं दधतीमुवस्तलेगतास्वयंसाक्षाद्दुर्वशीवस्थिताइस्युत्प्रेक्षाका
चित्स्त्रीअप्रतिमेन मुखेनवभौतांप्रतिमेनकास्याप्सराश्च क्रियासौन्दर्येणाधिकाच्येत्यतिशयोक्तिः तयार्यमके

नसेसखिः॥ वेशस्थेर्खता॥ ८५॥ इत्थमिति॥ इत्थमनेन प्रकारेण इदमस्थमुरिति थमुप्रत्ययः सपदि शांतः शमितो म
न्युः कोप एषां तराया यामिस्ताः वा पदं तेत्यादिना शमेर्ण्यंतात्क्ता तेर्निपातः प्रालेयांशोः चंद्रस्य रुच्येव या नारीः कामि
भिः घाटयितुं तुमितां रुश्च्वः पर्यायवचनेन थ्यसमर्थे त्विति तुमुन्प्रत्ययः कामं प्रकामं अलं समर्थाः आसन् दूत्य इवे
तिभावः विलसंतो मन्मथश्रीविलासा मणितसीत्कारादि मदनातिरेकविकारा यामिस्ताः ह्रीरेव प्रसूः सैव विघ्नस्तस्य
प्रशमने वारणे कुशलाः शेरते अस्मिन्निति शीधुमदिराशीले धुगिति अप्रत्ययादिको धुक्प्रत्ययः अस्ता रतिषुश्र
चार्यत्वमार्यकं उपदेशं चक्रुः नर्मसख्य इवेतिभावः अत्र प्रथमार्द्धे प्रस्तुतचंद्रमसा मानसे मनकामिषद्दूत्ये ना
स्वविशेषणसाम्यादप्रस्तुतदूतीलप्रतीतेः समासोक्तिः द्वितीयार्द्धे तु शीधुः ध्वारोपितस्याचार्यत्वस्य प्रकृते ता स्प७
पयोगात्स्वरूपणमः तयोः सापेक्षत्वात्संकरः तेन दूतीनर्मसख्युपमाध्वनिः उत्तरसर्गे मधुपानरतोत्सववर्णना
यास्मस्यैव प्रस्तावः॥ मंदाक्रांतावृत्तम्॥ मंदाक्रांताजलधिषडगैर्म्भौ नतौ ताद्गुरूचेत् इतिलक्षणात्॥
॥८६॥ ॥ ॥ इति श्रीपदवाक्यप्रमाणपारावारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरि
॥विरचितायां माघव्याख्याने सर्वंकषाख्ये नवमः सर्गः समाप्तिमगात्॥ शुभमस्तु॥ श्रीरस्तु॥ जगदंबादेव्यै नमः॥
चंद्रानकाष्टचंद्रे हि १८८१ गते विक्रमराज्यतः॥ ज्येष्ठे शुक्ले चार्द्रायां व्रतिपज्ञानुवासरे॥१॥ रुद्रमणेन समाप्तिमगात्॥

        

कापी नं ५४

स०९










इति सवेङ्·पाटीका
क

|०|